SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

द्वितीयो विभागः

।औषधादीन्यभिषिच्य साधये मूलेन च ॥६॥ दर्भासिने गुरुः ।
।शिष्यं प्राङ्मुखं स्थापयेत्ततः ॥ स्थापिते जले मैत्र स्नापयेज्जा ।
।लयेद्दसा ॥७॥ आचार्यं पूजयेद्विप्रान् दैवज्ञं च विशेषतः ॥ गोभू ।
॥हिरण्य वस्त्रादीन् ब्राह्मणेभ्यः प्रयच्छति ॥८॥ एवं शान्तिकरं ।
॥कर्म कुर्यादायुः प्रवृद्धये ॥ ॥इति श्री शाङ्ग वशिष्ठ ब्रह्मर्षिविरचि ।
॥तायां महासंहितायां कूर्मयोगविधानाध्यायः ॥ ॥ध॥ श्रीः ॥
।कृष्णार्पणमस्तु ॥ शाके १२७६ ॥ जयसंवत्सरे उत्तरायणे शि ।
॥शिरऋतौ माघमासे कृष्णपक्षे अष्टम्यां भौमवारे रात्रौ समाप्तं ॥ ।
॥श्रीः ॥

प्राच्यविद्यामन्दिरम् (म. स. विश्वविद्यालयः), बडोदरा
SMT. HANSA MEHTA LIBRARY • The M. S. University of Baroda

वृ १३२० – प्रारम्भः –

विघ्नौघाभिवारणाय नमः ॥ प्रह्लांभोजसुसुरेंद्रनिकरस्फुर्जत्किरीटोज्ज्वलज्ज्योत्स्ना
लीढपदारविंदयुगुलस्तत्त्वस्वरूपो रविः ॥ ब्रह्मांडोदरसंस्थिताखिलजगद्ध्वांत
स्य विध्वंसनं यः कुर्वन्निशि दिनं जगद्दिनं पर्वेति कालात्मकः ॥ १ ॥ ज्योतिःशास्त्रं
समग्रं प्रथमपुरुषतः स्वर्णगर्भाद्विदित्वा पूर्वं ब्रह्मा ततोपर्यखिलमुनिगणा प्राप्य
ना घ श्वेकाराः ॥ तच्छेदं सुप्रसन्नं मृदुपदनिकरैः पुष्पमध्यात्मरूपं राश्चाद्धि श्चप्रका
रो ग्रहचादिताविदां निर्मलं ज्ञानचक्षुः ॥ २ ॥ स्कंधेपद्रूपं स्वविधिविगमर्थ गंभीरमारावधु
नापद्रुक्ताः ॥ तत्संहितास्कंधमिदं तृतीयं वक्ष्ये जगन्मोहननामधेयं ॥ ३ ॥ क्रतुक्रियार्थं
श्रुतयः प्रवृत्ताः कालाश्रया स्ते क्रतवोभिरुक्ताः ॥ शास्त्रादमुष्मात्किल कालबोधो
दोगतामुख्यतराप्रसिद्धा ॥ ४ ॥ छंदः पादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणी ज्योतिषं च
क्षुषी च ॥ शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्यांगान्याहुरेतानि षट् ॥ ५ ॥ वेदस्य चक्षुः
किलशास्त्रमेतत् प्रधानतांगेषु ततोस्य लाता ॥ अंगैर्युतोन्यैः परिपूर्णमूर्तिश्चक्षुर्वि
हीनः पुरुषो न किंचित् ॥ ६ ॥ अध्येतव्यं ब्राह्मणैरेव तस्माज्ज्योतिःशास्त्रं पुण्यमेत

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)

ORIENTAL INSTITUTE
M. S. UNIVERSITY,
BARODA-(INDIA)

प्राच्यविद्यामन्दिरम् (म. स. विश्वविद्यालयः), वडोदरा

13/

॥श्रीगणेशायनमः॥ ज्योतिःशास्त्रसमारंभमुपक्रमतः स्वर्णाद्रिदित्वा पूर्वं बुद्ध्वातथो
पर्यरिलमुनिगणप्रार्थनायप्रचकार॥ तद्वेदं सुप्रसन्नेन्दु पदनिकरैर्गुलिमयात्मरूपं॥ वि 1122
श्वप्रकाशंग्रहचरितविदां निर्मलं तानचक्र॥२॥ स्कंधत्रयं तत्त्वविचित्रमर्थगंभीरमादा
यधुनायदुक्तं॥ तत्संहितास्कंदमिदंतृतीयं वसिष्ठमाज्ञमोहननामधेयं॥३॥ क्रतुक्रिया
र्थं श्रुतयः प्रवृत्ताः कालाश्रयास्ते क्रतवो निरुक्ताः॥ शास्त्रादमुष्मात्किल कालबोधो वेदांग
तामुख्यतराप्रसिद्धा॥४॥ छंदःपादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणी ज्योतिषं चक्षुषी च श्रोत्र
प्राणं शिक्षा च मुखं निरुक्तं वेदस्यांगान्याहुरेतानि षड्वा॥५॥ वेदस्य चक्षुः किल शास्त्रमेतत्
प्रधानतांगेषु ततोऽस्य जाता अंगैर्युतोऽन्यैः परिपूर्णमूर्तिश्चक्षुर्विहीनः पुरुषो न किंचित् ६
अप्येतमेआत्मलोरेवतस्मात् ज्योतिःशास्त्रं पुण्यमेतद्रहस्य॥ एतद्बुध्वा सम्यगाप्नोति य
स्मादर्थं धर्मं मोक्षमग्र्यं यशश्च॥७॥ श्रुतिस्मृतिभिः पटुरर्थशास्त्रे शास्त्रे पटिष्ठः कुशलः कला
सु॥ त्रिस्कंधविज्ज्योतिषिकः सुवेषः कुलीनसुदृष्ट्या स्वदनः सुशीलः॥८॥ त्रिस्कंधपारंगमएव
पूज्यः श्राद्धे सदा तस्सरहदकार्येः॥ नक्षत्रसूचिकिलपापरूपो हेयः सदा सर्वसुधर्मकृत्ये
॥९॥ शास्त्रस्वरूपं ग्रहचारमानं संसर्गपंचांगफलक्रमेण॥ गोचारसंक्रांतिनिशीथा
शातारावलोपखेटग्रहप्रवेशानववास्तुसुरप्रतिष्ठा॥ ... पुलदोषयोर्निरूपणमुत्त

CENTRAL LIBRARY DEPARTMENT SANSKRIT 1122
SMT. HANSA MEHTA LIBRARY The M.S. University of Baroda
प्राच्यविद्यामन्दिरम् (म.स. विश्वविद्यालयः), वडोदरा

पुत्रसमेतस्याभिषेकं समाचरेत्॥७॥ कुंभाभिमंत्रणोक्तैश्च समुद्रज्येष्ठमंत्रतः। प्रतिमां
कुंभवस्त्रं च आचार्याय प्रदापयेत्॥८॥ ब्राह्मणान्भोजयेत्सम्यक्छ्रेयो नरः स्यान्न संशयः॥९॥
ति॥ अथ्यादिसमाप्तिः॥ शौनकः॥ ब्राह्मणस्योपनयने नानुकूलो भवेद्विः तस्य शांतिं
प्रवक्ष्यामि मंत्रौषधिविधानतः॥१॥ अत्रोपनयनग्रहणं विवाहादीनामप्युपलक्षणं उ
पनयनात्पूर्वेद्युः कृत्वा पुण्याहवाचनं गृहस्येशानदिग्भागे गोमयेनोपलेपयेत्॥२॥ कुं
कुमेनोल्लिखेत्सम्यगष्टपत्रं सकेसरं सुवर्णेन विलिख्य त्वाहिरुज्ञं पञ्चधारिणं॥३॥ कृत्वास्य
न्नानपर्यंतं तंत्रं कृत्वा तु पूर्ववत् स्वगृह्योक्तविधानेन आचार्यो होममाचरेत्॥४॥ आ
कृष्णेनेति मंत्रेण समिदाज्यचरून् जुहेत् अष्टोत्तरसहस्रं वाष्टाशतमष्टोत्तरं तु वा॥५॥ तिल
व्रीहींश्च हुत्वाथ होमशेषं समापयेत् दारपुत्रसमेतस्याभिषेकं समाचरेत्॥६॥ कुंभा
भिमंत्रणोक्तैश्च समुद्रज्येष्ठमंत्रकैः कृष्णां गां दक्षिणां दद्याद्मेषस्य च स्वशक्तितः॥७॥ प्र
तिमां च स्वकुंभं च आचार्याय प्रदापयेत् एवं यः कुरुते सम्यक् सर्वदोषं विनश्यति॥८॥ इति

प्राच्यविद्यामन्दिरम् (म. स. विश्वविद्यालयः), वडोदरा

व ३ - ११३६६ - प्रारम्भः राज पुरोहित Chamba.

चित्‌॥६॥ अधीतवंतो ब्राह्मणा रेवतस्माज्ज्योतिःशास्त्रं पुण्यमेतद्रहस्यं॥ एतद्बुद्ध्वा सम्यगाप्नोति
यस्मादर्थं धर्मं मोक्षमग्र्यं यशश्च॥७॥ श्रुतिस्मृतिज्ञः पटुरर्थशास्त्रे ज्ञाता प्रदेष्टा कुशलः कला
सु॥ त्रिस्कंधविज्ज्योतिषिकः सुवेषः कुलीसुदृष्टस्त्वगदः सुशीलः॥८॥ शास्त्रस्वरूपग्रहचा
रमानप्रत्येकपंचांगफलप्रणीतम्‌॥ गोचारसंक्रांतिनिशीथिनाराबलोपखेटग्रहकेटना
श॥९॥ आधानपुंसवनसप्तममंगलं यत्संज्ञातकर्मवरनामनवान्नभुक्तिः॥ चूडाविधिव्रत
विवाहनृपाभिषेकयात्राप्रवेशनववास्तुसुरप्रतिष्ठाः॥१०॥ गुणदोषयोर्निरूपणमुत्पये
रपवादमेवरोत्पाताः॥ अखिलोत्पातप्रशमनशांतिकमिश्रास्त्वपि नृकाध्यायाः॥११॥
पंचोनस्वत्वारिंशद्विपुलाध्यायैर्विराजते स्कंधः॥ अज्ञानामविबुद्धिमितरेषां वर्द्धनं नि
त्यं॥१२॥ इतिश्रीवृद्धवसिष्ठब्रह्मर्षिविरचितायां महासंहितायां शास्त्रस्वरूपाध्यायः
प्रथमः॥ श्रीः॥ अथार्कचाराज्ञगतः शुक्लाश्वंशंन्यूनाधिमासेतरमासनिर्णयः॥ उ

प्राच्यविद्यामन्दिरम्‌ (म.स. विश्वविद्यालयः), वडोदरा
SMT. HANSA MEHTA LIBRARY • The M.S. University of Baroda

स्युप्पीज्ञलितत:॥मंत्रतंत्रक्रियालोपप्रायश्चित्तार्थमेवच॥४८॥यदस्य
॥स्विष्टकृज्जुकुयात्ततः॥अस्यमंत्रस्यातिधृतिःस्वर्णगर्भऋषिस्ततः॥४
वता॥ग्निःस्विष्टकृद्व्याहृतिर्व्याहृतततः॥समिदादिद्रव्यचयेष्ववदायासकृत्स
कृत्॥५०॥मिलित्वासृक्स्रुवेतत्रनिक्षिपेद्यन्नियार्यतः॥मंत्रेणसप्तते अग्ने इति
स्वर्णाहुतिंहुनेत्॥५१॥आचार्यस्योनवग्रहपथ्यग्रहार्चनफलंततः॥समिदाज्यचरू
णांचतिलहोमफलंवयत्॥५२॥ब्रह्मत्वंकुंभपूजायांम्चार्चनस्यफलंवयत्
॥५३॥पक्षेत्रपार्केत्रादुर्गाहव्यांगदेवताः॥तासांजपफलंसम्यक्गृह्णीयाज्ज
लपूर्वकं॥एवंषोडशाकत्विगभ्योदानव्यादक्षिणास्ततः॥५४॥धेनुःछत्रंरक्तवस्त्र
युग्मंहेममपीतांबरद्वयं॥श्वेतांश्वेतकृष्णवर्णांगांकृष्णलोहमजंक्रमात्॥५५॥स्व

प्राच्यविद्यामन्दिरम् (म.स. विश्वविद्यालयः), वडोदरा

SMT. HANSA ... LIBRARY The M. S. University of Baroda

वसिष्ठसंहिता

द्वितीयो विभागः

२.०.० वसिष्ठसंहितायाः संपादितपाठः १-४६ अध्यायाः

१

२.१.० शास्त्रस्वरूपम्

[१]प्रह्वोऽम्भोजभवामरेन्द्रनिकरस्फूर्जत्किरीटोज्वल-
ज्ज्योत्स्नालीढपदारविन्दयुगलस्तत्त्वस्वरूपो रविः।
ब्रह्माण्डोदरसंस्थिताखिलजगत्तद्ध्वान्तविध्वंसनं
यः कुर्वन्निखिलं जगत्प्रतिदिनं पर्येति कालात्मकः ।।१।।
ज्योतिःशास्त्रं समग्रं प्रथमपुरुषतः स्वर्णगर्भाद्विदित्वा
पूर्वं ब्रह्मा ततोपर्यखिलमुनिगणप्रार्थनाद्यच्चकार।
तच्चेदं सुप्रसन्नं मृदुपदनिकरैर्गुह्यमध्यात्मरूपं
शश्वद्विश्वप्रकाशं ग्रहचरितविदां निर्मलं ज्ञानचक्षुः।।२।।
स्कन्धद्वयं वृत्तविचित्रमर्थगम्भीरमादावधुना यदुक्तम् ।
तत्संहितास्कन्धमिदं तृतीयं वक्ष्ये जगन्मोहननामधेयम्।।३।।
क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः
कालाश्रयास्ते क्रतवो निरुक्ताः।
शास्त्रादमुष्मात्किल कालबोधो
वेदाङ्गतामुष्य ततः प्रसिद्धा।।४।।
छन्दः पादौ शब्दशास्त्रं च वक्त्रं
कल्पः पाणी ज्योतिषं चक्षुषी च।।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं
वेदस्याङ्गान्याहुरेतानि षट् च।।५।।

---

१ व१ आदौ पठितं-विघ्नौघाग्निवारणाय नमः। व२ श्लोकलोपः।
व३ पाठस्याभावः श्लोकतः१-६

वसिष्ठसंहिता

वेदस्य चक्षुः किल शास्त्रमेत-
त्प्रधानताङ्गेषु ततोऽस्य जाता।।
अङ्गैर्युतोऽन्यैः परिपूर्णमूर्ति-
श्चक्षुर्विहीनः पुरुषो न किञ्चित्।।६।।
अध्येतव्यं ब्राह्मणैरेव तस्मा-
ज्ज्योतिःशास्त्रं पुण्यमेतद्रहस्यम्।
एतद्बुद्ध्वा सम्यगाप्नोति यस्मा-
दर्थं धर्मं मोक्षमग्र्यं यशश्च।।७।।
श्रुतिस्मृतिज्ञः पटुरर्थशास्त्रे
शब्दोपदिष्टः कुशलः कलासु।
त्रिःस्कन्धविज्ज्योतिषिकः सुवेषः
कुली सुवृत्तस्त्वगदः सुशीलः।।८।।
शास्त्रस्वरूपग्रहचारमान-
प्रत्येकपञ्चाङ्गफलं क्षणाख्याः।
गोचारसंक्रान्तिनिशीशतारा-
बलोपखेटग्रहकौटभाश्च।।९।।
त्रिःस्कन्धपारङ्गम एव पूज्यः
श्राद्धे सदा भूसुरवृन्दकाद्यैः।
नक्षत्रसूची किल पापरूपो
हेयः सदा सर्वसुधर्मकृत्ये।।१०।।[२]
आधानपुंसवनमष्टममङ्गलं य-
त्संजातकर्मवरनामनवान्नभुक्तिः।
चूडाविधिव्रतविवाहनृपाभिषेक-
[३]यात्राप्रवेशनववास्तुसुरप्रतिष्ठाः।।११।।
गुणदोषयोर्निरूपणमुभयोरपवादमम्बरोत्पातौ[४]।

---

२ व३ श्लोकलोपः

३ व२ लोपः स्वरूप——यात्राप्रवेशन-

वसिष्ठसंहिता

अखिलोत्पातप्रशमनशान्तिकमिश्राख्यपैत्रिकाध्याया: ।।१२।।
पञ्चोत्तरचत्वारिंशद्विपुलाध्यायैर्विराजते स्कन्धः।
अज्ञाज्ञानोपशमनमितरेषां बुद्धिवर्धनं नित्यम्।।१३।।

इति श्रीब्रह्मर्षिवृद्धवशिष्ठविरचितायां संहितायां शास्त्रस्वरूपाध्याय: प्रथम:।।१।।

---

४ व१ मंवरोसतौ

२

२.२.० अर्कचार:

अथार्कचाराज्जगत: शुभाशुभे[५]
न्यूनाधिमासेतरमासनिर्णय:।
उद्वाहसंक्रान्तिदिनार्धनिश्चय:
सर्वप्रपञ्चो भवतीति [६]तद्वशात्।।१।।
मकरादिराशिषट्कमुदगनयनं कर्कटादिगं याम्यम्।
राशिद्वयार्कभोगात्षड्ऋतव: [७]शिशिरादय: क्रमश:।।२।।
चैत्रादिमासेन[८] यथाक्रमेण
मेषादयो द्वादश राशय: स्यु:।
न्यूनाधिमासेषु समागतेषु
चलन्ति तेभ्यो नियतं विनापि।।३।।
सर्वेषु मासेष्वधिमासक: स्या-
तुलादिमासत्रयग: क्षयाख्य:।
संसपर्क: पूर्वभवोऽधिमास:
पश्चाद्भवोऽहस्पतिनामधेय:।।४।।
यस्मिन्दर्शस्यान्तादर्वागेका परा परं दर्शम्।
उल्लङ्घ्य भवति भानो: संक्रान्ति: सोऽधिमास: स्यात्।।५।।
आद्यन्तदर्शयोर्मध्ये तयोराद्यन्तयोर्यदा ।
संक्रान्तिद्वितयं चेत्स्यान्न्यूनमास: स उच्यते।।६।।
मासप्रधानाखिलमेव कर्म
मुक्त्वाखिलं कर्म न कार्यमत्र।

---

५ व१ शुभाशुभं

६ व१ निश्चयात्

७ व१ शैशिरादय:

८ व१ मासेषु

यज्ञोपवासव्रततीर्थयात्रा-
विवाहकर्मादि विनाशमेति।।७।।
[९]दास्रादिऋक्षद्वयगे दिनेशे
वृष्टिर्भवेत्क्षेमकरी जनानाम्।
वह्न्यर्क्षसंस्थे यदि वृष्टिरीति-
र्ब्राह्मद्वये[१०] स्यादतुलं सुभिक्षम्।।८।।
प्रवेशकाले यदि रौद्रभस्य
वृष्टिर्भवेदीतिरनर्घता च।
शेषेषु पादत्रितयेषु भीति-
रत्यल्पवृष्टिर्महती गदा च[११] ।।९।।
आर्द्राप्रवेशेऽह्नि जगद्विपत्तिं
सस्यस्य नाशं कुरुतेऽल्पवृष्टिम् ।
क्षेमं सुभिक्षं निशि सस्यवृद्धिं
सुवृष्टिमत्यन्तजनानुरागम् ।।१०।।
पुनर्वसोर्भाद्दशधिष्ण्यवृन्दे
प्रीतिर्जनानां कलहो[१२] नृपाणाम् ।
मैत्रादिऋक्षत्रितये नराणां
विभावसोः साध्वसमामयश्च ।।११।।
जलाधिदैवर्क्षगते पतङ्गे
विद्युन्मरुद्वारिघनैश्च युक्ते ।
दिनेषु सार्द्धत्रितयेषु पश्चा-
द्रौद्रादिभेषु क्रमशः सुवृष्टिः ।।१२।।
भङ्गोऽस्य पौष्णर्क्षगते दिनेशे

---

९ व१ दस्रादि
१० व१ ब्राह्मद्वयस्थे
११ व१ वा
१२ व१ कलह-

भिन्नेषु रात्रावपि वीक्षणीयम् ।
विश्वादिऋक्षत्रितये [13]यदा स्या-
त्तदा सुभिक्षं त्रिषु वारुणर्क्षात् ।।१३।।
राहोः सुतास्तामसकीलकाद्याः
कबन्धकाकोष्ट्र[14]शृगालरूपाः ।
यदा रवेर्मण्डलगास्तदानीं
मातङ्गभूपाहयभीतिदाः स्युः ।।१४।।
छत्रध्वजे भाङ्कुशगोवृषाश्व-
दण्डास्त्रभद्रासनसिंहरूपाः ।
दृष्टा रवेर्मण्डलगा यदा ते
जगद्विपत्तीतिभयप्रदाः स्युः ।।१५।।
श्वेता द्विजान्घ्नन्ति नृपांश्च रक्ताः
पीताश्च वैश्यानसिताश्च शूद्रान् ।
चमूपतिं चोर्ध्वमुखाश्च रक्ताः
पुरोधसं तेऽपि विचित्रवर्णाः।। १६।।
अधोमुखा धूमनिभाः क्षितीशा-
न्वृष्टिं पिशङ्गाश्च तथाविधास्ते ।
उक्त्वा फलं तामसकीलकानां
फलं ततो मण्डलवर्णतश्च ।।१७।।
लोहितवर्णो ग्रीष्मे लोकानामीतिदः शश्वत् ।
हेमन्ते व्याधिभयं पीतः प्रावृष्यवृष्टिकृत्कृष्णः ।।१८।।
आखण्डलचापनिभो भूपविरोधं परस्परं तत्र ।
यदि पत्रनिभो बर्हेर्द्वादशवर्षं न वर्षति क्षोण्याम् ।।१९।।
शशरक्तनिभो युद्धं राजान्यत्वं विधूपमः सविता ।
श्याममनिभः कीटभयं भस्मनिभो भयदमासुरं जगतः ।।२०।।

---

१३ व१गदः स्यात्ततः

१४ व१ काकोल-

वसिष्ठसंहिता

भानोरुदयास्तसमये चोल्कापतनं महाहवं राज्ञाम् ।
परिवेषयति प्रकटं पक्षं पक्षार्धमेव वा सततम् ।।२१।।
यद्युपसूर्यकमस्यां संध्यायामर्थनाशनं प्रचुरम् ।
क्षितिपतिकलहः शीघ्रं सलिलभयं वा भवेन्नूनम् ।।२२।।
ऋतौ वसन्ते खलु कुङ्कुमाभः
शुभप्रदः कापिलसन्निभो वा ।
आनन्ददस्ताम्रनिभो विवस्वा-
न्यः शैशिरे वा कपिलः [15]सुभिक्षः ।।२३।।
ग्रीष्मे सदा हेमनिभो विचित्र-
वर्णो नृणां क्षेमशुभप्रदश्च ।
अम्भोजगर्भोपमशोभनश्च
प्रावृष्यतीवाखिलसस्यवृद्ध्यै ।।२४।।
रक्तः सूर्यः शरदि विपुला कीर्तिसौभाग्यदश्च
हेमन्तेऽपि त्वखिलजगतः सस्यसंपद्विवृद्ध्यै ।।
ज्ञात्वा चारं दशशतकरस्याखिलं दैववेदी
पश्चात्सर्वं सुशुभमशुभं वादिशेत्कालरूपम् ।। २५।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां रविचाराध्यायो द्वितीयः ।।२।।

---

१५ व१ सुतीक्ष्णः

SMT. HA... LIBRARY • The M. S. University of Baroda

३

२.३.० चन्द्रचारः

अमृतकिरणचारं खेटचारेषु सारं
विपुलनिखिललोकानन्दनं सुन्दरं[१६] च ।
सदसदखिललोकाभोगदं[१७] यत्फलं त-
त्कथितविषमकालज्ञानरूपं[१८] प्रवच्मि ।।१।।
असितचतुर्दश्यन्ते प्रतिमासं चास्तमेति तुहिनकरः[१९]।
सततं दर्शस्यान्ते तुलितौ राश्यादिभिर्नियतम् ।।२।।
विमलः प्रतिपद्यन्त[२०] उदयं[२१] संयाति भास्करान्मुक्तः।
द्वादशभागविवृद्ध्या तिथयश्चन्द्राच्च संभूताः।।३।।
हिमद्युतेरभ्युदितस्य शृङ्गे
याम्योन्नते मेषझषे सुभिक्षम् ।
जनानुरागं वृषकुम्भयोश्च
तुल्ये विषाणे जगतोऽखिलस्य ।।४।।
[२२]सौम्योन्नते जिह्ममृगास्ययोश्च
[२३]मासद्वयं स्वास्थ्यमुपैति लोकः ।
सौम्योन्नते शीतनिभे सुवृष्टिः
क्षेमं सदा कर्कटचापयोश्च ।।५।।

---

१६ व३ सुन्दरीयं
१७ भोगभोगदं वे. पा.
१८ व१, व२, व३ ज्ञानदीपं
१९ व३ हिमकरः
२० वे. द्यन्ते , चौ.संधिलोपः
२१ व२उदयं यदि प्रभाकरान्मुक्तः, व३ उदयातिप्रभाकरान्मुक्तः
२२ व१व२व३ याम्योन्नतो जिह्ममृगाख्ययोश्च
२३ व१ व२ व३ मासद्वयो

सस्याभिवृद्धिर्हरिकीटयोश्च
सौम्योन्नते चापनिभे सुवृष्टिः ।
अनामया वृष्टिरतीव [२४]कन्या-
तुलाद्वयोः शूलनिभे तथैव ।।६।।
एवं क्रमेणाभ्युदितः शशाङ्कः
क्षेमं सुभिक्षं जगतः करोति।
व्यस्तोदितः प्रोक्तफलं समस्तं
करोति नाशं कलहं नृपाणाम् ।।७।।
शृङ्गे[२५] व्रीहियवाकारे वृष्टिः स्यान्महदर्घता ।
तस्मिन्पिपीलिकाकारे पूर्वोक्तफलनाशनम् ।।८।।
विशालशृङ्गे[२६] वृद्धिः स्यादविशाले त्वनर्घता ।
अधोमुखे भूपहानिर्दण्डाकारे नृपाहवः।। ९।।
नाशं ययुर्नृपतयोऽन्तगताः किराता
मन्दे हते हिमकरस्य नवे विषाणे ।
क्षुच्छस्त्रभीतिरतुला निहते कुजे[२७] च
दुर्भिक्षवृष्टिभयमिन्दुसुते हतेऽस्मिन् ।।१०।।
श्रेष्ठा नृपा युधि लयं [२८]ययुरिन्द्रवन्द्ये
शुक्रे हते नियतमल्पनृपाश्च सर्वे ।
[२९]शुक्ले फलं त्वविकलं भवति प्रजानां
पक्षेऽसिते विकलमेति भवेच्च यद्वा ।।११।।
वलक्षपक्षः खलु वर्धते चे-

---

२४ व१ व२ कन्यामासद्वये
२५ शुक्ले वे.पाठभेदः
२६ वे.चौ.शुक्ले
२७ व३ कुजेन
२८ वे.चौ. त्वमरेन्द्रवन्द्ये
२९ वे.चौ.कृष्णे

त्क्षेमाभिवृद्धिः[३०] सततं द्विजानाम् ।
कृष्णे विवृद्धौ यदि शूद्रवृद्धि-
र्व्यत्यासवृद्धौ [३१]स्वफलं तथैव ।।१२।।
विश्वाम्बुमूलेन्द्रविशाखमैत्र-
भानां यदा दक्षिणभागगेन्दुः ।
वह्नेर्भयं [३२]त्वीतिभयं जनानां
करोति दुर्भिक्षमतीव युद्धम् ।।१३।।
अनुक्तभानां यदि याम्यवृत्तिं
करोति वृष्टिं कलहं नृपाणाम् ।
प्रजापतेर्भं यदि पैत्रिभं वा
भिनत्ति चन्द्रोऽन्तकरः प्रजानाम् ।।१४।।
भानां यदा सौम्यगतस्तदानीं
जनानुरागं सततं करोति ।
सदामयाप्रीतिरतीवदुःखं
करोति याम्योपगतश्च भानाम् ।।१५।।
षट् पौष्ण्यभाद् द्वादश रौद्रधिष्ण्या-
त्सुराधिपाद्धानि नव क्रमेण ।
पूर्वार्धमध्यापरभागगेन्दु-
र्भुङ्क्तेऽखिलव्योमचरास्तथैव ।।१६।।
पूर्वार्धधिष्ण्येषु पतिप्रिया स्या-
द्विवाहिता मध्यमभागगेषु ।
परस्परं प्रेम तयोर्नृनार्योः
परेषु भर्ता वनिताप्रियः स्यात्।।१७।।
जघन्यधिष्ण्यानि जलेशसार्प-

---

३० व२ क्षेमातिवृष्टिः, व३ क्षेमातिवृद्धिः

३१ व२ सफलं

३२ व३ चेतिभयं

रौद्रेन्द्रयाम्यानिलदैवतानि ।
अध्यर्धधिष्ण्यान्यदितिद्विदैव-
स्थिराणि शेषाणि समाह्वयानि ।।१८।।
अध्यर्धधिष्ण्येऽभ्युदितः शशाङ्कः
करोति धान्यं महदर्घमन्तम् ।
जघन्यभेऽनर्घमसंशयेन
समर्धमन्येषु च मासि मासि ।।१९।।
ज्ञात्वैवमेवं मणिजीवधातु-
मूलोर्णकर्पूररसादिकानाम् ।
अर्घं वदेज्ज्योतिषिकः प्रजानां
[33]समर्घवस्तूत्तमसंग्रहार्थम् ।।२०।।
एतानि जाघन्यसमाधिऋक्षाण्य-
त्रार्वखण्डे विनियोजितानि।
नोद्वाहजन्मादिषु यत्र चोक्तं
तत्राभिवृद्ध्यै विनियोजनीयम् ।।२१।।
प्रालेयकुन्दकुमुदामलपुण्डरीकशङ्ख-
प्रतप्तरजतामलवज्रकान्तिः[34]।
एवंविधोऽभ्युदितशीतकरः प्रजानां
क्षेमं सुभिक्षमतुलं कुरुतेऽत्र मासे ।।२२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां चन्द्रचाराध्यायस्तृतीयः ।।३।।

---

३३ व३ समस्तवस्तूत्तमसंग्रहार्थम्

३४ व२ प्रतप्ततामलवनति

४

२.४.० भौमचारः

यस्माद्विना भूमिसुतस्य चारं
शुभाशुभं यज्जगतः सुसम्यक् ।
न ज्ञायते ज्ञानमनुत्तमं त-
त्तस्मात्प्रवक्ष्यामि समासतोऽत्र ।।१ ।।
स्व[३५]स्वोदयर्क्षान्नवमेऽष्टमे वा
सप्तर्क्षके वा क्षितिजे[३६] प्रतीपम्[३७] ।
तद्वक्रमुख्याह्वयमेव तत्र
वह्नेर्भयं व्याधिभयं जनानाम् ।।२ ।।
एकादशे द्वादशभे प्रतीपे
दशर्क्षगेवाश्रुमुखं प्रतीपम् ।
तत्राश्रुवक्त्रेऽर्घविवृद्धिपूर्वं
रसादिकं नाशमुपैति नूनम् ।।३ ।।
त्रयोदशर्क्षेऽपि चतुर्दशर्क्षे
वक्रे कुजे व्यालमुखाभिधानम् ।
तेभ्यो भयं तत्र सुवृष्टिसस्य-
समृद्धिरर्घं च जनानुरागम् ।।४ ।।
प्रतीपगे [३८]पञ्चदशेऽथ धिष्ण्ये
धरासुते षोडशधिष्ण्यके च ।
रक्ताननं नाम भवेत्तु तत्र

---

३५ वे.,चौ. स
३६ वे.चौ. विचरेत्
३७ १,व३ प्रतीपे
३८ व२ पञ्चदशैव

सुभिक्षमत्यामयशत्रुवृद्धिः ।।५।।
अष्टादशे सप्तदशे प्रतीपे
निस्त्रिंशपूर्वं मुशलाह्वयं च ।
तत्रार्घभीतिः क्षितिपालकानां
युद्धे क्षयं यान्ति समस्तलोकाः ।।६।।
भूमिसुतः फाल्गुन्योरुदयं कृत्वाथ वक्रितो वैश्वे ।
प्राजापत्येऽस्तमितः करोति निखिलधराभ्रमणम्[३९] ।।७।।
अभ्युदितः श्रवणर्क्षे पुष्ये वक्रं गतो [४०]धरातनयः ।
निखिलधराधिपवर्गप्रलयकरः प्रतिदिनं प्रजानां च ।।८।।
अभ्युदितः पितृधिष्ण्ये तस्मिन्नेव प्रतीपगः क्षितिजः ।
पीडां क्षितिपतिमरणं करोति कलहं क्षितीशानाम् ।।९।।
यस्मिन्दिग्द्वारनक्षत्रे क्षितिजोऽभ्युदयं गतः ।
तद्दिगीशस्य [४१]मरणं यदि तेषु प्रतीपगः ।।१०।।
भिनत्ति योगतारां च पितृधातृभयोः कुजः ।
तदा भूपाहवैर्भुमिर्नूनं भ्रमति चक्रवत् ।।११।।
विशाखाविश्वधिष्ण्यान्त्यभानां याम्यचरः कुजः ।
दुर्भिक्षवृष्टिभयकृदाहवे भुवि भूभुजाम् ।।१२।।
शुभदः सर्वधिष्ण्यानां सौम्यमार्गचरः कुजः ।
अरिष्टफलदः सर्वजन्तूनां याम्यमार्गगः ।।१३।।
मेषसिंहझषचापभसंस्थे
वक्रिते क्षितिसुते [४२]रविजे वा ।
गोनराश्वगजपक्षिसमूहं

---

३९ वे. मरणम्—पाठभेदः
४० व१, व२ क्षमातनयः
४१ व३ भयदा यदि तेषु प्रतीपगः
४२ व१ वा शनौ

नाशमेति निखिलं च दलं वा ।।१४।।
अशोकबन्धूकमणिप्रवाल-
सन्तप्तताम्रामलकिंशुकाभः ।
एवंविधः सन्नुदितो महीजः
शुभाय वृद्ध्यै भवति प्रजानाम् ।।१५।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां कुजचाराध्यायश्चतुर्थः ।।४।।

५

२.५.० बुधचारः

बुधोदयः सर्वजगद्विपत्त्यै
भवेत्कदाचिद्भृशमन्यथा वा ।
वृष्ट्यर्घवाय्वग्निभयप्रदश्च
तेभ्यो भयं कुत्रचिदन्यथा वा ।।१।।
पुरन्दरश्रीपतिवैश्वदेव-
वसुस्वयम्भूडुषु चन्द्रसूनुः ।
चरन्करोति प्रचुरार्घवृष्टिं
नृपाहवाद्भीतिमतीवपीडाम् ।।२।।
आर्द्रादितिज्याहिमघासु भेषु
चरन्प्रजानामतुलां च पीडाम् ।
करोति शीतांशुसुतो बलीया-
न्क्षुच्छस्त्रवृष्ट्यामयशत्रुभिश्च ।।३।।
हस्तद्वयस्वातीविशाखमैत्र-
सुरेशधिष्ण्यानि हि पीडयन्बुधः ।
करोति तैलाज्यरसादिवस्तु[४३]-
समृद्धिदस्तत्र गवादिपीडाम् ।।४।।
हौतभुगजपादार्यमयाम्यर्क्षेषु शीतदीधितेस्तनयः ।
अतिविपुलकरोत्यग्निं घ्नन्देहभृतां सप्तधातुविकलकरः ।।५।।
वारुणनैर्ऋतपौष्णान्नुपमृद्नन् साश्विनानि [४४]चन्द्रसुतः ।
सलिलजभेषजतुरगक्रयविक्रयजीविनां च नाशकरः ।।६।।
[४५]विशदं त्वाहिर्बुध्न्यभमेकं चन्द्रात्मजो विमृद्नीयात् ।

---

४३ वे.पा. वस्त्र-

४४ व३ चन्द्रसूनुः

विपुलामयशस्त्रभयं क्षुद्भयमतुलं प्रजानां च ।।७।।
प्राकृतमिश्रसंक्षिप्ततीक्ष्णयोगान्तिकघोरपापाश्च ।
सप्तविधा गतिभेदा हिमकरतनयस्य विविधफलदाः स्युः ।।८।।
अनिलानलकमलजयमधिष्ण्यैः स्यात्प्राकृताभिधानगतिः ।
पितृशशिशंकरभुजगैर्धिष्ण्यैर्गतिरपरा मिश्रसंज्ञा च ।।९।।
[४६]भाग्यद्वितयादितिभद्वितयैः संक्षिप्रसंज्ञिका विपुला ।
भाद्रपदद्वयवासवभद्वितयैश्च विमलतीक्ष्णाख्या ।।१०।।
योगान्तिकगतिरतुला नैर्ऋतमारम्भत्रितये ।
श्रवणत्रितयं त्वाष्ट्रभमृक्षचतुष्कं च घोरसंज्ञा सा ।।११।।
दिनकरमित्रविशाखाभत्रितयं भवति पापरूपाख्या ।
प्राकृतगत्यां राजप्रवृद्धिरारोग्यसस्यवृद्धिः स्यात्।।१२।।
मित्रविरोधः सततं भवति तयोः क्षिप्रमिश्रयोर्गत्योः।
अपरासु गतिषु नियतं विपरीतं भवति सर्वजन्तूनाम् ।।१३।।
विकला ऋज्व्यनुवक्रा वक्राख्या बोधनस्य गतिभेदाः ।
विविधफलं तासु करोत्यविकलमेवं बलीयांश्चेत् ।।१४।।
शस्त्रभयामयजननी विकला ऋज्वी च देहिनां शुभदा ।
[४७]अर्थविनाशनकरी त्वनुवक्रा भूपयुद्धदा वक्रा ।।१५।।
आषाढमासद्वितये सपौषे
वैशाखमासे यदि चन्द्रसूनुः ।
दृष्टः करोत्यामयराजपीडां
विवर्षणं तस्करभीतिमुग्राम् ।।१६।।
माणिक्यशङ्खकनकामलपुष्पराग-

---

४५ व२ दिवि
४६ व२-उपरितनभाग उल्लेखः - पूर्वा फा. उत्तरा पुर्नवसु पुष्य
पार्श्वभाग उल्लेखः - पूर्वाभा, उत्तरा भा धनि. शतभा
४७ वे. अर्घ

कुन्देन्दुसन्मरकतोपमशुद्धकान्तिः।
स्निग्धः शशाङ्कतनयः प्रचुरार्घदश्च
[४८]लोकेऽन्यमूर्तिरुदितो भयरोगकृत्सः ।।१७।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां बुधचाराध्यायः पञ्चमः।।५।।

४८ व३ श्लोकस्य चतुर्थपादलोपः

६

२.६.० गुरुचारः

मासेषु चोर्जादिषु कृत्तिकादि-
द्वयं द्वयं च क्रमशोऽश्विभात्स्यात्।
त्रिभान्नभस्येषतपस्यमासाः
शुक्लान्तयुक्तर्क्षवशादजस्रम् ॥१॥
उदेति धिष्ण्येन सुरेन्द्रमन्त्री
तेनैव तन्नाम भवेत्तु वर्षम् ।
ज्ञेयानि तत्कार्तिकपूर्वकाणि
भवन्ति तेषां च फलं च सम्यक् ॥२॥
सितरक्तहरितपीतद्रव्याणां वृद्धिरतुला स्यात् ।
शकटकृषीवलवणिजां पीडा स्यात्कार्त्तिके वर्षे ॥३॥
सौम्येऽब्दे सस्यानां भयमीतिभ्यो निरन्तरं जगति ।
पौषे निवृत्तवैरा राजानो व्याधिपीडितास्त्वपरे ॥४॥
माघे सस्यविवृद्धिर्महदर्घं कर्म पौष्टिकं प्रचुरम् ।
सुरपितृपूजावृद्धिर्भवति जनानां हार्दितो भीतिः ॥५॥
फाल्गुनमासे वृद्धिः क्वचित्क्वचित्तद्वदर्घसस्यानि ।
जन्तूनामारोग्यं परस्परं हन्तुमुद्यता भूपाः ॥६॥
चैत्रे स्त्रीजनहानिः क्रोधवशा भूमिपालकाः सर्वे ।
क्षेमं सुभिक्षमतुलं प्रीतिर्द्विजसाधुजन्तूनाम् ॥७॥
द्विजपशुसज्जनवृद्धिर्वैशाखे शान्तिसंयुताः[४९] सर्वे ।
अध्वरनिरताः सर्वे भूसुरनिकराश्च सस्यसम्पूर्तिः॥८॥
ज्येष्ठेऽब्दे निखिलजनाः स्वे स्वे कर्मप्रवर्तका जगति ।
सततं ज्ञातिषु वैरं कुर्वन्त्यवनीश्वरा न तथा ॥९॥

---

४९ व३ नाशतां ययुस्त्वन्ये

आषाढेऽब्दे प्रचुरं पीड्यन्ते सर्वसस्यानि ।
कृमिकीटादिभिरतुलं त्वपरं सस्यं च वृद्धिमाप्नोति ।।१०।।
श्रावणवर्षे क्षेमं सस्यान्यखिलानि पाकमुपयान्ति ।
राजक्षोभैरतुलं निखिलजनाः पीडिताः सततम् ।।११।।
भाद्रपदेऽब्दे [५०]षण्ढास्तद्भक्ता ये च ते निपीड्यन्ते ।
पूर्वं यत्सस्यं च निखिलं निष्पत्तिमुपयाति ।।१२।।
अश्वियुजेऽब्दे वृष्टिर्भवति जनानां[५१] निरामयं क्षेमम् ।
अपरं सस्यं न स्यात्कुत्रचिदीतिः प्रजापीडा ।।१३।।
भानां यदा सौम्यगतिः सुरेज्य-
स्तदा जनानामभयप्रदः सः ।
व्याधिप्रदो दक्षिणमार्गगामी
भूदेवभूमीश्वरनाशदश्च ।।१४।।
वह्नेर्भयं वह्निसमानवर्णः
पीतश्च रोगं हरितोऽरिभीतिम् ।
श्यामस्तु युद्धं सततं करोति रक्तः
क्षितीशद्विजकामपीडाम् ।।१५।।
वृष्टेर्भयं धूमनिभः पिशङ्गस्त्वीते-
र्भयं कांस्यनिभोन्नभीतिम् ।
क्षिप्रं नृपस्यान्तकरो ह्यदृष्ट-
श्चित्रो विचित्रं क्षितिपालयुद्धम् ।।१६।।
वह्निभाद्द्वितयमब्दशरीरं
नाभिरस्य जलवैश्वदैवभम् ।
सार्थभं हृदयमन्तरात्मकं
पैतृभं विकसितं सुमनश्च ।।१७।।
क्रूरग्रहे चास्य शरीरसंस्थे

---

५० वे.चौ.षण्डा
५१ वे. चौ. च नाना

वह्वेर्भयं वायुभयं च तत्र।
नाभिस्थितेऽनर्घभयं प्रभूतं
हृदि स्थिते सस्यभयं जनानाम् ।।१८।।
[५२]पुष्पे स्थिते मूलफलं विनाशं
वक्रग्रहस्थे फलमुग्रमेतत् ।
सौम्यग्रहेष्वेषु च संस्थितेषु
सर्वं शुभं मिश्रफलं च मिश्रैः ।।१९।।
सुरेज्ययाता भगणाः श्रुतिघ्नां
नखैरवाप्ताः श्रुतिरामहीनाः।
विभाजिताश्चामरवर्त्मतर्कैः
शेषाः स्युरत्र प्रभवादयोऽब्दाः ।।२०।।
प्रभवो १ विभवः २ शुक्लः ३ प्रमोदो ४ऽथ प्रजापतिः५ ।
अङ्गिराः ६ श्रीमुखो ७ भावो ८ युवा ९ धाता १० तथेश्वरः ११ ।।२१।।
बहुधान्यः १२ प्रमाथी च १३ विक्रमो १४ वृषवत्सरः १५ ।
चित्रभानुः १६ सुभानुश्च १७ तारणः १८ पार्थिवो १९ व्ययः २० ।।२२।।
सर्वजित् २१ सर्वधारी च २२ विरोधी २३ विकृतः २४ खरः २५।
नन्दनो २६ विजय २७ श्चैव जयो २८ मन्मथ २९ दुर्मुखौ ३० ।।२३।।
हेमलम्बी ३१ विलम्बी ३२ विकारी ३३ शार्वरी ३४ प्लवः ३५।
शुभकृ ३६ च्छोभकृ ३७ त्क्रोधी ३८ विश्वावसु ३९ पराभवौ ४० ।।२४।।
प्लवङ्गः ४१ कीलकः ४२ सौम्यः ४३ साधारण ४४ विरोधकृत् ४५ ।
परिधावी ४६ प्रमादी ४७ स्यादानन्दो ४८ राक्षसो ४९ नलः ।।५०।।
पिङ्गलः ५१ कालयुक्तश्च ५२ सिद्धार्थो ५३ रौद्र ५४ दुर्मती ५५ ।
दुन्दुभी ५६ रुधिरोद्गारी ५७ रक्ताक्षी ५८ क्रोधनः ५९ क्षयः ६० ।।२६।।
अब्दैर्युगं पञ्चभिरब्दषष्ट्या
युगानि च द्वादश वै भवन्ति ।

---

५२ वे.चौ. मनः

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

पञ्चाब्दनाथा: क्रमशो युगस्य
वह्न्यर्कचन्द्राब्जजशंकरा: स्यु: ।।२७।।
कृष्ण: सूरिस्त्विन्द्रो ज्वलनस्त्वष्ट्रा चाहिर्बुध्न्य: पितर: ।
विश्वे चन्द्रस्त्विन्द्रो दहनस्त्वश्विन्याख्यो भगस्त्वपर: ।। २८।।
अब्दे प्रवृत्ते प्रभवेऽग्निकोप:
सन्तीतय: पैत्तकफाश्च रोगा: ।
स्तोकं जलं मुञ्चति वारिवाह:
सदा प्रमोदन्ति जनाश्च सर्वे ।।२९।।
वृष्टि: प्रभूताखिलसस्यवृद्धि-
र्जनानुरागं विभवे प्रवृत्ते।
अन्योऽन्ययुद्धै: क्षितिपालकानां
न दु:खमाप्नोति [५३]जनस्तथापि ।।३०।।
अन्योन्यरत्यातिशयादजस्रं
रामा: प्रपञ्चे रमयन्ति रामान् ।
गोधूमशालीक्षुमती धरित्री
निवृत्तवैरा भुवि शुक्लवर्षे ।।३१।।
प्रमोदवर्षे सुजना नृपाश्च
मोदन्ति [५४]पापाभिरता: [५५]सचौरा:।
सीदन्ति पृथ्वी बहुसस्यपूर्णा
विवैरिण: सर्वजना धरित्र्याम् ।।३२।।
गाव: प्रभूतपयस: सकला धरित्री
मेघैर्विसृष्टसलिला परिपूर्णवप्रा ।
आरामसंवृत्तपुरौघविचित्रिताङ्गी
तुष्टा: प्रजापतिवरे परिपूर्णलोका: ।।३३।।

---

५३ व३ जनश्च सर्वे
५४ व१पापानिहता,व३ पापानि हता स्म वैरा
५५ व१,व२ सवैरा

धात्री सुरप्रवरयज्ञवरौघपूर्वैः
पूर्णातिरम्यपुरसंघविचित्रिताङ्गी ।
अब्दे यदाङ्गिरसि भूरिजनैर्विकीर्णा
शश्वत्सुवृष्टिनिकरैश्च तडागपूर्णा ।।३४।।
विचित्रसस्याम्बरचित्रवर्णा
गुल्मस्तनी पूर्णतडागपूर्णा ।
[५६]क्रीडावनोद्यत्फलपुष्पवक्त्रा
भूः श्रीमुखेऽब्दे वनितेव भाति ।।३५।।
वापीकूपतडागपूर्तिरतुला स्वस्थाः क्षितीशाः क्षितौ
देवस्पर्धिजनैः सुसस्यनिकरैर्नानाविधैराकरैः ।
धात्री भाति निरन्तरं शुकपिकश्रीकण्ठपुंस्कोकिल-
[५७]भ्राजत्षट्पदनादमण्डितवनैर्भावाह्वयेऽब्दे सदा ।।३६।।
प्रकीर्णकामाः प्रमदा युवेऽब्दे
गोधूमशालीक्षुफलैर्नियुक्ता ।
चौरामयव्यालभयं प्रभूतं
तथापि नन्दन्ति न दुःखमेति।।३७।।
अब्दे विधातुः सकला धरित्री
प्रदायिनी [५८]सर्वजनेच्छितार्थान् ।
भूदेवभूभृन्निकराश्च सर्वे
मखक्रियाद्युत्सवतत्पराः स्युः।।३८।।
पोषयतीश्वरवर्षे धात्री धात्रीव निखिलजनान् ।
धात्रीपतयः सर्वे क्षुभ्यन्त्यनिशं परस्परं [५९]क्षोभात् ।।३९।।
बहुधान्याब्दे सततं बहुधान्यायुतं धरातलं निखिलम् ।

---

५६ वे.,चौ. वनाढ्या
५७ व३ भ्राजत्षड्वदनादमंडितवनैः
५८ व३ सर्वजनेप्सितार्थान्
५९ व१,व२ क्षौभा

पित्तकफानिलजाता बहुधा रोगास्तथाविधास्तत्र ।।४०।।
निखिला धरणी सहिता रथतुरगगजादिभिर्बहुभिः ।
कुत्रचिदर्घं प्रचुरं न कुत्रचिद् घनरसं प्रमाथ्यब्दे ।।४१।।
अनुपमविक्रमधरणीनाथैराक्रान्तवसुमती सकला ।
विक्रमवर्षे सुजना वर्धन्ते विक्रमैः स्वैः स्वैः ।।४२।।
वृषभनिभा वृषभाब्दे क्षितिपतयः सप्रजाः स्वस्थाः।
[६०]बहुविधसस्यसमृद्धिः कृषिजनमतवृष्टिरतुला स्यात् ।।४३।।
नानाविधैः सस्यविचित्रिता भू-
विंचित्रभानौ भुवि चित्रवृष्टिः।
अन्योन्ययुद्धैः क्षितिपालकानां
कपालकेशास्थिकबन्धचित्रा[६१] ।।४४।।
सुभानुवर्षे प्रतपत्यजस्रं
भानुः क्षितिर्मध्यमसस्ययुक्ता ।
शस्त्राग्निकोपैः प्रचलन्ति मर्त्या-
स्तथापि नो भीतिमवाप्नुवन्ति ।।४५।।
तरन्ति दुःखान्यपि तारणाब्दे
जनाः प्रमोदन्ति सुपुत्रमित्रैः ।
यथेप्सितं वर्षति जम्भभेदी
तथापि सीदत्यपरं च सस्यम्।।४६।।
ये पार्थिवेन्द्रा विलयं ययुस्ते
युद्धेषु सर्वे सुखिनः पुरे स्युः।
मुञ्चन्ति तोयं प्रचुरं पयोदा
भीतिर्ज्वरेभ्यः[६२] खलु पार्थिवेऽब्दे ।।४७।।

---

६० व३ बहुधा सस्यसमृद्धि
६१ व२ कबन्धविचित्रा
६२ व३ र्जलेभ्य

व्ययान्विताः सर्वजना व्ययाब्दे
        निरन्तरं वारिमयी धरित्री ।
धर्मप्रसक्ताः खलु पार्थिवेन्द्राः
        सीदन्ति ये पापपराः सचौराः ।।४८।।
सर्वजिदब्दे निखिलं जगत्सदानन्दसुन्दरोपेतम् ।
भूभुजनिकरविकारैः प्रकटितबहुदुःखतामेव ।।४९।।
वारिधरा वारिचयं मुञ्चत्यल्पं क्वचित्क्वचिद्बहुलम् ।
अवनीपालकसंयतिनिस्खलिता भूश्च सर्वधार्येऽब्दे ।।५०।।
भूपसंक्षोभसम्भूतमरिभीतिभुजः प्रजाः ।
सर्वस्वापहताश्चौरैर्विरोध्यब्दे विदेशगाः।।५१।।
प्रकृतिः प्रयाति विकृतिं विकृतिरपि प्रकृतिमायाति ।
वर्षे विकृते सुजना निशाचरार्घप्रदा धरणी ।।५२।।
नृपाः खराऽब्दे भुवि विक्रमेण
        सापत्न्यराष्ट्रान्प्रचलन्ति हन्तुम् ।
रथेभपत्यश्वबलैर्वृताऽस्ते
        धात्री जनानन्दफलप्रदा स्यात् ।।५३।।
आनन्ददा सुन्दरनन्दनाब्दे
        सम्पूर्णसस्यामितवारिवाहैः ।
फलैर्विचित्रामितपुष्पवृन्दै-
        र्धरात्यसस्यादिफलं [६३]विनष्टम् ।।५४।।
अतुलबलसमृद्धं पार्थिवेन्द्रस्य चक्रं
        पुरविषयहयादीन्हन्तुमुद्यच्च नित्यम् ।
प्रचलति भुवि चैवं तेऽपि सर्वे चलन्ति
        क्षितिरपि विजयाब्दे सस्यसम्पूर्णरम्या।।५५।।
यस्मिञ्जयाब्दे विरलार्घसस्या

---
६३ व३ निविष्टं

बलाधिका गोऽजवृषाश्वनागाः ।
[६४]तथा धराधीशमहारणैश्च
सीदन्ति गौडाः खलु गुर्जराश्च ।।५६।।
जृम्भन्ति सर्वे विविधान्नपानैः
कामोपचारैः पशवो मृगाश्च ।
ते मन्मथाब्दे शबराः सचौराः
सीदन्ति संन्यासिजना [६५]ह्यलब्धाः ।।५७।।
सुदुर्मुखाब्दे प्रलयं प्रयान्ति
सस्यार्घधात्रीपतिमुख्यविप्राः[६६] ।
प्रव्राजकव्रातकिरातचौरा
लैङ्ग्याश्च सर्वे खलु वर्धयन्ति ।।५८।।
धरामरा गोकुलराजवृन्दा
धर्मप्रसक्ताः खलु हेमलम्बे ।
सीदन्ति सर्वे विरलार्घसस्यै-
रवृष्टिभिः क्षुद्भयपीडिताश्च ।।५९।।
विलम्बिवर्षे त्वरिवृन्दरोगैः
स्वल्पार्घवृष्ट्युद्धतचौरसंघैः ।
निस्वाः प्रजाः सत्त्वविहीनमान-
विदेशगाः स्वोदरपूरणाय ।।६०।।
स्तोकं जलं मुञ्चति वारिवाह-[६७]
स्तथापि नानाविधसस्यपूर्णा।
विकारिवर्षे निखिला जनास्ते
जीवन्ति नानाविधवृक्षमूलैः ।।६१।।

---

६४ वः तथा शब्दस्य लोपः
६५ वः अलैंग्या
६६ वः विप्रमाख्या
६७ वः मैघसंघ-

शार्वरीशरदि भाति मेदिनी
पूर्णसस्यजनवृन्दसङ्कुला ।
अध्वरोत्सुकधरामरपूर्णा
धर्ममार्गरतभूपकुलैश्च ।।६२।।
शुभकृच्छरदि विभाति [68]क्षितिरतुलैर्मखमहोत्सवैः[69] सततम् ।
नीतिपथक्षितिपतिभिर्बहुविधसस्यार्घवृष्टिभिः सकला ।।६३।।
शोभकृति क्षितिपतयो जृम्भन्ते विविधसैन्ययुताः ।
क्षितिपि भाति सुपुष्पितफलितवनारामतोयांशैः ।।६४।।
प्लववर्षे निखिलजनाः स्थलजलभवपण्यजीविनस्तत्र ।
बहुवृष्टिभिरखिलधरा प्लवसदृशा भवति जलमध्ये ।।६५।।
क्रोधिनि शरदि निरन्तरक्षितिपतिकलहैर्विहीनधनाः।
फलमूलाशनवशगास्तथापि लोकाश्च वर्धन्ते ।।६६।।
विश्वावसौ विविधसस्ययुता धरित्री
नानाकरैः प्रचुरतोयदमेघवृन्दैः ।
नानाविधक्रतुवरेषु विचित्रनादै-
र्भात्यङ्गवङ्गमगधा निहिताश्च चौरैः ।।६७।।
परिभवजनितक्लेशैर्निःसाराः सप्रजाः क्षितिपाः ।
अतुलितसस्यसमृद्धां भूमिं भुक्त्वा पराभवाब्देऽपि ।।६८।।
अब्दे प्लवङ्गे प्रमदाजनास्तु
कुर्वन्ति वैरं पुरुषेषु नित्यम् ।
धराधिपक्षोभविघट्टिताभू-
स्तदा न सम्पूर्णफलप्रदायिनी ।।६९।।
अवृष्टिचौराहवरोगवह्नि-
भीतान् जनान्वीक्ष्य सुकीलकाब्दे ।

---

६८ व३ क्षिति तः— तः श्लोक ६६ प.लोपः

६९ व३ र्मखमहोत्सवै

भूर्जीवयामीति कथं विचार्य
विचित्रनानाकरदा च तेभ्यः ।।७०।।
सुवृष्टिसस्यार्घधरा विभाति
धर्मप्रसक्तक्षितिपोत्सवाद्यैः ।
स्वमार्गसंसक्तजनैरजस्रं
सौम्याह्वयाब्दे प्रविनष्टदोषैः ।।७१।।
विविधामयचोरभयं मध्यमवृष्ट्यर्घसस्यभयम् ।
भुवि साधारणवर्षे निखिलजनानां च चोरभयम् ।।७२।।
[७०]कलहो निखिलजनानामीतिभयं स्याद्विरोधकृद्वर्षे ।
धरणी सस्यसमृद्धाप्यविकलफलदायिनी सततम् ।।७३।।
शुभफलदा परिधाविन्यतुलितबहुसस्यवृद्धिः स्यात् ।
निखिलधरामयरहिता मध्यमदेशस्य नाशः स्यात् ।।७४।।
सस्यानामीतिभयं क्षुद्भयमखिलप्रजानां च ।
चोरभयं धनिकानां राजभयं च प्रमाद्यब्दे ।।७५।।
आनन्ददः स्थावरजङ्गमाना-
मानन्दवर्षे विविधान्नपानैः ।
तत्रातिरोगैर्विलयं [७१]प्रयान्ति
कलिंगवङ्गा खशमाहिषाश्च ।।७६।।
रथाश्वहेमाम्बरलोहकारा
वृद्धिं प्रयान्त्याकरजीविनश्च ।
विप्राः क्षितीशाः सुजनाः सुवृत्ता
ये राक्षसाब्दे प्रभवन्ति निस्वाः ।।७७।।
यस्मिन्नलाब्दे विलयं प्रयान्ति
मृगाश्च पक्षिव्रजकोकिलाश्च[७२] ।

---

७० व१,व२ कलह
७१ व३ ययुस्ते
७२ व२ पक्षिव्रजवाजिनश्च

अन्ये च सर्वे नरगोकुलाद्या:
प्रयान्ति वृद्धिं खलु मध्यदेशा: ।।७८।।
ईतिभयं चोरभयं पिङ्गलवर्षे भवेन्न[७३] शत्रुभयम् ।
स्तोकजलं निखिलभुवि द्विजसज्जनवैरमन्योन्यम् ।।७९।।
कालयुगाब्दे सन्ततं विवैरिणा: सर्वधात्रीशा: ।
अध्वरनिरता विप्रा: क्वचित्क्वचिच्चौरवह्निभयम् ।।८०।।
सुधातलमखिलं यद्बहुविधधान्यार्घसम्पूर्णम् ।
विविधामयसर्पभयं वर्षे सिद्धार्थिसंज्ञे च ।।८१।।
युध्यन्ति क्षितिपतय: परस्परं हन्तुमुद्यता: सर्वे ।
कोङ्कणदेशक्षितिपतिनिधनं तत्रैव रौद्राब्दे ।।८२।।
दुर्मतिवर्षे वर्षति पर्जन्य: सततमम्बुधाराभि: ।
निखिलजनानां हाटकमखिलं गृह्णन्ति कितवचौराश्च ।।८३।।
दुन्दुभिवर्षे सततं विविधोत्सवनादपूरिता धरणी ।
विविधफलसस्यपूर्णा विविधामयसंयुता नूनम् ।।८४।।
युद्धे भटप्रतिभटास्त्रविखण्डितानां
रक्तं पिबन्त्यनुदिनं वसुधाधिपानाम् ।
यस्मिन्सदा रुधिरमुद्गिरति प्रवर्षे
तस्मिन्सदा विरलसस्ययुता धरित्री ।।८५।।
रक्ताक्षिवर्षे सततं महीशा:
परस्परं क्रोधपरा न योधा: ।
विश्वम्भरा चोत्तमसस्यपूर्णा
क्वचित्तदा नैव मही न सस्या ।।८६।।
गोधूमशाल्यादिवरेक्षुवाट-
नानाविधोद्यानतडागवप्रै:।
तै: क्रोधनाब्दे सकला धरित्री

---

७३ व३ भवेच्च शस्त्रभयं

तथा न सन्तोषकरी जनानाम् ।।८७।।
नरानजानश्वखरोष्ट्रपक्षि-
मृगांश्च नागाखिलभूतराशीन् ।
त्रिभागशेषं कुरुते क्षयाब्दे
मही त्वनावृष्टिनृपाहवैश्च ।।८८।।
मेषगते सुरसचिवे मेषविनाशो भवेदचिरात् ।
अतुलितसस्यसमृद्धिः क्षितिपतिकलहः प्रजायते क्षोभः ।।८९।।
शिशुपशुवनितानिचयो विलयं यान्ति द्वितीयगे जीवे ।
क्षितिपतिकलहैः सततं मध्यमसस्यार्घदा धरणी ।।९०।।
कलहरतक्षितिपतयो वारिधराश्चापि कुत्रचिज्जलदाः ।
सस्यानां भवति भयं त्वाङ्गिरसे मिथुनराशिस्थे ।।९१।।
अतुलितसस्यसमृद्धा भवति धरा वारिदाः पयोवाहाः ।
निवसति कर्कटराशौ प्रभूतपयसस्तदा गावः ।।९२।।
विलयं यान्त्यवनीशाः संयति सुजनावनीसुरा निस्वाः।
अनुपमवृष्टिभिरखिलं धरातलं वारिपूरितं हरिगे ।।९३।।
अतुलितविभूतिसहिताः क्षितिपतयः सप्रजा नियतम् ।
भूसुरनिकराः सततं वाध्वरनिरता भवन्ति युवतिस्थे ।।९४।।[७४]
तुलयोद्धतवस्तुचयं दुर्ल्लभमखिलं तुलागतेऽङ्गिरसि ।
सुलभं त्वितरद्रव्यं तूत्तमसस्यार्घवृद्धिः स्यात् ।।९५।।
बहुवृष्टिभिरखिलधरा बहुविधधान्यार्घसम्पूर्णा ।
वृश्चिकराशौ जीवे सर्वे सुखिनोऽन्त्यजातिविलयः [७५]स्यात् ।।९६।।
संकरशबरनिशाचरनिधनं सुखिनः परे गुरौ धनुषि ।
अचलाचलसदृशाम्बुदनिकरैः सम्पूर्णवारिमयी ।।९७।।
गुरौ मृगस्थेऽम्बुधराः प्रकामं
वर्षन्ति [७६]वाप्यौघतडागपूर्णा ।

---

७४ व२ पूर्णश्लोकस्य लोपः

७५ व३ स्यात् शब्दस्य लोपः

शरीरिणां स्थावरजङ्गमाना-
मानन्ददाभीष्टफलैर्धरित्री ।।९८।।
विवैरिणाः सर्वधराधिनाथाः
सीदन्ति पापाश्च कलिङ्गगौडाः।
कुम्भस्थिते देवगुरौ धरित्री
पुष्पैः फलैरुत्तमसस्यरम्या ।।९९।।
नानाविधोद्यानतडागसस्य-
महोत्सवानेकमखक्रियाद्यैः ।
मीनस्थिते देवगुरौ धरित्री
रम्या क्षितीशाः सुखिनः प्रजाश्च ।।१००।।
कुन्देन्दुशङ्खस्फटिकप्रवाल-
नीहारमुक्ताफलसन्निभाभः ।
एवंविधो देवगुरुर्जनानां
शुभप्रदः क्लेशनिवारकश्च ।।१०१।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां गुरुचाराध्यायः षष्ठः ।।६।।

---

७६ व३ धान्यौघतडागपूर्णा

७

२.७.० शुक्रचारः

मध्यमरेखानियतं गोवीथिर्भवति मध्यरेखातः ।
वृषभैरावतगजनागाख्या वीथयः कुबेरादिग्भागे ।।१।।
दक्षिणतोऽपि जरद्गवमृगाजदहनाश्च नवभेदाः।
वीथेरेकैकस्यार्क्षत्रितयं क्रमेण धिष्ण्यानि ।।२।।
दिनकरधिष्ण्यात्त्रितयं गोवीथिगतं द्विदैवधिष्ण्यातः ।
द्वादश भानि क्रमशो दक्षिणवीथेश्चतुष्टयस्थानि ।।३।।
आश्विनभादिद्वादशधिष्ण्यान्युत्तरवीथेश्चतुष्टयस्थानि ।
अथ कथयामि नवानां वीथीनां फलानि तान्यधुना ।।४।।
नागवीथिविचरन्भृगोः सुतः
पश्चिमदिशि च वृष्टिनाशकृत् ।
क्षेमकृत्सुखकरो गजवीथ्या-
मर्घवृद्धिमतुलां [७७]करोति सः ।।५।।
शालीक्षुगोधूमयवादिसस्य-
सम्पूर्णधात्री नितरां विभाति ।
ऐरावतोक्षाह्वययोश्च वीथ्योः
स्थिते सिते संयति राजनाशः ।।६।।
गोवीथिगे दैत्यपुरोहिते भू-
र्विभाति नानाविधसस्यवृद्ध्या ।
जरद्गवायां मृगसंज्ञितायां
मध्यार्घवृष्टिर्महदाहवश्च ।।७।।
क्षितीशसंग्रामजभीतिरीतिर्वह्ने-
र्भयं वारिभयं जनानाम् ।

---

७७ व२ स करोति(विपर्ययः)

अजाग्निवीथ्योरतुलाग्निभीतिः
क्वचित्क्वचिद्वर्षति वासवोऽपि ।।८।।
उदग्वीथिषु दैत्येज्यश्चास्तगश्चोदितोऽपि च ।
सुभिक्षकृन्मध्यवीथ्यां सामान्यो याम्यगोऽशुभः ।।९।।
स्वातीत्रये पूर्वदिशि पश्चिमे पितृपञ्चके ।
अनावृष्टकरः शुक्रो विपरीतः सुवृष्टिकृत् ।।१०।।
दृष्टः समस्तदिवसे भयदश्चामयोद्भवः।
दिनार्धं प्रति दृष्टश्चेत्परेषां बलभेदकृत् ।।११।।
भिनत्ति रोहिणीचक्रं शुक्रः पैतृभतारकाम् ।
यदा तदा करोत्येनां कपालास्थिमयीं [७८]धराम् ।।१२।।
कृष्णाष्टम्यां चतुर्दश्याममायां यदि भार्गवः ।
उदयं चास्तमनं च करोत्यम्बुमयीं क्षितिम् ।।१३।।
प्राक्पश्चिमस्थौ सुरदानवेज्यौ
परस्परं सप्तमराशिसंस्थौ ।
तदा जनानां भयदो जलाग्नि-
रोगास्त्रचौराग्निनिशाचरेभ्यः ।।१४।।
अग्रगाः पृष्ठगा वापि खेटाः सन्निहिता रवेः ।
तदातिवृष्टिं कुर्वन्ति न चेन्नीचारिराशिगाः ।।१५।।
चत्वारः पञ्च वा खेटा बलिनस्त्वेकराशिगाः ।
राजाहवभयं दध्युरर्घमामयभीतिदाः ।।१६।।
यदा प्रतीपगौ खेटौ नृपसंक्षोभदौ तदा ।
प्रतीपगास्त्रयो यत्र युद्धवृष्टिभयप्रदाः ।।१७।।
राजान्यत्वं च कुर्वन्ति चत्वारो यदि वक्रिताः ।
प्रतीपगाः पञ्च खेटा राजराष्ट्रविनाशदाः।।१८।।
वक्रेन्दुकुन्दकुमुदस्फटिकप्रवाल-

---

७८ व२ क्षिति

वैडूर्यशङ्खदधिपुष्पमहिमोपमाभः ।
मुक्ताफलप्रकरतुल्यविशालकान्ति-
रेवंविधो भृगुसुतः शुभदो नराणाम् ।।१९।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां शुक्रचाराध्यायः सप्तमः ।।७।।[७९]

७९ व३ पत्रक्रमांके १६ अधिकं- गर्गानुसारेण - धरणिधरविरोधो व्याधिवाद्यप्रजानां ---- कश्मीरेषु क्षयं याति अतिचारी बृहस्पतिः । ३ ऋक्षे राहुशनैश्चरा यदि गता शोकाग्निना---

८

२.८.० शनिचारः

रौद्रार्कवारीशमरुद्द्विदैव-
मुकुन्दभेष्वर्कसुतः करोति ।
चरन्सुभिक्षं विपुलं पृथिव्यां
गौडाश्मकाश्मीरपुलिन्दहानिः ।।१।।
[८०]मैत्रेज्यसंक्रन्दनपौष्णभेषु
चरन् सदा सूर्यसुतः करोति ।
ईतेभयं व्याधिभयं प्रजानां
कलिङ्गबाह्लीकजनाभिवृद्धिम् ।।२।।
तयोरहिर्बुध्न्यभयाम्ययोश्च
धराधिपानां कलहस्त्ववृष्टिः।
अनुक्तभेष्वर्कसुतः प्रजानां
चरन् तदा मध्यमवृष्टिदः स्यात् ।।३।।
कीटाजपञ्चाननकर्कटेषु
चरञ्छनिः क्षुद्रपदः प्रजानाम् ।
वृष्टेर्भयं कुत्रचिदामयश्च
तथापि जीवन्ति जनाः कथंचित् ।।४।।
कन्यानृयुग्गोघटचापसंस्थः
स्वक्षेत्रसंस्थोऽपि शुभप्रदः स्यात् ।
वङ्गाङ्गकाश्मीरकलिङ्गगौड-
सौराष्ट्रदेशेष्वशुभप्रदः स्यात् ।।५।।
प्रक्षुभ्यन्ति क्षितीशाः प्रचलितवसुधा मोदते दस्युवर्गो

---

८० वर२ मैत्राख्य

धीभ्रंशो बुद्धिभाजां जनपदहरणं चित्रवर्षी पयोदः ।
चन्द्रार्कौ मन्दरश्मी ग्रहगणसहितो वान्ति वाताः प्रचण्डा-
श्चक्राकारं समग्रं भ्रमति जगदिदं मीनगे सूर्यसूनौ ।।६।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां शनिचाराध्यायोऽष्टमः ।।८।।

वसिष्ठसंहिता

९

२.९.० राहुचारः

प्रच्छन्नामररूपं धृत्वा राहुः सुधाप्रदानेऽभूत् ।
हरिरपि निखिलं ज्ञात्वा च्छिनद्धि चक्रेण तच्छीर्षम् ।।१।।
अमृतमयत्वान्नत्वा हरिं शिर उवाच विस्मिते सदसि ।
दातव्या ग्रहसमता गतोऽस्मि मां रक्ष तव शरणम् ।।२।।
दत्त्वाष्टमग्रहत्वं पीतो विससर्ज तं राहुम् ।
धातृवराच्चन्द्रमसं तुदति ततः सर्वपर्वणि च ।।३।।
अवनतिविक्षेपवशाद्दूराद्दूरं गतः सततम् ।
षण्मासाभ्यन्तरिताद् ग्रहणं प्रायेण सम्भवति ।।४।।
राहुरसौ दनुजत्वाद्भुजगाकारेण गृह्णाति ।
भूगोलाधोभागे दर्पणसदृशे रवौ सदा भ्रमति ।।५।।
उद्भूताखिलधरणीछाया छादयति सेन्दुमुपरिस्थम् ।
स्थगयति रविमुपरिस्थं पश्चादागत्य शीघ्रगश्चन्द्रः ।।६।।
गणितस्कन्धाज्ज्ञात्वा सृष्ट्यादेरिष्टपर्वपर्यन्तम् ।
पर्वसमूहं यत्तत्सप्तभिरवशिष्टपर्वेशाः ।।७।।
धातृशशीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः।
एषां पर्वेशानां क्रमशस्तु फलानि वक्ष्यन्ते ।।८।।
ब्राह्म्ये पर्वणि सम्यग्द्विजगोपसुवृद्धिरपरिमिता ।
सौम्ये पर्वणि तद्वत्सज्जनहानिस्त्ववृष्टिजाद्भीतिः ।।९।।
[८१]शारदसस्यविनाशः क्षितिपतिकलहः सुवृष्टिरैन्द्रे स्यात् ।
धनिकानां धनहानिस्त्वतुला वृष्टिश्च कौबेरे ।।१०।।
निखिलजनानां वृद्धिः क्षेमकरी वारुणे च नृपहानिः ।
आग्नेये चाग्निभयं त्वतुला वृष्टिः क्षितीशकलहश्च ।।११।।

---

८१ व१,शारस्यदस्यविनाशः

वसिष्ठसंहिता

दुर्भिक्षकरं याम्यं लोकानां भीतिदं सततम् ।
पर्वाधिपफलमुक्तं यत्तज्ज्ञातव्यं [८२]चेन्द्विनोर्ग्रहणे ।।१२।।
यद्येकस्मिन्मासे चन्द्रार्कोपप्लवो यदा भवति ।
आतङ्कानर्घभयं क्षितिपतिकलहं विजानीयात् ।।१३।।
उदगयनेऽर्कग्रहणं भवति च यदि वा शशाङ्कस्य ।
द्विजसज्जननृपहानिर्भवति परेषां च दक्षिणे त्वयने ।।१४।।
ग्रस्तोदयगेऽस्तमिते शारदसस्यावनीशनाशः स्यात् ।
क्षुद्भयमामयभयदं निखिलग्रहणं भवेद्यदि वा ।।१५।।
सव्यापसव्यलेहग्रसननिरोधावमर्दनामर्दाः ।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः ।।१६।।
सव्यगते तमसि सति सर्वग्रासः शुभप्रदो जगतः ।
अपसव्ये तमसि सति त्वपसव्याख्या क्षितीशसंक्षोभः ।।१७।।
परितो जिह्वालीढः स ग्रासो मण्डलस्य लेहनो नाम्ना ।
प्रीतिदमखिलजनानां सुवृष्टदं सर्वसस्यानाम् ।।१८।।
अर्धादूनं ग्रहणं ग्रसनं विविधाभयप्रदं जगतः ।
स्पर्शविमर्दान्मोक्षविमर्दमधिकं यदा भवति ।।१९।।
स निरोधो विज्ञेयस्त्वनिष्टदो [८३]निखिलजन्तूनाम् ।
मण्डलमधिकं पीत्वा कंचित्कालं विलम्ब्य स निवृत्तः ।।२०।।
[८४]अवमर्दो विज्ञेयः स च हानिकरश्च जन्तूनाम् ।
मागधगौडकिरातद्रविडानामामयश्च नियमेन ।।२१।।
आवृत्यारोहणवच्चक्राकारेण दृश्यते तमःपटलम् ।
स च(चा)मर्दो विज्ञेयः समस्तराष्ट्रस्य नाशकरः ।।२२।।

---

८२ व१ द्वयोर्ग्रहणे
८३ व२ वे.,चौ.सर्वभूतानां, व३ स्त्वखिलजंतूनां
८४ व२ वे. चौ. स विमर्दो

मुकुरोपरि निश्वासानीलसदृशं दृश्यते तमश्छत्रम् ।
आघ्राताह्वयमखिलं शुभप्रदं[८५]सर्वजन्तूनाम् ।।२३।।
मध्ये तमसाविष्टं वितमस्कं सर्वमण्डलं परित: ।
तन्मध्यतमस्पर्शो मध्यमदेशस्य नाशकर: ।।२४।।
पर्यन्ते भवति तमो न तु मध्ये तमोऽन्तक: सोऽपि ।
ईतिभयं सस्यानां डामरमधिकं भवेत्तत्र ।।२५।।
क्षेमसुभिक्षं श्वेते राहौ पीडां च विप्रमुख्यानाम् ।
अनलभयं त्वनिलनिभे पीडा स्याद्वह्निजीविनां सम्यक् ।।२६।।
हरिते त्वामयभीति: सस्यानामीतिरोगभयम् ।
कपिले शीघ्रगसत्त्वै[८६]र्भयमत्युग्रं च शबरजातीनाम् ।।२७।।
दिनकररश्मिसमाने दुर्भिक्षं पक्षिसंघपीडा च ।
धूम्रनिभा: क्षेमकरा: सस्यानां मन्दवृष्टिद: सततम् ।।२८।।
कापोतारुणसदृश: श्यामनिभो वामयं च दुर्भिक्षम् ।
अतिकृष्णं शूद्राणां व्याधिकरं भीतिदं च नरपाणाम् ।।२९।।
मरकतमणिपीतश्चेद्वैश्यध्वंसी सुभिक्षकर: ।
गैरिकसदृशे युद्धं विद्युत्सदृशे च वह्निभयम् ।।३०।।
दूर्वासमानवर्णे हारिद्रे वायु[८७]रुग्भयं जगत: ।
पाटलकुसुमसमानस्त्वशनाद्भीतिप्रदो राहु: ।।३१।।
पङ्कविदूषितरूप: क्षत्रियकुलनाशदस्त्ववृष्टिकर: ।
बालार्काम्बुजसदृशस्त्वाहवदस्त्विन्द्रचापसदृशश्च ।।३२।।
ग्रहणसमयेऽतिवृष्टि: पवनोत्पाता भवन्ति यदा ।
आतङ्कमरकभीतिर्विपुला स्यात्क्षुद्भयं चैव ।।३३।।
आवन्तिककावेरीनार्मदतीराश्रिताश्च ये च जना: ।

---

८५ व१,व३ निखिल
८६ वे.पा.गतग्रासैर्
८७ वे.पा. वाथ

सहकौशलिका विलयं प्रयान्ति [८८]वसुधात्मजे ग्रस्ते ।।३४।।
शशितनये ग्रस्ते सति शरयूनेपालसिन्धुतीराश्च ।
स्त्रीबुधसज्जनशिशवः पीड्यन्ते विविधरोगैश्च ।।३५।।
ग्रहणोपगते जीवे बुधमित्रसमुद्रतीरसम्भूताः ।
डामरभूतविकारैर्विलयं यान्ति प्रकाशिताद्यैश्च ।।३६।।
भृगुतनये राहुगते दशार्णजाः कैकयाः समाद्रेयाः ।
आर्यावर्ताः सुखिनः पीड्यन्ते सलिलनिलयाश्च ।।३७।।
दिनकरतनये ग्रस्ते सौराष्ट्राः संकराश्च कैवर्ताः।
बर्बरकुत्सितधान्यं विलयं यान्ति प्राभूतधनिकाश्च ।। ३८।।
[८९]ऊर्जेऽपि मासे ग्रहणं कृशानो-
भीतिं च सापत्नजनात्करोति ।
काम्बोजकाश्मीरसुमागधांश्च
सशूरसेनान्द्रविडान्निहन्ति ।।३९।।
सुभिक्षकृत्क्षेममतीववृष्टि-
र्मासे सहे पर्वणि रुक्प्रदः स्यात् ।
काश्मीरकान् कौशलकान्सपौण्ड्रा-
न्दुनोति राहुः खलु यायजूकान् ।।४०।।
पौषे द्विजक्षत्रजनोपताप-
स्त्वनर्घवृष्टिः क्षितिपालभीतिः ।
ध्वंसं व्रजन्त्यत्र विदेहपौण्ड्र-
मद्रात्रिगोत्रप्रभवाः [९०]सगौडाः ।।४१।।
गजाश्वसंघान्द्विजदेवभक्ता-
न्धर्मे रतांस्तान्पितृमातृभक्तान् ।
दुनोति राहुर्मनुजांश्च माघे

---

८८ चौ. वसुमत्यात्मजे

८९ व१,व३ ऊर्जेति

९० व१ सगौराः

सस्यार्घवृष्टिं प्रचुरां करोति ।।४२।।
तपस्यमासि द्विजसज्जनानां
काम्बोजबाह्लीककलिङ्गजानाम् ।
हानिप्रदः सस्यसुवृष्टिदश्च
दृष्टं तमो [११]भूपविरोधकश्च ।।४३।।
रूपो[१२]पजीवाखिलपण्यजीवि-
हास्यज्ञशिल्पाखिललेखकानाम् ।
पीडाप्रदो देवपतिश्च राहु-
र्मासे मधौ पर्वणि मन्दवर्षी ।।४४।।
कार्पासमुद्गाः सतिला विनाश-
मायान्ति मूलान्यखिलानि तत्र ।
वैशाखमासे ग्रहणे कलाज्ञा-
श्चेक्ष्वाकुयोधाश्च तथा सुभिक्षम् ।।४५।।
[१३]नरेन्द्रपत्नीद्विजसस्यवृद्धिः
सौम्या जनाश्चेदि[१४]किरातसंघाः ।
प्रध्वंसमायान्ति तथा सुवृष्टि-
र्ज्येष्ठे च मासे ग्रहणं यदि स्यात् ।।४६।।
आषाढमासे ग्रहणं तडाग-
वापीनदीदीर्घिकवप्रपूर्णाः ।
काश्मीरगान्धरपुलिन्दचीना
लयं प्रयान्त्यल्पजनाः सुतुष्टाः।।४७।।
काम्बोजकान्मागधशूरसेना-
न्पुलिन्दचीनानथ कौरवांश्च ।

---

११ व१ विरोधकृतस्य वा
१२ वे. भूप
१३ व१ नरेन्द्रपति
१४ वे.चोर

निहन्ति देवोऽपि च मन्दवर्षी
दृष्टो नभोमासि च सैंहिकेय: ।।४८।।
म्लेच्छान्सुराष्ट्राँश्च[९५] कलिङ्गवङ्गा-
न्खशाँश्च[९६] सौवीरभवान्किरातान् ।
स्त्रीणां च गर्भं विनिहन्ति
राहुर्नभस्यमासे भुवि भूरिवृष्टि: ।।४९।।
[९७]काम्बोजचीनान् यवनान्सशल्या-
न्त्रैगर्तिकान्दर्दुरमागधांश्च ।
आनर्तपौण्ड्रान्भिषजश्च[९८] राहु-
र्निहन्ति मासे त्विषसंज्ञिकेऽपि ।।५०।।
हनू च कुक्षी त्वथ पापभेदै:
संछर्दनं यज्जरणं ततश्च ।
मध्ये विदारं च विदारमन्ते
मोक्षप्रभेदा दश चन्द्रभान्वो: ।।५१।।
दक्षिणहनुभेदसंज्ञितमाग्नेय्यामपगमनमिन्दोश्च ।
अपि रुक्सस्यविमर्दनमतिवृष्टिर्नरपते: क्षोभ: ।।५२।।
अभिगमनं चैशान्यां वामो [९९]हनुभेदसंज्ञित: सोऽपि ।
शस्त्रभयं रोगभयं करोति वृष्टिं च राजहानिं च ।।५३।।
दक्षिणपार्श्वविमोक्षो दक्षिणकुक्षिप्रभेदसंज्ञ: स: ।
नृपतिकुलेभ्य: पीडां करोति सापत्न्यजनसंघान् ।।५४।।
उत्तरमार्गे विचरति राहौ वामस्तु कुक्षिभेद: स्यात् ।
गर्भविपत्ति: स्त्रीणां मध्यानि च तानि पूर्वसस्यानि ।।५५।।

---

९५ वे.सुदाष्ट्राँश्च,

९६ शशाँश्च

९७ व१,व३ काम्बोजवीरान्

९८ वे.भषजश्च

९९ व३ लोप: हनुभेदसंज्ञितत: पूर्ण श्लोक : ५३, ५४

दक्षिणपार्श्वाख्यः[१००] स च नैर्ऋतकोणाच्च याम्यदिग्गमनम् ।
बहुविधसस्यामयकृत्त्वपरसस्यस्य नाशकरम् ।।५६।।
आरभ्यानिलककुभश्चोत्तरमार्गस्थितो यदा राहुः ।
उत्तरपार्श्वाख्यः स च नानामयभूपभीतिदः सततम् ।।५७।।
प्रग्रहणं चेत्प्राच्यां दिशि कृत्वा प्रागेव सर्पति च ।
सञ्छर्दना[१०१]ख्यमोक्षः सुभिक्षदः सर्वजन्तूनाम् ।।५८।।
प्रागेव प्रग्रहणं कृत्वा त्वपसर्पणं प्रतीच्यां च ।
जरणाख्यो विज्ञेयः स च जन्तुविनाशनं कुरुते ।।५९।।
आदौ मध्यविकासः पश्चादन्ते च विदरणं मध्यम् ।
सततं त्वन्तःकलहं करोति [१०२]सौभिक्षमतिवर्षम् ।। ६० ।।
प्रत्यन्ते विमलतरः पश्चान्मध्यं च विदरणं चान्तम् ।
मध्यान्तदेशनाशं करोति [१०३]सस्यस्य वै नाशम् ।।६१।।
दशविधमोक्षाः कथिता विज्ञेया भास्करग्रहणे ।
प्रग्रहणं प्रागिन्दोर्मोक्षः पश्चाद्विपर्ययाद्द्युमणेः ।।६२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां राहुचाराध्यायो नवमः ।।९।।

---

१०० वर पाद्यख्यः
१०१ वे.स छर्दन-
१०२ वर सौभिक्षमवर्षम्
१०३ वर सस्यनाशं च

१०

२.१०.० केतुचारः

केतोरुदयास्तमयं ज्ञातुं गणितान्न शक्यते यस्मात् ।
दिव्यान्तरिक्षभौमास्तस्मात्त्रिविधाश्च केतवो जगति ।।१।।
एकोत्तरशतभेदा दृश्यन्ते वा सहस्रभेदास्ते ।
औत्पातिकरूपत्वाद्भवन्ति बहवस्तथैको वा ।।२।।
दिवि ऋक्षग्रहजास्ते दिव्याख्यकेतवो महाफलदाः ।
परिवेषेन्द्रधनुरुल्कागन्धर्वनगराणि निर्घातः ।।३।
गगनविकारजमेतन्मध्यमफलदं तथान्तरिक्षं च ।
भूमिभवा भौमाः स्युश्चरस्थिरा वस्तुसम्भवा ये च ।।४।।
तेऽधमफलदास्तेषां कथयामि फलानि रूपाणि ।
वर्षमासैः पक्षैः क्रमशः परिपाकमुपयान्ति ।।५।।
स्निग्धः प्रसन्नरूपः शुक्लनिभो ह्रस्वदण्डवत्सौम्यः ।
उदयास्तमये त्वेवं सुभिक्षसौख्यावहः केतुः ।।६।।
धूमनिभो धूमाख्यः केतुर्दोषप्रदो भवति ।
इन्द्रशरासनरूपः स्थूलनिभो वार्घभीतिदः सम्यक् ।।७।।
बहुभिः शिखाभिरतुला विद्युन्मणिहारहेमनिभाः ।
अपरेन्द्रदिशो दृश्या महाहवं तद्दिगीशानाम् ।।८।।
शुकमुखबन्धूकनिभा वह्निसुताः क्षतजसन्निभा रूक्षाः ।
दृश्यन्ते यद्यनलदिशि तावन्तस्तेऽपि शिखिभयदाः। ।९।।
मृत्युसुता वक्रशिखाः कृष्णा रूक्षाः [१०४]प्रहीणकराः ।
दृश्यन्ते याम्यायां जनमरणभयप्रदास्तेऽपि ।।१०।।
क्षितितनया द्वात्रिंशद्दर्पणसदृशाः सरश्मयो विशिखाः ।
क्षुद्भयदाः सशिरस्का यमतनया मृत्युदाश्च तैलनिभाः ।।११।।

---

१०४ व२ प्रहरणकराः

शशितनयाः कुसुमनिभाः कुन्देन्दुक्षीररजतनिभाः ।
उत्तरभागे शिखिनो जन्तूनां ते सुभिक्षकराः ।।१२।।
त्रिशिखस्त्रिवर्णयुक्तो ब्रह्मसुतो ब्रह्मदण्डनिभः ।
अनियतदिग्प्रभवोऽसौ शान्तिकरो ब्रह्मदण्डाख्यः ।।१३।।
शनितनयास्तारास्थाः शुक्ला ऋजवश्च षट्संख्याः ।
दृश्यन्ते द्वित्रिदिनैः शुभदा मासैश्च रुग्भयदाः ।।१४।।
जीवसुता विकचाख्याः शुक्लास्ताराश्रिताः स्निग्धाः।
याम्यां दिशि [105]संस्था बहवस्ते पापदाः सततम् ।।१५।।
बुधतनयाश्चौराख्याः शुक्लाः सूक्ष्मा यथेष्टदिक्प्रभवाः ।
आमयभयदाः सततं जन्तूनां पञ्चपञ्चाशत् ।।१६।।
कुजतनयाः [106]कौजेयाः क्षतजानलसन्निभास्त्रिशूलधराः ।
याम्यायां दिशि संस्थाः क्षुद्भयदाः षष्टिसंख्याकाः। ।१७।।
तामसकीलकसंज्ञा राहुसुताः [107]सूर्यमण्डले दृष्टाः।
तेषां तन्निखिलफलं सम्यक्कथितं च सूर्यचारेऽपि ।।१८।।
अग्निसुतास्त्वाग्नेय्यां विंशत्यधिकाश्च शतसंख्याः ।
प्रलयानलसदृशाभा भुवि वह्निभयप्रदास्तेऽपि ।।१९।।
अरुणाख्याः श्यामनिभाः शुक्रसुता विविधरूपसंकीर्णाः।
शस्त्रक्षुद्भयदास्ते सप्तोत्तरसप्ततिश्च संख्याकाः ।।२०।।
दण्डकसंज्ञाश्चाष्टौ [108]तारासदृशाः प्रजापतेस्तनयाः ।
द्वाचत्वारिंशोत्तरशताधिकाः पापदा विधातृसुताः।।२१।।
वरुणभवाः कङ्काख्या द्वात्रिंशद् वंशगुल्मयष्टिनिभाः ।
शशिवत्प्रभासमेता राजान्यत्वं प्रकुर्वते ते वै ।।२२।।
कालभवाः षणवतिः संख्यास्तेषां कबन्धनिभाः ।

---

१०५ व२ सत
१०६ व१ कैकया
१०७ व१ व२ सूर्यमण्डल-
१०८ व२ तपासंज्ञा

तन्नामानः [१०९]शिखिनो दुःखामयभीतिदा जगतः ।।२३।।
विमलास्ताराकारा दश दिक्षु समुद्भवाः शिखिनः ।
एवं सहस्रभेदाः पापाश्चैषां विशेषमभिधास्ये ।। २४।।
पश्चिमदिशि सम्भूतश्चोत्तरनम्रश्च सौम्यकेतुः सः ।
कुरुते सुभिक्षमतुलं सितवर्णोऽसौ महास्निग्धः ।।२५।।
दक्षिणनम्रः प्राच्यां तथाविधो याम्यकेतुः सः ।
रूक्षः क्षुद्भयदायी मरकभयं वा करोत्येवम् ।।२६।।
धूमनिभो याम्यायां कपालकेतुर्बृहत्तनुः स्निग्धः।
दिक्षु विदिक्षु प्रभवः क्षुन्मरकावृष्टिरोगकरः ।।२७।।
प्राच्यां दिशि सम्भूतः प्रदक्षिणं भ्रमति चक्रवद्रूक्षः।
स च चक्रकेतुरनिशं कपालकेतोश्च तुल्यफलः।।२८।।
पश्चिमतः सम्भूतो याम्यायां दिशि भ्रमति चाप्रदाक्षिण्यम्।
धूमनिभो विषमाख्यः केतुर्भूभारमपनयति ।।२९।।
कतिपयदिवसं गत्वा गमननिवृत्तिं करोति धूम्रनिभः ।
नरपतिकलहाज्जगतः करोति निलयं स चक्राख्यः। ।३०।।
गगनत्रिभागदीर्घः श्यामनिभोऽसौ [११०]महासटाकारः।
ऋजुवक्रगतिं कुरुते क्रमशो जगतस्त्रिभागहरः ।।३१।।
गतिरहितो ध्रुवकेतुः प्रमाणवर्णाकृतिर्न भवेत् ।
ग्रहनक्षत्रोपगमे [१११]नैवाशुभदो [११२]भवेत्केतुः ।।३२।।
उपकरणेषु च राज्ञां सुरगृहतरुपर्वतेषु [११३]सर्वेषु ।
दर्शनमुपैति नियतं विनाशिनामेव नियमेन ।।३३।।
कुमुदनिभः कुमुदाख्यो दिवसैः षड्भिस्तु पश्चिमे दृष्टः।

---

१०९ व३ शिखिना पुंडामयभीतिदा
११० व३ महाशटाकारः, चौ. महाशकटाकारः
१११ व१,व३ नैवाशुभप्रदो
११२ व१, व३केतुः
११३ व१ सदनेषु

प्रागुत्तरदिशि यदि वा सुभिक्षमतुलं करोत्येव ।।३४।।
तारोपरि मणिकेतुर्याम्यायां दिशि सकृद्दृष्टः।
उदयास्तमयसमये वा शुभदोऽसौ[११४] क्षीरधारेव ।।३५।।
जलधारेव हि ऋज्वी नतया शिखया परेण दृष्टः सः ।
जलकेतुर्जलसदृशः सुभिक्षकरस्तु सर्वजन्तूनाम् ।।३६।।
हरिलाङ्गूलनिभो भवकेतुः कचसन्निभो वापि ।
बहु रोगभयं कुरुते सर्पाकारस्तु तद्भयदः ।।३७।।
अपरोऽपि पद्मकेतुः पद्मनिभः पद्मगर्भसंकाशः ।
क्षेमकरो नृपतीनां सुभिक्षदः सर्वजन्तूनाम् ।।३८।।
आवर्तः केतुरयं प्रादक्षिण्येन दीप्तिमाञ्छुक्लः ।
शुभदो व्यत्ययकेतुस्त्वतुलामयभीतिरीतिकरः ।।३९।।
आक्रम्य गगनमखिलं संवर्ताख्यः स धूमनिभः ।
शूलाग्रस्त्वितरो वा स केतुरसकृद्भयप्रदो जगतः ।।४०।।
शुभदाः शुक्लनिभा ये कृष्णास्त्वशुभप्रदा जगतः ।
केतूनां फलमुक्त्वा वक्ष्ये [११५]दस्रादिभेषु जातानाम् ।।४१।।
अश्विन्यां यदि केतु[११६]र्जातस्तदाश्वजीविनं हन्यात् ।
याम्ये म्लेच्छाधिपतिं बहुलायां कलिङ्गकाधिपतिम् ।।४२।।
रोहिण्यामतुलबलं निहन्ति केतुश्च शूरसेनेशम् ।
औशीनरमुख्यपतीन्सौम्ये रौद्रे च जलजन्तून्।।४३।।
अश्मकदेशाधिपतिं त्वादित्ये पुष्यभे च मगधपतिम् ।
आर्याधिपतिं सार्पे पाण्ड्याधिपतिं च पितृधिष्ण्ये वै ।।४४।।
भाग्यर्क्षे तूज्जयिनं चोत्तरभे दण्डनायकान्त्वखिलान् ।
हस्तर्क्षे धनिकवराञ्चित्रायां कूटभवान्निखिलान् ।।४५।।

---

११४ व२ उधारेवजलधारे
११५ व२ दस्त्रभेषु
११६ व२ र्जातञ्जजीविना

काम्बोजनृपतिमुख्यं प्रभञ्जने जातकेतुरपि ।
इक्ष्वाकुवंशनाशं द्विदैवभे मित्रभे च खशगौडेशम् ।।४६।।
ज्येष्ठायां यदि जातः स हन्यते सर्वमण्डलाधीशम् ।
मूले मद्राधिपतिं कलिङ्गदेशाधिपतिं जलदैवे ।।४७।।
गुर्जरिका ये देशास्तान्हन्याद्वैश्वधिष्ण्यजः सोऽपि ।
कैकयनाथं हन्याच्छ्रवणर्क्षे वसुभवोऽखिलान् द्रविडान् ।।४८।।
नैमिषनृपतिं हन्याच्छतभिषजस्त्वजाङ्घ्रिजश्च पाञ्चालान् ।
अहिर्बुध्न्येर्क्षभवः संकरिकान् किरातकोणभवान् ।।४९।।
पौष्णर्क्षभवः केतुर्द्विजसज्जनधर्ममार्गस्थान् ।
अभिजिन्नक्षत्रभवः कोङ्कणदेशं निशिचरांश्चापि ।।५०।।
ये केतवश्चाश्विमुखर्क्षजाता-
स्ताराग्रहादिष्वपि सम्भवाश्च ।
कुर्वन्ति ते तीक्ष्णफलं जनाना-
मन्येऽपि सामान्यफलप्रदाः स्युः ।।५१।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां केतुचाराध्यायो दशमः ।।१०।।

११

२.११.० वर्षेशादिनिर्णयफलम्

ब्राह्मं च दिव्यं मनुपित्र्यमानं
सौरं च चान्द्रं गुरुसावनर्क्षम् ।
एषां नवानां च पृथक्पृथग्य-
त्प्रयोजनं तत्क्रमश: प्रवक्ष्ये।।१।।[117]
मानं विधातु: खलु नित्यमायु:
प्रमाणविज्ञानविधौ च कार्यम् ।
गीर्वाणमन्वोरपि मानमेवं
पैत्र्ये च माने शशिन: प्रवृत्तम् ।।२।।
षष्ट्यब्दजन्मप्रभवादिकानां
फलं च सर्वं गुरुमानत: स्यात् ।
मासे यदा तत्तपसीन्द्रवन्द्ये
त्वाद्ये लवे वासवतारकाया: ।।३।।
सौरं च संक्रान्तिवशाद्दिनस्य
नाक्षत्रमिन्द्रोर्भगणभ्रमाच्च ।
त्रिंशद्दिनं सावनमानमाद्यं
दिनादमान्तं खलु चान्द्रमानम् ।।४।।
दिनप्रमाणं त्वयनं च सर्वं
संक्रान्तिकालस्य विनिर्णयं च ।
कृतादिमानं निखिलग्रहाणां
यत्कर्म सौरेण विगृह्यतेऽत्र ।।५।।
जीमूतगर्भं निखिलं सुसम्य-
गृक्षेण मानेन निरीक्षितव्यम् ।

117 व२ श्लोकाधिक इति तस्मात्।।

नृगर्भवृद्धिः प्रबलर्तुकालं
    यत्सूतकाद्यं खलु सावनेन ।।६।।
उद्वाहयज्ञोपनयप्रतिष्ठा-
    तिथिव्रतक्षौरमहोत्सवाद्यम् ।
पर्वक्रिया वास्तुगृहप्रवेशः
    सर्वं च चान्द्रेण विगृह्यते तत् ।।७।।
चैत्रस्य शुक्लाद्यतिथेश्च वार-
    नाथोऽब्दपस्तस्य चमूपतिः सः ।
मेषस्य सङ्क्रान्तितिथेश्च वार-
    नाथस्तु सस्याधिपतिर्भवेत्सः ।।८।।
कुलीरसंक्रान्तिजवारनाथो
    रसाधिपस्तौलिनिवासरेशः ।
फलं तथैषां क्रमशश्चतुर्णां
    पृथक् पृथग्यत्नप्रयतः प्रवक्ष्ये ।।९।।
वर्षाधिपो मेषदिनस्य वार-
    श्चमूपतिश्चैत्रदिनादिवारः।
हूणेषु वङ्गेषु खशेषु माग-
    धेष्वं च पौण्ड्रेष्वपि टङ्करेषु ।।१०।।
अब्दाधिपे दिनपतौ खलु मध्यवृष्टि-
    र्मन्दप्रभर्क्षगणशीतकरं नभश्च ।
हन्तुं सपत्नविषयान्निखिलक्षितीशा
    नित्यं चरन्ति भुवि भूरि बलावृताश्च ।।११।।
गोधूमशालीक्षुमती धरित्री
    पुष्पैर्विचित्राध्वरवेदनादैः ।
विभान्ति गावः पयसः प्रभूता

दुग्धाब्धिजे वर्षपतौ च [118]सोमे ।।१२।।
चौराग्निसापत्नगणप्रभूता
महीं महीशाखिलयुद्धकीर्णा ।
कुजेऽब्दनाथे पिटकामयाद्यैः
सदाकुला वारिसुसस्यपूर्णा ।।१३।।
प्रभूतवायुर्भुवि मध्यवृष्टि-
र्गदाहवप्रोद्धतराजकोपः ।
बुधेऽब्दनाथे तदपरं च सस्यं
श्रेष्ठं च वृद्धिर्लिपिलेखकानाम् ।।१४।।
भूदेवसंघोऽध्वरतत्परश्च
भूपाः प्रजापालनशीलयुक्ताः।
दोषा लयं यान्ति गुरोस्तु वर्षे
स्वकर्मसक्ता निखिलाः प्रजाः स्युः ।।१५।।
नानाविधोद्यानतडागवप्र-
परेक्षुवाटाखिलसस्यपूर्णा ।
मही महीदेवमहीभुजाद्यै-
र्जनैर्विचित्रा भृगुजेऽब्दनाथे ।।१६।।
मध्यानि सस्यानि विचित्रवृष्टि-
श्चौरामयप्रोद्धतराजकोपः ।
यदुत्तरं सस्यभयं कुधान्यं
सम्पूर्णमस्मिन्नविजेऽब्दनाथे ।।१७।।

इति राजफलम् ।

दिनकृति मन्त्रिणि सततं
विचित्रवर्णानि सर्वसस्यानि ।

---

११८ व३ चन्द्रे

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

क्षितिपतिकोपं विपुलं
विपिनारामाश्च सीदन्ति ।।१८।।
तुहिनकरे सचिववरे
नानाविधसस्यसम्पूर्णा ।
द्विजसज्जनपशुवृद्धिः
काननफलपुष्पतोयजन्तूनाम्[११९] ।।१९।।
दहनप्रहरणडमरमरुदामयभीतिरतुला स्यात् ।
क्षितितनये मन्त्रिणि सति शोषं समुपैति निम्नसस्य[१२०]चयम् ।।२०।।
मन्त्रिणि शशाङ्कतनये प्रभूतवायुर्निरन्तरं वाति ।
मध्यमफलदा धरणी विभाति सुरसदृशलोकैश्च ।।२१।।
सुरसचिवे मन्त्रिणि सति सुवृष्टिबहुसस्यसम्पूर्णम् ।
जगदखिलं जलपूर्णं प्रोद्धतराजाहवो ज्ञेयः ।।२२।।
उच्चलिताध्वनिरनिशं विप्राणामध्वरे चरत्यखिलम् ।
अनिमिषहृदयानन्दं कुर्वन्सचिवे सुरारिगुरौ ।।२३।।
मन्दफला निखिलधरा न वारि मुञ्चति वारिधरः ।
दिनकरतनये सचिवे प्रभया रहितं वियत्सततम् ।।२४।।
इति मन्त्रिफलम् ।
सस्याधीशे भास्वति भूमौ विरलानि सर्वसस्यानि।
अतिविपुलं त्वीतिभयं कुलित्थचणकादिसम्पूर्णम् ।।२५।।
सस्यपतौ तुहिनकरे रमणीया सुविस्तृता धरणी ।
फलपुष्पसस्यवारिभिरमिताविकगोभिरन्नाद्यैः ।।२६।।
सीदन्ति सस्यनिचया भुवि भौमे सस्यपे महोष्णभयात् ।
अपराखिलधान्यचयं क्वचित्क्वद्भवति शस्त्रभयम् ।।२७।।
अनिलहतं सस्यचयमुत्तममध्यमवृष्टिसम्पन्नम् ।

---

११९ व३ काननफलपुष्पतोयज्ञान्
१२० वे.पा.मयम् , चौ.सस्यस्य

शशितनये सस्यपतौ त्वपरं धान्यं प्रभूतफलम् ।।२८।।
सस्यपतौ त्रिदशगुरौ बहुविधसस्यार्घसम्पूर्णम् ।
टङ्कणमागधदेशे मध्यमसस्यार्घवृष्टिः स्यात् ।।२९।।
दैत्येज्ये सस्यपतौ बहुविधफलपुष्पसम्पूर्णम् ।
अमरविडम्बितजनता सम्पूर्णमाभाति निखिलजगत् ।।३०।।
मध्यमसस्यक्षितितलमिनतनये सस्यपे च राजभयम् ।
कोद्रवकुलित्थचणकैर्माषैर्मुद्गैश्च विपुलतरम् ।।३१।।

इति धान्याधिपफलम् ।

चन्दनकुङ्कुमगुग्गुलतिलतैलैरण्डतैलमुख्यानि ।
प्रचुराणि रसान्यतुलं रसनाथे भास्करे सततम् ।।३२।।
इक्षुविकारं त्वखिलं क्षीरविकारं च सर्वतैलानि ।
गन्धयुतानि च सर्वाण्यपि सुलभान्येव रसपतौ चन्द्रे ।।३३।।
भुवि रसनिचयाः सर्वे चन्दनकर्पूरकुङ्कुमाद्यं च ।
दुर्लभमवनीसूनौ रसाधिपे मधुरवस्तूनि ।।३४।।
शशितनये रसानाथे पिप्पलिशुण्ठी च हिङ्गुलशुनानि ।
घृततैलाद्यं निखिलं दुर्लभमिक्षूद्भवं सकलम् ।।३५।।
रसनाथे देवगुरौ चन्दनकर्पूरकन्दमूलानि ।
सुलभानि रसान्यखिलान्यतुलं सीदन्ति कुङ्कुमाद्यानि ।।३६।।
सुगन्धवस्तूनि सिते रसेशे
निर्गन्धवस्तूनि रसादिकानि ।
क्षाराणि सर्वाणि च कन्दमूल-
फलानि पुष्पाणि बहूनि तानि ।।३७।।
रसेश्वरे सूर्यसुते धरित्र्यां
सुदुर्लभान्येव रसानि यानि ।
सुगन्धवस्तूनि घृतेक्षुकन्द-

मूलानि चान्यत्सुलभं भुवि स्यात् ।।३८।।[१२१]

---

१२१ व२ -संहिताकरणसमये शकाद्यानामभावात्

प्रक्षेपाः । (वे., चौ.)

त्रिघ्ने शकाब्दे मुनिभिर्विभक्ते
द्विनिघ्नशेषं शरयुक्तु वृष्टिः ।
धान्यं तृणं शीतमथोष्णवायू
प्रजासमृद्धिः क्षयराजविग्रहौ ।।३९।।(व२ श्लो. ३९तः ५० लोपाः)
उग्रं च पुण्यं परतश्च पापं
क्रमेशलब्धाच्छकवत्सराच्च ।
निरीक्ष्य सम्यक् प्रतिवर्षमेवं
सर्वं वदेज्ज्यौतिषिकः पुनश्च ।। ४०।।
स्वस्वामिवर्षाधिपवत्सरैक्यं
त्रिघ्नं शराढ्यं तिथिभक्तशेषम् ।
आयोऽथ लब्धस्त्रिगुणा शराढ्या
तिथ्युद्धृता शेषमितो व्ययः स्यात् ।।४०।।
शाकं च वेदगुणितं सप्तभिर्भागमाहरेत् ।
शेषं च द्विगुणीकृत्य रूपं चैव तु मिश्रयेत् ।।४१।। (व१, व३ श्लो.४१तः५० लोपाः)
क्षुधा तृषा च निद्रा च आलस्यं तूद्यमस्तथा ।
शान्तिः क्रोधस्तथा लोभो भेदो मैत्री तथैव च ।।४२।।
उत्साहपुण्यपापानि ज्ञातव्यानि यथाक्रमम् ।
त्रिघ्नः शाकः सप्तभक्तो लब्धं रामहतं भवेत् ।।४३।।
शेषं तु द्विगुणीकृत्य शरेणैव तु मिश्रयेत् ।
वृष्टिरन्नं तृणं शीतं तेजो वायुश्च संज्ञकाः ।।४४।।
विग्रहः सर्वलोकानां ज्ञायते च पुनः पुनः ।
शाको वेदमितैर्निघ्नः शैलैर्लब्धयुगाहतैः ।।४५।।
यच्छेषं तत्पुनर्द्विघ्नं सैकं प्राग्वत्प्रजायते ।
क्षुधा तृषा तथा निद्रालस्योद्यमविषं तमः ।।४६।।
क्रोधो दण्डश्च भेदः स्यादिच्छाग्निश्च रसाः क्रमात् ।
शाकं पञ्चगुणं कृत्वा शैलैर्लब्धं शराहतम् ।।४७।।
यच्छेषं तत्पुनर्द्विघ्नं पञ्चयुग्जायते फलम् ।

इति रसेशफलम् ।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां वर्षेशादिनिर्णयफलाध्याय एकादशः ।।११।।

शेषं सौख्यं भयं क्लेशो युद्धं वातोत्सवाः क्रमात् ।।४८।।
शकादग्निहतान्नन्दहृताच्छेषं द्विनिघ्नितम् ।
त्रिभिर्युतं पुनर्लब्धा सप्तधैवं प्रजायते ।।४९।।
शलभा मूषकाश्चैव दैविकं हिममेव च ।
ताम्रं स्वचक्रं च तथा परचक्रमिति क्रमात् ।।५०।।
इदं तु प्रकारान्तरेण कथितम्।

१२

२.१२.० तिथिस्वरूपम्

दिनाधिपा धातृविधातृविष्णु-
यमेन्दुषड्वक्त्रशचीश्वराश्च ।
वस्वाख्यनागौ परतश्च धर्म-
शिवार्ककामाः कलिविश्वसंज्ञौ ।।१।।
सदैव नष्टेन्दुतिथीश्वराः स्यु-
र्नूनं च एते पितरः क्रमेण ।
धनाधिपं केचिदुशन्ति सन्त-
स्त्वधीश्वरं वै हरिकामतिथ्योः ।।२।।
वह्निर्विधाताद्रिसुता गणेशः
सर्पः कुमारो दिनपो महेशः ।
दुर्गा यमो विश्वहरी च कामः
शिवो निशीशश्च पुराणदृष्टः ।।३।।
नन्दा च भद्रा च जया च रिक्ता
पूर्णेति सर्वास्तिथयः क्रमात्स्युः ।
शुक्लेऽधमामध्यमकोत्तमास्ताः
पक्षेऽसितेऽप्युत्तममध्यहीनाः ।।४।।
नोद्वाहयात्रोपनयनप्रतिष्ठा-
सीमन्तचौलाखिलवास्तुकर्म।
गृहप्रवेशाखिलमङ्गलाद्यं
कार्यं हि मासादितिथौ कदाचित् ।।५।।
सप्ताङ्गचिह्नानि[१२२] नृपस्य वास्तु-
व्रतप्रतिष्ठाखिलमङ्गलानि ।

---

१२२ व१ विविहानि

यात्राविवाहाखिलभूषणं य-
त्कार्यं द्वितीयादितिथौ सदैव ।।६।।
सङ्गीतविद्याखिलशिल्पकर्म
सीमन्तचौलान्नगृहप्रवेशम् ।
कार्यं द्वितीये दिवसे यदुक्तं
सदा तृतीये दिवसेऽपि कार्यम् ।।७।।
रिक्तासु शत्रोर्वधबन्धशस्त्र-
विषाग्निघातादि च याति सिद्धिम् ।
सन्मङ्गलं तासु कृतं च मूढै-
र्विनाशमायाति तदा तु[123] नूनम् ।।८।।
शुभानि कार्याणि चरस्थिराणि
चोक्तान्यनुक्तान्यपि यानि तानि ।
सिद्धिं प्रयान्त्याशु ऋणप्रदानं
विना सदा नागतिथौ प्रभूतम्[124] ।। ९।।
अभ्यङ्गयात्रापितृकर्मदन्त-
काष्ठं विना पौष्टिकमङ्गलानि ।
षष्ठ्यां विधेयानि रणोपयोग्य-
शिल्पानि वास्त्वम्बरभूषणानि ।।१०।।
द्वितीयायां तृतीयायां पञ्चम्यां कथितान्यपि ।
तानि सिद्ध्यन्ति कार्याणि सप्तम्यामखिलान्यपि ।।११।।
संग्रामयोग्याखिलवास्तुशिल्प-
नृत्यप्रभेदाखिललेखनानि ।
स्त्रीरत्नचर्याखिलभूषणानि
कार्याणि कर्माणि महेशतिथ्याम् ।।१२।।
द्वितीयायां तृतीयायां पञ्चम्यां सप्तमीतिथौ ।

---

१२३ व१ शु

१२४ व१ प्रसिद्धम्

उक्तानि यानि सिद्ध्यन्ति दशम्यां तानि सर्वदा ।।१३।।
व्रतोपवासाखिलधर्मकार्य-
सुरोत्सवाद्याखिलवास्तुकर्म ।
संग्रामयोग्याखिलवास्तुकर्म
विश्वे तिथौ सिद्ध्यति शिल्पकर्म ।।१४।।
पृथिव्यां यानि कार्याणि कर्मपुष्टिशुभानि च ।
चरस्थिराणि द्वादश्यां यात्रान्नग्रहणं विना ।।१५।।
विधातृगौरीभुजगभान्वन्तकदिनेषु च ।
उक्तानि तानि सिद्ध्यन्ति त्रयोदश्यां विशेषत: ।।१६।।
यज्ञक्रिया पौष्टिकमङ्गलानि
संग्रामयोग्याखिलवास्तुकर्म ।
उद्वाहशिल्पाखिलभूषणाद्यं
कार्यं प्रतिष्ठा खलु पौर्णमास्याम् ।।१७।।
सदैव दर्शे पितृकर्म चैव
नान्यद्विधेयं शुभपौष्टिकाद्यम् ।
मूढै: कृतं तत्र शुभोत्सवाद्यं
विनाशमायात्यचिराद् ध्रुवं तत् ।।१८।।
चतुर्दश्यष्टमी कृष्णा त्वमावस्या च पूर्णिमा ।
पुण्यानि पञ्च पर्वाणि सङ्क्रान्तिर्दिनपस्य च ।।१९।।
पञ्चपर्वसु नन्दासु न कुर्याद्दन्तधावनम् ।
तत्र कुर्यादनादृत्य स नरो विधिहन्तक: ।।२०।।
स्त्रीसेवनं पर्वसु पक्षमध्ये
मासं हि षष्ठीसु तैलवर्ज्यम् ।
नृणां विनाशाय चतुर्दशीषु
क्षुरक्रिया स्यादसकृत्तदाशु ।।२१।।
कलि १४ वसु ८ गणपति ४ षण्मुख ६ हरि १२ दुर्गा ९ तिथिषु पक्षरन्ध्रासु ।

शर५मनु१४वसु[125]८ गोदशभि१५स्तत्त्व२५विहीनान्त्यनाडिका: शुभदा:।।२२।।
नवमी त्रिविधा ज्ञेया प्रवेशनवमी प्रयाणनवमी च ।
नवमदिनं निर्गमत: प्रवेशनवमीति विख्याता ।।२३।।
नवमदिनं प्रवेशाद्यत्प्रयाणनवमी च नवमदिनम् ।
सततं नवमी त्रितयं यात्रायां प्राणहानिदं यातु: ।।२४।।
[126]एकान्तरा हि तिथयो दिवसाद्द्वितीया-
च्चापान्त्ययोर्वृषभकुम्भभयोश्च तद्वत् ।
कर्काजयोर्मिथुनकन्यकयोश्च कीट-
हर्योस्तुलामकरयो: खलु मासदग्धा:।।२५।।
मासदग्धासु तिथिषु कृतं यन्मङ्गलादिकम् ।
तत्सर्वं नाशमायाति ग्रीष्मे कुसरितो यथा ।।२६।।
पुण्यं लोकमभिप्रेप्सुरष्टम्यादिषु वर्जयेत् ।
शीर्षाकपालान्त्राणि नखचर्मतिलानि च ।।२७।।
कामदुर्गान्तकविधिनष्टेन्द्वर्कदिनेषु च ।
सकृदामलकस्नानं सम्पत्पुत्रविनाशनम् ।।२८।।
पञ्चपर्वसु पाते च ग्रहणे चन्द्रसूर्ययो: ।
नरश्चण्डालयोनि: स्यात्तैलस्त्रीमांससेवनात् ।।२९।।
[127]दिवा चन्द्रवती राका पूर्णिमानुमती निशि ।
सा पूर्णिमात्यनुमती तथापि द्विविधा भवेत् ।।३०।।
सिनीवाली दृष्टचन्द्रा नष्टचन्द्रा कुहूस्तथा ।
तिथीनां निर्णयार्थं हि एतत्सर्वमुदीरितम् ।।३१।।
ईषे च शुक्ला नवमी कार्तिके द्वादशी [128]तथा ।

---

१२५ व२ वसुशब्द एकवारम्
१२६ व१पूर्णश्लोको भिन्न: -
एकान्तरादिनपतौ दिवसाद्द्वितीयात्पूर्वोत्थचापधरयोर्घटमोक्षयोश्च ।।
कर्क्याजयोर्मिथुनकन्यकयोश्च कीटहर्योस्तुलामकरयो: खलु मासदग्धा।।२५।।
१२७ व२ अथ पूर्णमानेन्दौ दिवा

मासद्वये तृतीया स्याच्चैत्रे भाद्रपदेऽपि च ।।३२।।
अमावस्या श्रावणे च पौषस्यैकादशी सिता ।
आषाढे शुक्लनवमी माघमासे तु सप्तमी ।।३३।।
कृष्णाष्टमी नभस्ये च आषाढी कार्त्तिकी तथा ।
फाल्गुने चैत्रमासे च ज्येष्ठमासे च पूर्णिमा ।।३४।।
मन्वन्तरादितिथयः पुण्याः स्युः पितृकर्मसु ।
तासु जप्तं हुतं दत्तं फलं भवति चाक्षयम् ।।३५।।
कृष्णा पञ्चदशी माघे नभस्ये च त्रयोदशी ।
शुक्ले तृतीया वैशाखे नवम्यूर्जे युगादयः ।।३६।।
यदा कृष्णत्रयोदश्यां पैतृभेन्दुः करे रविः ।
गजच्छाया तदा ज्ञेया पितॄणां भूरि पुण्यदा ।।३७।।
स्युस्तिस्रस्तिथयो वारेऽप्येकस्मिन्सावमा तिथिः ।
तिथिर्वारत्रयेऽप्येका त्रिद्युस्पृग्द्वेऽतिनिन्दिते ।।३८।।
कृतं यन्मङ्गलं तत्र त्रिद्युस्पृगवमे दिने ।
भस्मीभवति तत्क्षिप्रमग्नौ सम्यग्यथेन्धनम् ।।३९।।
उपैत्यस्तमवाप्यार्कमुहूर्तत्रयवाहिनी।
या तिथिः स्यादखण्डाख्या न्यूना चेत्खण्डसंज्ञिता ।।४०।।
मासि मार्गशिरस्यैव व्रतानां समुपक्रमम् ।
अखण्डायां तिथौ कुर्यादनस्ते गुरुशुक्रयोः ।।४१।।[१२९]
सप्तम्यां माघशुक्लायामादित्यं पद्मकैः सुधीः ।
गव्येन पयसान्नेन मृणालैः सम्यगर्चयेत् ।।४२।।
प्रतिवर्षं भक्तियुक्त्या यावज्जीवं च यो नरः ।
अरोगी श्रियमाप्नोति रोगी रोगात्प्रमुच्यते ।।४३।।
पूजाकर्मणि सा ग्राह्या मध्याह्नव्यापिनी तिथिः ।

---

१२८ व३ सिता

१२९ व१ श्लो. ४१ द्विवारं लिखितम्

उपवासे व्रते ज्ञेया मुहूर्तत्रयवाहिनी ।।४४।।
नक्तव्रतेषु सर्वत्र प्रदोषव्यापिनी स्मृता ।
ह्रासवृद्धिसमत्वं च चिन्तयित्वा विनिर्णयम् ।।४५।।
माघे कृष्णचतुर्दश्यामुपोषित्वा शिवं व्रजेत् ।
यः कुर्याज्जागरं भक्त्या तस्य नास्ति पुनर्भवः ।।४६।।
यत्रार्धरात्रसंयुक्ता भवेदुग्रा चतुर्दशी ।
शिवरात्रिव्रतं तत्र नृत्यगीतादिनार्चयेत् ।।४७।।
फाल्गुनाद्यत्रयोदश्यां कामं दग्ध्वा शिवं व्रजेत् ।
त्रिदिनं भस्मना तेन तेजस्वी श्रियमाप्नुयात् ।।४८।।
चैत्रशुक्लचतुर्दश्यां दमनेनार्चयेच्छिवम् ।
अब्दपूजाफलं प्राप्य स नरो धनिको भवेत् ।।४९।।
वैशाखे च तृतीयायां योऽर्चयेच्च सुरान् पितॄन् ।
नाश्नुते मनसा दुःखं स नरः स्वर्गलोकभाक् ।।५०।।
वैशाख्यां विप्रमुख्येभ्यो धर्मप्रीत्या प्रयच्छति ।
पादुकोपानहौ छत्रं दध्यन्नं [130]करपात्रकम् ।।५१।।
व्यञ्जनं गन्धपुष्पान्नप्रदानं सर्वजन्तुषु ।
श्रीमान् भोगी च तेजस्वी विमानच्छत्रचामरः ।।५२।।
नृत्यगीतादिसंयुक्तः सर्वाभरणभूषितः ।
दिव्याङ्गनासमाकीर्णः स नरः स्वर्गमश्नुते ।।५३।।
शुचिशुक्ले च पञ्चम्यां यजेत्स्कन्दमुपोषितः ।
पिष्टान्नप्राशनं कृत्वा व्रणरोगात्प्रमुच्यते ।।५४।।
पूर्वविद्धा तु कर्तव्या पिष्टान्नप्राशने व्रते ।
पिष्टान्नप्राशनं नॄणां रात्रावेव विधीयते ।।५५।।
शुचिमासे चतुर्दश्यां पवित्रेनार्चयेच्छिवम् ।
अब्दपूजाफलं लब्ध्वा स नरो धनवान्भवेत् ।।५६।।

---

१३० व१ करपत्तिका

श्रावणस्यासिताष्टम्यां रोहिणी निशि संयुता ।
यदा भवेत्तदा साक्षाद्देवो जातो जनार्दनः ।।५७।।
तस्य वै जन्मचिह्नानि यः कुर्यात्समुपोषितः ।
जागरं जातकर्माद्यं स [131]वैष्णवपदं व्रजेत् ।।५८।।
मासि भाद्रपदे शुक्ले चतुर्थ्यां गणनायकम् ।
अर्चयेन्मोदकाद्यैश्च सर्वविघ्नोपशान्तये ।।५९।।
मासि भाद्रपदे यस्मिन् दिवसे सुरराजभम् ।
मध्याह्नादधिकं तत्र ज्येष्ठायाः [132]परिपूजनम् ।।६०।।
नवम्यामश्वयुक्छुक्ले लक्ष्मीं देवीं समर्चयेत् ।
सरस्वतीमायुधानि युद्धे जयमवाप्नुयात् ।।६१।।
विजयादशमी तत्र सर्वकार्येष्वनिन्दिता ।
यात्रायां जयदा राज्ञां सम्यक्सम्पत्प्रयच्छति।।६२।।[133]
ऊर्जे शुक्लचतुर्थ्यां यो भुजगान्भक्तितो भजेत् ।
क्षीरपिष्टाद्यैश्च न तेभ्यो भयमश्नुते ।।६३।।
आरभ्यैकादशीं तत्र यावच्च दिनपञ्चकम् ।
तद्भीष्मपञ्चकं ज्ञेयं नृणामघविनाशनम् ।।६४।।
वत्सरं तप्यते पुण्यं तपसः कार्तिके लभेत् ।
कार्तिके तपसः पुण्यं लभते भीष्मपञ्चके ।।६५।।
कार्तिक्यां कृत्तिकायोगे गरुडध्वजदर्शनात् ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।।६६।।
उत्सृजेद्वृषभं तत्र उपोषित्वा यथाविधि ।
कुमारं वा यजेत्तत्र सर्वपापैः प्रमुच्यते ।।६७।।

---

१३१ व२ कृष्णपदं
१३२ व२ प्रतिपूजनम्
१३३ व१ अधिकः श्लोकः– उदये दशमी किंचित् संपूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा।।

शुद्धा त्रेधा तथा विद्धा भिन्ना न्यूना समाधिका ।
त्रिविद्धैका पुनर्भिन्ना द्वादश्यूनसमाधिकैः ।।६८।।[१३४]
आद्यासु षट्सु पूर्वैव व्यवस्थानान्तरद्वये ।
गृहमेधियतीनां च नवम्यां तु परेऽहनि ।।६९।।
विद्धात्रयेऽपि पूर्वैव व्यवस्थानन्तरद्वये ।
अपरैरनिशेषाः स्युः सप्तम्यां तु व्यवस्थितिः ।।७०।।[१३५]
यामत्रयाधिकां यत्र वृद्धिगामी त्वमा यदि ।
पितृकर्मणि सा ग्राह्या तिथिः पूर्वा क्षयात्मिका ।।७१।।
अपराहणे सुसम्पूर्णा सायंस्पृक् स्याद्यदा तिथिः ।
सैव प्रत्याब्दिकी ग्राह्या नापरा पुत्रहानिदा ।।७२।।
क्षये पूर्वतिथौ शोध्यं योज्यं वृद्धौ तिथिर्भवेत् ।
तिथ्यन्तरदलं श्राद्धे स्वाध्यायेऽथ व्रतेऽपि तत् ।।७३।।
तिथेः पञ्चदशो भागः पक्षयोः स्यात्क्षणा तिथिः।
यत्कर्मोक्तं तिथौ यस्यामस्यामप्यखिलं भवेत् ।।७४।।
यो जानाति हि पञ्चाङ्गं स्फुटं लोके स दैववित् ।
कालरूपेश्वरं भ्राजन्मूर्तीनामृतमुद्भवम् ।।७५।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां तिथिस्वरूपाध्यायो द्वादशः।।१२।।

---

१३४ व२ – सप्तया त्रये द्वादश्या भेदिता तेन भेदाः भागे एकादश्या इत्यर्थः।
१३५ व२ श्लो. लोपः

१३

२.१३.० वारस्वरूपम्

राजाभिषेकोत्सवमङ्गलाश्च
सेवाहवस्त्वौषधचित्रकर्म ।
धातुक्रियाभूषणलाक्षचर्म-
धान्योर्णकोष्ट्रादि रवौ विदध्यात् ।।१।।
मुक्ताम्बुशङ्खस्फटिकेक्षुरौप्य-
क्षीरौषधोद्यानकृषिक्रियाद्यम् ।
स्त्रीनृत्यगीताखिलवास्तुकर्म
शशाङ्कवारे रविवासरोक्तम् ।।२।।
विषाग्निशस्त्राहवभेददम्भ-
स्तेयानृतोग्रावधबन्धकर्म ।
छेदप्रवालाखिलधातुकर्म
सदाभिचारं च कुजेऽह्नि कुर्यात् ।।३।।
[136] नेपथ्यवादाहवशिल्पसन्धि-
व्यायामपण्याखिललेखनाद्यम् ।
धातुक्रियाविद्रुमभूषणाद्यं
बुधेऽह्नि कार्यं [137]गणितप्रपञ्चम् ।।४।।
यज्ञक्रियामङ्गलपुष्टिविद्या-
हेमाम्बरोद्यानविभूषणाद्यम् ।
भैषज्यशास्त्राहवनृत्यगीत-
चरस्थिराद्यं सुरपूज्यवारे ।।५।।
स्त्रीगीतमुक्ताफलवज्ररौप्य-

---

१३६ वे.,चौ. नैपुण्यवाहाहव-
१३७ व२ पूर्णशब्दस्य लोपः

सुगन्धशय्याभरणाम्बराद्यम् ।
उद्यानकृष्यम्बुलतास्त्रपण्य-
माङ्गल्यपुष्पादिसितेऽह्नि कुर्यात् ।।६।।
समस्तवस्तुग्रहणाश्मसीस-
दीक्षात्रपुस्थैर्यगृहादिकर्म ।
खरोष्ट्रगोहेमतुलायदास-
पापानृताद्यं रविपुत्रवारे ।।७।।
सूर्यः स्थिरः शीतकरश्चरात्मा
धराज उग्रः शशिजो विमिश्रः।
देवन्द्रपूज्यो लघुरिन्द्रशत्रुः
पूज्यो मृदुस्तीक्ष्णतनुश्च सौरिः ।।८।।
अभ्यङ्गो रवि[१३८]वासरे तनुभृतां दुःखप्रदः कान्तिदः
सोमाहे कुजवासरे निधनदः श्रीकीर्तिदश्चन्द्रजे ।
जीवे शत्रुवित्तवृद्धिदः सितदिने रोगप्रदः सूर्यजे
भोगारोग्यवित्तवृद्धिदश्च नियतं श्रीकीर्तिलक्ष्मीप्रदः ।।९।।
अनुक्तवारतिथिषु त्वमायां विष्टिपातयोः।
औषधेन युतं तैलं न दूष्यं ग्रहणं विना ।।१०।।[१३९]
प्रभाकरस्योदयनात्पुरे स्या-
द्वारप्रवृत्तिर्दशकन्धरस्य ।
चरार्धदेशान्तरनाडिकाभि-
रूर्द्धं तथाधोऽप्यपरत्र तस्मात् ।।११।।
वारप्रवृत्ते[१४०] घटिका दिनेशा-
त्कालाख्यहोरापतयः क्रमेण ।
सार्धेन नाडीद्वितयेन षष्ठः

---

१३८ व१-उपरिप्रभागे लिखितम्- वासरे तनुभृतां दुःखप्रदः कान्तिदः सोमाहे कुजवासरे।
१३९ व१ पूर्णश्लोकस्य लोपः
१४० व३ र्धनपुनश्च

षष्ठश्च षष्ठश्च पुनः पुनश्च ।।१२।।
वारप्रवृत्तिविज्ञानं क्षणवारार्थमेव तत् ।
अखिलेष्वन्यकार्येषु दिनादिरुदयो रवेः ।।१३।।
यस्य ग्रहस्यैव च वासरे य-
त्कर्मप्रदिष्टं विपुलं च कार्यम् ।
तत्कालहोरासु च तस्य नूनं
दिक्छूलपूर्वादि विचिन्तनीयम् ।।१४।।
बलप्रदस्य ग्रहवासरे य-
च्चोद्दिष्टकार्यं समुपैति सिद्धिम् ।
सुदुर्बलस्य ग्रहवासरे त-
त्प्रयत्नपूर्वं त्वपि नैव साध्यम् ।।१५।।
पूर्णेन्दुशुक्रज्ञसुरेज्यवाराः
सर्वेषु कार्येषु सुपूजिताः स्युः ।
ये सूर(सूर्य)सूर्यात्मजभौमवाराः
प्रोक्तेषु कार्येष्वपि शोभनाः स्युः ।।१६।।
रक्तो रविर्गौरनिभः शशाङ्कः
कुजोऽतिरिक्तः शशिजश्च पीतः ।
सुवर्णवर्णो गुरुरास्फुजिच्च
रौप्योपमः कृष्णतनुश्च सौरिः ।।१७।।
जीर्णं जलार्द्रं दहनप्रदग्धं
लक्ष्मीकरं लाभकरं प्रियाप्तिम् ।
मलप्रदिग्धं धृतमम्बरं य-
त्करोति सूर्यादिखगः स्ववारे ।।१८।।
आदित्यभौमार्किदिनेषु धीमा-
न्न दन्तकाष्ठं क्षुरकर्म कार्यम् ।
कुर्वन्नवाप्नोति फलं समग्रं
शस्त्रेण सम्यक् स्वशरीरघातम् ।।१९।।

सूर्यारयोर्वासरवर्गकाल-
    होरासु यन्निर्मितमन्दिरं तत् ।
अपि प्रविष्टं गृहमग्निना त-
    द्द्राग् दह्यते पावकतारकासु ।।२०।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां वारस्वरूपाध्यायस्त्रयोदशः ।।१३।।

१४

२.१४.० नक्षत्रस्वरूपम्

नासत्यान्तकवह्निधातृनिशिपा रुद्रोऽदितिश्चाङ्गरा
वाताशा: पितरो भगोऽर्यमरवी त्वष्टा समीर: क्रमात् ।
इन्द्राग्नीत्युडुपाश्च मित्रसुरपौ कोणेश्वर: शम्बरं
विश्वे विष्णुवसूदपाजचरणाहिर्बुध्न्यपूषाभिधा: ।।१।।
यात्राभेषजभूषणविद्याश्वेभाजशिल्पवस्त्राद्यम् ।
उत्सवमङ्गलकार्यं कर्तव्यं दस्रनक्षत्रे[१४१] ।।२।।
साहसदारुणशत्रुप्रशमननिक्षेपकूपकृष्याद्यम् ।
[१४२]विषवधबन्धनदहनप्रहरणकार्याणि भरणीषु ।।३।।[१४३]
अग्निपरिग्रहसाहसरिपुवधदहनास्त्रशस्त्रकर्माद्यम्[१४४] ।
धातुर्वादविधानं विवादलोहाश्म बहुलायाम्[१४५] ।।४।।
सुरनरसद्माद्यखिलं विवाहधनधान्यसंग्रहोपनयम्[१४६] ।
उत्सवभूषणमङ्गलमजभे कार्यं सपौष्टिकं कर्म[१४७] ।।५।।
[१४८]शान्तिकपौष्टिकशिल्पव्रतकर्मोद्वाहकर्ममङ्गलाद्यखिलम् ।
सुरसंस्थापनवास्तुक्षेत्रारम्भादि सिद्ध्यते सौम्ये ।।६।।
प्रहरणदारुणबन्धनविग्रहविषसन्धिवह्निकर्माद्यम् ।

---

१४१ व२ अश्विनि
१४२ व३ विषबन्धनदहनप्रहरणकार्याणि
१४३ व२ भरणी
१४४ व१ कर्माढय
१४५ व२ अथ कृतकायाम्
१४६ चौ. नयनम्
१४७ व१ कर्मशब्दस्य लोप:
१४८ व१ शातिक

छेदनदहनोच्चाटनमारणकृत्यं च रौद्रभे कुर्यात् ।।७।।[१४९]
शान्तिकपौष्टिकयात्राव्रतप्रतिष्ठानृपाहवाद्यखिलम् ।[१५०]
भूषणवास्तुविधानं वाहनकृषिकर्म सप्तमे धिष्ण्ये ।।८।।
स्थिरचरशान्तिकपौष्टिकभूषणशिल्पव्रतोत्सवाद्यखिलम् ।
वनिताकरसंग्रहणं [१५१]त्यक्त्वाँन्यत्कर्म सिद्ध्यते पुष्ये ।।९।।
उद्धत[१५२]रिपुमदभञ्जनसाहसवाणिज्यकपटकर्म ।
अनलायससंग्रहणक्ष्वेडस्तेयादि [१५३] सर्पभे कार्यम् ।।१०।।
युवतीकरसंग्रहणं [१५४]वापीकूपतडागोत्सवाद्यं च ।
क्षितिपत्याहवसर्वं पितृधिष्ण्ये च पैतृकं कार्यम् ।।११।।
शिल्पप्रहरणबन्धनदारुणचित्रकापटं कर्म ।
[१५५] विटनटनमासवाद्यं भाग्ये कुड्यप्रहरणं च ।।१२।।
उपनयनं करपीडनमखिलं स्थिरशिल्पभूषणं त्वखिलम् ।
पुरसदनप्रारम्भणमम्बररणकार्यमर्यमर्क्षेषु ।।१३।।
भेषजपात्र[१५६]विद्याविवाहशिल्पव्रताम्बराभरणम् ।
सुरसंस्थापनमखिलं वास्तुप्रारम्भमर्कनक्षत्रे ।।१४।।
शान्तिकपौष्टिकमखिलं स्थिरकार्यवस्त्रभूषणं शिल्पम् ।
उपनयनं वास्तुकृषिक्षितिपतिकार्यं च चित्रायाम् ।।१५।।
सुरनरसद्मविधानं भूषणवैवाहमङ्गलाद्यखिलम् ।
बीजारोपणशस्त्रक्षितिपतिसमरं विभूषणं स्वातौ ।।१६।।

---

१४९ व३ द्वितीयतृतीयचतुर्थपादानां लोप:
१५० व३ श्लो.८ प्रथमपादलोप:
१५१ व३ त्य-अक्षरत: श्लो.१० प्रथमपादस्य तथा द्वितीयपादस्य अनलायसंग्रहणपर्यन्तं लोप:
१५२ वे. उद्धृत
१५३ व२ सार्पभे
१५४ व१ तडागसस्याश्च, व२ तडागसस्याद्यं
१५५ वे.चौ. नटनद्रुमासवाद्यं
१५६ वे.पात्रा

उपचयवस्तुग्रहणं [157]भूषणनववस्त्रचित्रकार्यं च ।
भेषजशकटप्रहरणशिल्पविचित्रं द्विदैवभे कार्यम् ।।१७।।
करमर्दनमुपनयनं यात्रासुरसद्मसन्निवेशाद्यम् ।
स्थिरचरकार्यं त्वखिलं [158]भूषणमश्वेभकर्म मित्रर्क्षे[159] ।।१८।।
रिपुवधभेदनदहनप्रहरणवह्निलोहकार्याद्यम् ।
स्तेयविधानं विविधं शिल्पं चित्रं सुरेशभे[160] कार्यम् ।।१९।।
कृषिभवनविपिनकार्यं वापीकूपादिबीजनिर्वापम् ।
समरविभूषणशिल्पं विग्रहसन्धिश्च मूलनक्षत्रे ।।२०।।
शम्बरबन्धनमोक्षणवापीकूपादिनिग्रहं हननम् ।
द्रुमखण्डनवनचारिणपक्षिणां च यत्कार्यमम्बुभे कार्यम् ।।२१।।
स्थापनमुण्डनमण्डनवास्तुनिवेशं प्रवेशनाद्यं च ।
बीजारोपणवाहनभूषणवस्त्रं च वैश्वभे कार्यम् ।।२२।।
शान्तिकपौष्टिकमङ्गलविचित्रकृषिशिल्पमम्बराद्यं[161] च ।
धामविधानस्थापनमुपनयनं विष्णुभे कार्यम् ।।२३।।
उपनयनं चौलविधिं जलतुरगोष्ट्रेभदेवनिर्माणम् ।
कृषिभवनाहवमम्बरविपिनोद्यानाश्मभूषणं वसुभे ।।२४।।
समरारम्भविभूषणगजबलतुरगोष्ट्रशस्त्रनावाद्यम् ।
मुक्ताफलरजतमयं वरुणर्क्षे वास्तुकर्माद्यम् ।।२५।।
अजचरणार्क्षे कुर्यात्साहसजलयन्त्रशिल्पकर्माद्यम् ।
[162]मृद्धातुर्वादच्छेदनकृषिमहिषोष्ट्राजेभविक्रयणम् ।।२६।।

---

१५७ व३ भूषणनववस्तु
१५८ भूषणश्वेभ चौ.
१५९ व३ मित्रनक्षत्रे
१६० व२ सुवेशभे कायं
१६१ व२ शिल्पकर्म च वाराद्यं
१६२ व२ धातुर्वाद

परिणयनं व्रतबन्धनसुरनरसदनप्रतिष्ठां च ।
आहिबुध्न्ये भूषणमम्बरवास्तुप्रवेशमभिषेकम्।।२७।।
स्थलजलभूषणमखिलं धामविधानं त्वमर्त्यमर्त्यानाम् ।
करपीडनमुपनयनं मङ्गलमखिलं च पौष्णभे कार्यम् ।।२८।।
स्थिरसंज्ञं भचतुष्टयमम्बुजयोन्युत्तरात्रितयम् ।
नरपतिपत्तनसदनं प्रवेशबीजादि सिद्ध्यते तत्र ।।२९।।
दारुणभानि पुरन्दरकोणपशिवसर्पदेवतानि स्युः ।
दारुणबन्धनदहनप्रहरणकर्माणि [१६३]सिद्ध्यतां यान्ति ।।३०।।
पूर्वात्रितयं पैतृभमुग्राख्यमिदं पञ्चकं याम्यम् ।
[१६४]मारणभेदनबन्धनविषदहनं पञ्चके कार्यम् ।।३१।।
सुरसचिवाश्विनिहस्ततारा: स्युः क्षिप्रसंज्ञितास्ताश्च ।
औषधपण्यविभूषणशिल्पलताज्ञानकर्मसिद्धिः स्यात्।।३२।।
मृदुवृन्दं भचतुष्टयमन्त्यत्वाष्ट्राख्यसौम्यमित्रर्क्षम् ।
मङ्गलवनिताभूषणमन्दिरगीतादि सिध्यते तत्र ।।३३।।
भद्वितयं श्वसनसखं चेन्द्राग्निभं मिश्रसंज्ञे तत् ।
निखिलानि च साधारणकार्याण्युग्राणि[१६५] कार्याणि[१६६] ।।३४।।
अदितिश्रुतिभात् त्रितयं चरसंज्ञं पञ्चमरुद्धं च ।
वाहनकर्मविभूषणचरकार्योद्यानमन्त्रसिद्ध्यै तत् ।।३५।।
कथितान्यपि लघुवृन्दे चरसंज्ञे तानि कार्याणि ।
[१६७]मणिमुक्ताहेमफलसद्रजतत्रपुसीसकर्माणि ।।३६।।
मृदुवृन्दे कथितान्यपि स्थिरवृन्दे तानि कार्याणि ।
चरधिष्ण्ये कथितान्यपि कार्याणि लघुगणे नूनम् ।।३७।।

---

१६३ व१,व२,व३ सिध्यतेप्येषु
१६४ व३ मारणबन्धनभेदन
१६५ व२ तत्र शब्दोऽधिक:
१६६ व१ कर्माणि
१६७ व३ मणिचरकार्योमुक्ता

यद्यद्दारुणभोक्तं तत्तत्कर्म त्वथोग्रभे कार्यम् ।
साधारणमिश्राख्यं क्रूरोग्रं तीक्ष्णदारुणं तुल्यम् ।।३८।।[१६८]
साधारणवृन्दोक्तं यत्कर्माद्यं क्रूरभे सदा कार्यम् ।
ध्रुवमचलं क्षिप्रलघु चरं चलं मैत्रमृदुसंज्ञे ।।३९।।[१६९]
निखिलेष्वपि धिष्ण्येष्विह सामान्यं कार्यमित्युक्तम् ।
तत्तत्प्रकरणकथितं तदेव मुख्यं विजानीयात् ।।४०।।
पुष्ये धनिष्ठास्वदितौ हरीन्द्वो-
स्त्वाष्ट्रे करान्त्ये तिसृषूत्तरासु ।
दस्रे समैत्रेऽपि च कर्णवेधः
शुभप्रदो व्यर्कजवासरेषु ।।४१।।
धातृद्वये कोणपपितृपुष्ये
हस्तत्रये त्र्युत्तरमैत्रभेषु ।
पौष्णे धनिष्ठास्वथ वाश्विनीषु
बीजोप्तिरुत्कृष्टफलप्रदा स्यात् ।।४२।।
पूर्वात्रये मूलमृगादिपञ्च-
स्वथाश्विनीषु त्रितयेषु हस्तात् ।
सविष्णुधिष्ण्येष्वपि सर्वविद्या-
प्रारम्भ इष्टः शुभवासरेषु ।।४३।।
हस्तादिपञ्चस्वथ धातृपौष्ण-
दास्रादिताज्ये तिसृषूत्तराषु ।
नवाम्बरं धार्यमथो ज्ञजीव-
शुक्रांशलग्नेषु शुभोदये वा ।।४४।।
मित्रेन्दुपौष्णोत्तररोहिणीषु
[१७०]देवेज्यवारीश्वरवारिभेषु ।

---

१६८ व१ (ग्रंथव्याख्या)यच्चोग्रभोक्तं तत्कार्यं त्वथोग्रभे कार्यं साधारणवृंदोक्तं यत्कर्माद्ये क्रूरभे सदा कार्यम्।

१६९ वे. ३८कड-पादद्वयं पुनः पठितम्।

प्रारम्भणं सर्वजलाशयानां
कार्यं सितेन्द्वंशकवारलग्ने ।।४५।।
मृदुध्रुवक्षिप्रचरेषु भेषु
नवान्नभुक्तिर्विहिता शिशूनान् ।
शुभांशलग्नेषु च वासरेषु
समेषु मासेषु च षष्ठमासात् ।।४६।।
पूर्णेन्दुलग्नांशकवासरेषु
नवान्नभोक्ता सततं सदन्नदः ।
क्षीणेन्दुलग्नांशकवासरेषु
स भिक्षुकः [१७१]स्यादथ पीडितात्मा ।।४७।।
ध्रुवोग्रसाधारणदारुणर्क्षे
निक्षिप्तमर्थं त्वथवा प्रनष्टम् ।
चौरैर्हृतं दत्तमुपप्लवे वा
विष्ट्यां च पाते तु न लभ्यते तत् ।।४८।।
मघाविशाखानलसार्पयाम्य-
नैर्ऋत्यरौद्रेषु च सर्पदंष्टः।
सुरक्षितो विष्णुरथेन सोऽपि
प्राप्नोति कालस्य मुखं मनुष्यः ।।४९।।
पूर्वात्रयं स्वातिभुजङ्गरौद्र-
सुरेश्वरर्क्षेषु च यस्य रोगः ।
स्याद्रक्षितुं देवचिकित्सकोऽपि
क्षितावशक्तः किल रोगिणं तम् ।।५०।।
कृच्छ्रात्स्फुटं प्राणिनि मित्रपौष्णे
मासाद्विमुक्तिः शशिविश्वधिष्ण्ये ।

---

१७० व३ वागीश्वर-
१७१ व३ स्वामय

रोगस्य मुक्तिः पितृदैवधिष्ण्ये
वारैर्भवेद्विंशतिभिश्च नूनन् ।।५१।।
पश्चाद् द्विदैवेन्द्रकरेषु भेषु
मूलाश्विनाग्नित्रितये नवाहात् ।
तोयेशचित्रान्तकविष्णुभेषु
नैरुज्यमेकादशभिर्दिनैश्च ।।५२।।
पुष्ये त्वहिर्बुध्न्यपुनर्वसौ च
ब्राह्मार्यमर्क्षेषु च सप्तरात्रात् ।
ऋक्षेशरूपं कनकेन कृत्वा
तल्लिङ्गमन्त्रैश्च सुगन्धपुष्पैः ।।५३।।
वस्त्राक्षतैर्गुग्गुलधूपदीपै-
र्नैवेद्यताम्बूलफलैश्च सम्यक् ।
पूजां च कृत्वामयनाशनाय
द्विजाय दद्यादतुलं शिवाय ।।५४।।
मृदुध्रुवक्षिप्रचरेषु मूल-
मघाविशाखासु हलप्रवाहम् ।
धान्याभिवृद्ध्यै प्रथमं प्रकुर्या-
त्समुष्कसम्पूर्णगुणैर्वृषैश्च ।।५५।।
द्विदैववारीशशशाङ्कमूल-
ध्रुवेषु तिष्यार्यमपौष्णभेषु ।
वनौषधीगुल्मलतादिकाना-
मारोपणं नूनमुपैति शस्तम् ।।५६।।
शशाङ्कतोयेशकरान्त्यमित्र-
ध्रुवाम्बुपित्र्ये वसुदैवते च ।
उद्यानवाप्यादितडागकूप-
कार्याणि सिद्ध्यन्ति जलोद्धृतं तत् ।।५७।।
हस्तत्रये सौम्यहरित्रये च

पौष्णद्वये पुष्यपुनर्वसौ च ।
मैत्रे च सर्वाणि हि कुञ्जराणां
कर्माणि शस्तान्यपि यानि तानि ।।५८।।
साधारणे दारुणभे तथोग्रे
रिक्तातिथौ सूर्यकुजार्किवारे ।
दुर्गादिकानां यजनं प्रशस्तं
क्षेत्राधिपस्यापि सुरासवाद्यैः ।।५९।।
त्वाष्ट्रध्रुवश्रीपतिभेषु रिक्ता-
दशाष्टमीपातदिने पशूनाम् ।
यात्राप्रवेशं न कदाचिदेव
कुर्याच्च तेषामभिवृद्धिकाङ्क्षी ।।६०।।
तिस्रोत्तरामित्रगुरुश्रविष्ठा-
हस्तेन्दुवारीश्वरपौष्णभेषु ।
सङ्गीतनृत्यादिसमस्तकर्म
कार्यं विभौमार्कजवासरेषु ।।६१।।
पूर्वात्रये पुष्यपुनर्वसौ च
मित्रत्रये पौष्णवसुद्वये च ।
दस्रेन्दुहस्तद्वितयेषु भेषु
गवां प्रकुर्यात्क्रयविक्रयं हि ।।६२।।
पौष्णद्वयेन्दुश्रवणत्रये च
हस्तत्रये पुष्यपुनर्वसौ च ।
शस्तं नृपाणामवलोकनं त-
द्विशेषतस्तिग्मरुचेश्च वारे ।।६३।।
हस्तत्रये पुष्यपुनर्वसौ च
शशाङ्कविष्णुत्रितयेऽश्विनीषु ।
पौष्णेन्द्रधिष्ण्ये क्षुरकर्म शस्तं
व्यर्कारशन्यंशकवारलग्ने ।।६४।।

अष्टाब्जजर्क्षः पितृपञ्चकश्च
षड्वह्निधिष्ण्यश्चतुरर्यमर्क्षः ।
त्रिमैत्रभः पद्मजसन्निभोऽपि
क्षौरी नरोऽब्दान्निधनं गतः सः ॥६५॥
महीभर्ता पञ्चमपञ्चमेऽह्नि
क्षौरं च कार्यं हितमुक्तभेषु ।
न लभ्यते चेत्तु तदुक्तधिष्ण्यं
तद्भोदये वा निखिलं विधेयम् ॥६६॥
यात्राहवेऽप्युत्कटभूषिते वा
भुक्तोत्तरे रात्रिषु सन्ध्ययोश्च ।
क्षौरं न कुर्यात्खलु चात्मनश्च
श्रियाभिलाषी न कदाचिदेव ॥६७॥
भूदेवभूमीशनिमित्ततोऽपि
बन्धाद्विमुक्तो मृतसुतकेऽपि ।
आधानकाले निखिलाधराणां
क्षौरं विधेयं खलु निन्दितर्क्षे[१७२] ॥६८॥
स्वातौ मघायां निर्ऋतौ ध्रुवेषु
मित्रेन्दुहस्तेषु च कन्यकानाम् ।
पाणिग्रहस्त्विष्टफलप्रदः स्या-
दविद्धभेष्वेव गुणान्वितानाम् ॥६९॥
पौष्णद्वये मित्रहरिद्वयेन्दु-
हस्तादितीज्येषु च भेषु नूनम् ।
यानं नृणामिष्टफलप्रदे स्या-
त्त्यक्त्वा त्रिपञ्चादिससप्तभानि ॥७०॥
मघाविशाखानलमम्बुसार्प-

१७२ व२ निन्द्यधिष्ण्ये

रुद्रान्तकत्वाष्ट्रसमीरणानि ।
यानेष्वनिष्टान्यपराणि भानि
न शोभनान्येव न निन्दितानि ।।७१।।
ऐन्द्राजपादाब्जजभार्यमाणि
शूलानि भानि क्रमतश्च दिक्षु ।
न याति याता यदि शूलभेषु
सुरेशतुल्यः समरे बलेन ।।७२।।
सर्वद्वारिकधिष्ण्यान्यमरेज्यादित्यमैत्रदस्रसंज्ञानि ।
[173]तत्र तु [174]यायान्नियतं धनकीर्तिर्लभ्यतेऽप्यचिरात् ।।७३।।
स्थिरसाधारणधिष्ण्यैः पूर्वाह्णे नैव गमनं तत् ।
गमनं न दारुणार्क्षे दिनदलसमये न कार्यमनवरतम् ।।७४।।
क्षिप्रैर्नापरवासरसमये मृदुमिश्रैर्न रात्रिमुखे ।
उग्रगणैर्निशिसमये चरधिष्ण्यैरुषसि न श्रेष्ठम् ।।७५।।
सर्वस्मिन्नपि समये सर्वासु च दिग्विदिक्ष्वेव ।
सर्वद्वारिकधिष्ण्यान्यभिशुभदान्यतुलमखिलनृणाम् ।।७६।।
वस्वपरार्धात्पञ्चकधिष्ण्ये गेहस्य गोपनं नैव ।
दक्षिणदिङ्मुखगमनं दाहं प्रेतस्य काष्ठसंग्रहणम् ।।७७।।
परकृतदोषं निखिलं निहन्ति पुष्यः परो न पुष्यकृतम् ।
द्वादशनैधनगेन्दौ बलवान्पुष्यस्त्वभीष्टदः सततम् ।।७८।।
प्रत्यरिनैधनसंज्ञौ विपत्करौ वापि जन्मसंज्ञो वा ।
पाणिग्रहणं मुक्त्वा नूनं सर्वार्थसिद्धिदः पुष्यः ।।७९।।
मृगगणमध्ये सिंह उडुगणमध्ये तथैव पुष्यश्च ।
निजबलसहितोऽप्येवं त्रिविधोत्पातैर्न शक्तिमान्निहितः ।।८०।।
लघुधिष्ण्ये स्थिरमृदुभे विष्णुभेषु च सर्वदा कार्यम् ।

---

१७३ व१ तत्रानुपातनियत
१७४ व२ यायानियतं

वरतुरगाखिलकर्म त्राणं तनुमस्तकादीनाम् ।।८१।।
पूर्वात्रयभुजगान्तकपितृद्विदैववह्निमूलानि ।
[१७५]पातालवदनभानि त्वेषु तु कार्यं त्वधोमुखं कर्म ।।८२।।
दस्रेन्द्विन्द्रकरादितिमैत्रमरुत्त्वाष्ट्रपौष्णानि ।
पार्श्वाननभान्येषु तु पार्श्वाननकार्यमखिलं तत् ।।८३।।
हरिहरधात्र्युत्तरवसुवारीशेज्यधिष्ण्यगणम् ।
ऊर्ध्वमुखाख्यं त्वत्र तु कार्याण्यखिलानि कार्याणि ।।८४।।
पितृवसुतिष्येन्द्वनलत्र्युत्तरभाग्यद्विदैवचित्राणि ।
देवचिकित्सककोणपसहितान्येतानि कुलभानि ।।८५।।
अजचरणादितिपूषाधातृमरुद्विष्णुवारीशशक्राणि ।
अहियमधातृजलान्युपकुलभान्यन्यानि कुलभानि ।।८६।।
उपकुलभेषु च याता विजयं प्राप्नोत्यसंशयं [१७६]क्षिप्रम् ।
कुलभेषु च भङ्गः स्याद्यातुः सन्धिस्तयोः कुलाकुलभे[१७७] ।।८७।।
कुलभेषु च [१७८]यातास्ते मनुजा भवन्ति[१७९] कुलमुख्याः ।
उपकुलभे परविभवाद्भोक्तारस्त्वन्यभेषु सामान्याः ।।८८।।
रविचन्द्रसुरेज्ययमाः कुलाख्या ह्युपकुलौ च सितभौमौ ।
कुलाकुलजः शशितनयः सन्धिकृदुभयोः क्षितीशयोर्नित्यम् ।।८९।।
अन्धकमथ मन्दाख्यं मध्यमसंज्ञं सुलोचनं पश्चात् ।
पर्यायेण च गणयेच्चतुर्विधं ब्रह्मधिष्ण्यतः ।।९०।।
रविरविजभौमवारे भद्रायां विषमपादमृक्षं चेत् ।
त्रिपुष्कराख्यो योगो त्रिगुणफलो यमलभैर्द्विगुणम् ।।९१।।

---

१७५ व३ बलिसद्मवदन
१७६ व३ क्षिप्रात्
१७७ व२ कुलाकुलेषु
१७८ व१,व२,व३ जातास्ते
१७९ व३ भवति कुलमुख्यः

त्रितयं गवां च दद्याद्दोषस्यापनुत्तये विद्वान् ।
द्वितयं द्विपुष्करेऽपि च तिलपिष्टैर्विप्रमुख्येभ्यः ।।९२।।
गुणगुणऋतुपवनगुणेन्दुकृताग्निपवनशराः ।
द्विभुजशरेन्द्विन्दुयुगयुगाग्निरुद्राब्धिनेत्रगुणाः ।।९३।।
वेदशतद्विद्विरदा [180]दास्रादीनां च तारकासंख्या ।
हृतनष्टादिषु कार्यं तारकसंख्यैः पृथक् पृथग्रूपैः ।।९४।।
अश्वमुखसमानरूपं योन्याकारं च नापितक्षुरवत् ।
सुरगृहसदृशं [181]शश्वन्मस्तकसदृशं मृगस्यैव ।।९५।।
मणिनिभनोकःसदृशमाशुगसदृशं च चक्रसंकाशम् ।
[182]प्राकारमञ्चशय्याहस्ताकारं च मौक्तिकाकारम् ।।९६।।
रत्ननिभं तोरणवत् बलिसदृशं [183]कुण्डलाकारम् ।
केसरिविक्रमसदृशं शय्याकारं [184]गजेन्द्रदन्ताभम् ।।९७।।
वरशृङ्गाटकरूपं विकसितपद्मोपमं नित्यम् ।
वरशय्यासदृशमतः फलसदृशं मातुलुङ्गस्य ।।९८।।
अश्वमुखतारकाणां कथितानीमानि मुखरूपाणि ।
दैवविदखिलं सम्यग्ज्ञात्वा सर्वं वदेन्नियतम् ।।९९।।
अर्कगतागतसंस्थं भत्रितयं नेष्टमुभयतस्त्विष्टम् ।
षोडशधिष्ण्यं नवकं शिष्टमनिष्टं च लाङ्गले चक्रे ।।१००।।
अभिजिद्भभोगमेतद्विश्वेदेवान्त्यपादमखिलं यत् ।
आद्यश्चतस्रो नाड्यो हरिभस्यैतच्च रोहिणीविद्धम् ।।१०१।।
आरार्कार्क्यहिकेतुभिराक्रान्तं विद्धभं च तत्सर्वम् ।
मङ्गलकार्ये सततं त्याज्यं चोत्पातदूषितं धिष्ण्यम् ।।१०२।।

---

१८० व३ दस्त्रदीना
१८१ व२ शश्वतमस्वकसदस्यैव
१८२ व३ प्राकारसदृशय्येव हि
१८३ व३ कुलाकारं
१८४ व३ गजेन्द्रवैलास

पञ्चशलाकाचक्रे पाणिग्रहणे भवेधविधिरुक्तः ।
शस्तः शुभमित्रकृतः सप्तशलाकजमितरत्र ।।१०३।।
निहितं त्रिविधोत्पातैः क्रूराक्रान्तं च विद्धभं निखिलम् ।
त्याज्यं तच्छुभकर्मणि न पादतः पादधिष्ण्यं च ।।१०४।।
तक्षकविषाग्निदग्धः स नरो म्रियते किमेकदेशो वा ।
तं मृतधिष्ण्यं निखिलं मृतभे च कृतं मृत्युमेवैति ।।१०५।।
नक्षत्रे यो [१८५]दोषो न हन्ति राशिं न शक्यते हन्तुम् ।
तद्गात्रमेव गरलं पित्रादीनां न हन्यते यद्वत् ।।१०६।।
लघुमैत्रध्रुवमृदुभे सितेन्दुबुधजीववारेषु ।
हेमरजतादिभाजनभोजनमारोग्यममृतयोगेषु ।।१०७।।
हस्तत्रये पुष्यपुनर्वसौ च
विष्णुत्रये चाश्विनपौष्णभेषु ।
मित्रेन्दुमूलेषु च सूर्यवारे
भैषज्यमुक्तं कुजवासरेषु ।।१०८।।
अदितिस्थिरमरुदहिधिष्ण्यं शुक्रेन्दुवासरे त्यक्त्वा ।
परवासरऋक्षेषु तु शुभदं स्नानं च रोगमुक्तानाम् ।।१०९।।
क्षिप्राचलचलमृदुभे रिक्तामावर्जितेषु दिवसेषु ।
निखिलेषु च वारेषु त्रिपुष्करे न भूषणं धार्यम् ।।११०।।
स्थिरसाधारणचरभे लघुमैत्रे व्यर्कजेषु वारेषु ।
तेषामेव विलग्ने मणिकनकमयं विभूषणं धार्यम् ।।१११।।
क्षिप्रमृदुध्रुवचरभे शशिसितयोर्वासरेषु तल्लग्ने ।
मुक्ताफलरजतमयं भूषणमखिलं सवज्रकं धार्यम् ।।११२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां नक्षत्राध्यायश्चतुर्दशः ।।१४।।

---

१८५ व३ दोषा निहंति

१५

२.१५.० योगाध्यायः

विष्कुम्भः प्रीतिरायुष्मान्सौभाग्यः शोभनाह्वयः।
अतिगण्डः सुकर्माख्यो धृतिः शूलोऽथ गण्डकः ॥१॥
वृद्धिर्ध्रुवाख्यो व्याघातो हर्षणो वज्रसंज्ञकः।
सिद्धियोगो व्यतीपातो वरीयान्परिघः शिवः ॥२॥
सिद्धिः साध्यः शुभः शुक्लो ब्रह्मैन्द्रो वैधृताह्वयः ।
सप्तविंशति योगास्ते स्वनामफलदाः स्मृताः ॥३॥
विरुद्धयोगेषु च आद्यपादः
शुभेषु कार्येषु विसर्जनीयः ।
[186]सवैधृताख्यो व्यतिपातयोगः
सर्वोऽपि नेष्टः परिघार्धमाद्यम् ॥४॥
तिस्रस्तु नाड्यः प्रथमे च वज्रे
गण्डातिगण्डेऽपि च षट् च षट् च ।
व्याघातयोगे नव पञ्च शूले
शुभेषु कार्येषु विवर्जनीयाः ॥५॥
[187]अन्त्यातिगण्डपरिघव्यतिपातपूर्व-
व्याघातगण्डवरशूलमहाशनीषु ।
चित्रानुराधपितृपन्नगदस्रभेषु
सादित्यमूलशशिसूरिषु मूर्ध्नि भेषु ॥६॥
रेखामेकामूर्ध्वगां षट् च सप्त
तिर्यक्कृत्वाप्यत्र खार्जूरचक्रे ।
तिर्यग्रेखासंस्थयोश्चन्द्रभान्वो-

---

१८६ व१,व३, सवैधृतो यो
१८७ व२ उत्पातगंड

दृक्संपातो दोष एकार्गलाख्यः ।।७।।
खरकरतुहिनांशोर्दृष्टतसंपातजात-
स्त्वनलमयशरीरश्चोद्गिरन्वह्निसंघान् ।
भुवि पतति जनानां मङ्गलध्वंसनाय
गुणगणशतसंघैरप्यवार्योऽग्निकोपः ।।८।।
चौलं च बीजरोपं च स्त्रीसङ्गं दन्तकल्पनम्।
काष्ठकर्म रिपूच्चाटं विष्कम्भे तु प्रकारयेत् ।।९।।
मित्रत्वं लेपनं चैव भूषणं भूपरिग्रहम् ।
[१८८]राजवश्यं महोत्साहं प्रीतियोगे [१८९]प्रकारयेत् ।।१०।।
बीजवापं धनग्राहमायुरारोग्यकर्म च ।
विवाहं व्रतबन्धं च ह्यायुष्मति च कारयेत् ।।११।।[१९०]
वस्त्रबन्धमलंकारं सौभाग्यं लेपकर्म च ।
[१९१]सोमपानं सुरापानं सौभाग्ये तु [१९२]प्रकारयेत् ।।१२।।
विवाहदानकर्माणि भूषणं भूपरिग्रहम् ।
राजाभिषेकमायुष्यं शोभने च [१९३]प्रकारयेत् ।।१३।।
[१९४]विग्रहं निग्रहं चैव रोदनं वधबन्धनम् ।
छेदनं वञ्चनं क्षुद्रमतिगण्डे प्रकारयेत् ।।१४।।
चित्रकर्म गृहस्थापं कल्याणं भूपरिग्रहम् ।
राजाभिषेककर्माणि सुकर्मणि च कारयेत् ।।१५।।
प्राकारं तोरणादीनि देवालयगृहाणि च ।

---

१८८ व२ राज्यकर्म
१८९ व ३ प्रकल्पयेत्
१९० व२ श्लोक द्विवारं लिखितं
१९१ वे.सोमयानं
१९२ व३ प्र वर्णानन्तरं लोपः
१९३ व३ प्र वर्णानन्तरं लोपः
१९४ व१,व३ विवाहं

सेतुबन्धं गजारोहं धृतियोगे तु कारयेत् ।।१६।।
क्रूरकर्म रिपूच्चाटं मारणं दाहनं तथा ।
बन्धनं चावमानं च शूलयोगे [१९५]प्रकारयेत् ।।१७।।
शत्रुघातं रिपूच्चाटं तडागं सेतुबन्धनम् ।
क्षेत्रसेवां गदायुद्धं गण्डयोगे [१९६]प्रकारयेत् ।।१८।।
[१९७]बीजवापं धनग्राहं विवाहं वस्त्रबन्धनम् ।
तडागं सेतबन्धं च वृद्धियोगे [१९८]प्रकारयेत् ।।१९।।
वस्त्रबन्धं गृहस्थापं तडागं सेतुबन्धनम् ।
भूषणं बहुरत्नं च ध्रुवयोगे [१९९]प्रकारयेत् ।।२०।।
बन्धनं रोधनं चैव घातनं छेदनं तथा ।
क्रूराणि बहुकर्माणि व्याघाते तु प्रकारयेत् ।।२१।।
वस्त्रबन्धं गजारोहं [२००]विवाहं भूपनिग्रहम् ।
राजाभिषेकमायुष्यं हर्षणे तु प्रकारयेत् ।।२२।।
शस्त्रकर्म रिपूच्चाटं शस्त्राणां च परिग्रहम् ।
सेनाधिपत्यं सौम्यं च वज्रयोगे प्रकारयेत् ।।२३।।
हारकाञ्चीकलापं च हस्ताभरणमेव च ।
अङ्गुलीभूषणं चैव सिद्धियोगे प्रकारयेत् ।।२४।।
दानं वेदविदे दयाच्छ्रद्धासंकल्पनं तथा ।
रिपूच्चाटं विषादीनि व्यतीपाते तु कारयेत् ।।२५।।
द्वाविंशतिः समुत्पत्तौ भ्रमणे चैकविंशतिः ।
उत्तिष्ठे सप्त घटिकाः पतिते घटिका दश ।।२६।।

---

१९५ व३ प्र-वर्णानन्तरं लोपः
१९६ व३ प्र-वर्णानन्तरं लोपः
१९७ व२ वीजवाप
१९८ व३ प्र-वर्णानन्तरं लोपः
१९९ व३ प्र वर्णानन्तरं लोपः, व१ ऽत्र कल्पयेत्
२०० व२ विवादं

पूर्वे लक्षगुणं दानं भ्रमणे कोटिरुच्यते ।
उत्तिष्ठे सप्त कोट्यस्तु निपाते चाक्षयं भवेत् ।।२७।।
शङ्खचक्रगदापद्मलम्बभ्रूदीर्घनासिकम् ।
अष्टनेत्रं चतुर्वक्त्रं विस्तीर्णं शतयोजनम् ।।२८।।
दीर्घबाहुं महारौद्रं तीक्ष्णदंष्ट्रं महोदरम् ।
व्यतीपातवपुश्चेदं शोभने मृत्युकारकम् ।।२९।।
हारकाञ्चीकलापं च हस्ताभरणमेव च ।
अङ्गुलीभूषणं चैव वरीयसि च [२०१]कारयेत् ।।३०।।
बन्धनं छेदनं चैव भेदनं विषदीपनम् ।
तथान्यत्क्रूरकर्माणि परिघे तु [२०२]प्रकारयेत् ।।३१।।
[२०३]मालिकां कटिसूत्रं च घण्टाभरणमेव च ।
कर्णयोर्भूषणं चैव शिवयोगे [२०४]प्रकारयेत् ।।३२।।
प्रतिष्ठा देवतानां[२०५] च गृहाणि नगराणि च ।
प्राकारतोरणादीनि सिद्धियोगे [२०६]प्रकारयेत् ।।३३।।
देवतागुरुपूजां च विद्यापूजां तथैव च ।
मन्त्रपूजान्यनेकानि साध्ययोगे [२०७]प्रकारयेत् ।।३४।।
बीजवापं गृहोत्साहं धनधान्यादिसंग्रहम् ।
सर्वरत्नमहीग्राह्यं शुभयोगे [२०८]प्रकारयेत् ।।३५।।
लेपनं भूषणं चैव राजसंदर्शनं तथा ।

---

२०१ व३ का-वर्णानन्तरं लोपः
२०२ व३ प्रकार-वर्णानन्तरं लोपः
२०३ व२ चारिकं
२०४ व३ प्रकार-वर्णानन्तरं लोपः
२०५ व२ देवतादीनां
२०६ व३ प्रकार-वर्णानन्तरं लोपः
२०७ व३ प्रकार-वर्णानन्तरं लोपः
२०८ व३ प्रकार-वर्णानन्तरं लोपः

कन्यादानं महोत्साहं शुक्लयोगे [209]प्रकारयेत् ।।३६।।
शान्तिकं पौष्टिकं चैव तडागं सेतुबन्धनम् ।
चौलोपनयनं क्षौरं ब्रह्मयोगे [210]प्रकारयेत् ।।३७।।
कन्यादानं गजारोहं स्त्रीसङ्गं [211]वस्त्रबन्धनम् ।
[212]काव्यगायनवाद्यानि योगे चैन्द्रे [213]प्रकारयेत् ।।३८।।
घातनं परराष्ट्राणां वञ्चनं दाहनं तथा ।[214]
छेदनं [215]क्रूरकर्माणि वैधृतौ तु प्रकारयेत् ।।३९।।
योगस्य सप्तविंशांशो योगमानं भवेदिह ।
एकस्मिन्नपि योगेऽपि सर्वे योगा भवन्ति हि ।।४०।।
सूर्याचन्द्रमसोर्धिष्ण्ययोगाज्जाता यतस्ततः ।
ऋक्षेशा एव योगेशा ज्ञातव्याः सर्वकर्मसु ।।४१।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां योगाध्यायः पञ्चदशः ।।१५।।

---

२०९ व३ प्रकार-वर्णानन्तरंलोपः
२१० व३ प्रकार-वर्णानन्तरं लोपः
२११ व२ वास्तुवंधनं
२१२ व२ काव्यगानकन?
२१३ व३ प्रकार-वर्णानन्तरं लोपः
२१४ व१ श्लोकलोपो घातनतः...छेदनपर्यंतं
२१५ व१ क्रूराणि बहुकर्माणि

१६

२.१६.० करणम्

आद्यं बवं बालवकौलवाख्ये
तत्तैतिलं तद्गरसंज्ञकं च ।
वणिक्च विष्टिः करणानि सप्त
चराणि यानि क्रमशो भवन्ति ।।१।।
[216]तिथ्यर्धमाद्यं शकुनिर्द्वितीयं
चतुष्पदं नागकसंज्ञितं च ।
किंस्तुघ्नमेतान्यचराणि कृष्ण-
चतुर्दशीपश्चिमभागतः स्युः ।।२।।
इन्द्रो विधाता मित्राख्यस्त्वर्यमा भूर्हरिप्रिया ।
कीनाशश्चेति तिथ्यर्धनाथाः स्युः क्रमतस्त्वमी ।।३।।
कलिश्च रक्षो भुजगः पवनश्च स्थिरेश्वराः ।
विज्ञेयाः सर्वकार्येषु तिथ्यर्धेशा [217]बवादयः ।।४।।
चरस्थिरद्विजहितः पशुधान्यकरादि[218] यत् ।
धातुवादवणिग्धान्यकर्म सर्वं बवे हितम् ।।५।।
माङ्गल्योत्सवपानादि वास्तुकर्माखिलं च यत् ।
नृपाभिषेकसंग्रामकर्म सिद्ध्यति बालवे ।।६।।
[219]गजोष्ट्राश्वायुधोद्यानविपिनाद्यखिलं च यत् ।
बालवोक्ताखिलं कर्म कौलवे सिद्ध्यति ध्रुवम् ।।७।।
सन्धिविग्रहयात्रादि [220]क्रयविक्रयकर्म यत् ।

---

२१६ व१,व३ अर्धार्द्धमाद्यं
२१७ व१,व२ वृषादयः
२१८ वे.पा.धामाकरादि
२१९ व१ गजोश्वायुधोघातविपिनोखिलं

तडागकूपखननं कार्यं तैतिलसंज्ञके ।।८।।
प्राकारोद्धरणं सर्वजलकर्माखिलं च यत् ।
सर्वतिथ्यर्धकथितं कर्म सर्वं गरे हितम् ।।९।।
मूलकर्माखिलं धातुजीवकर्माखिलं च यत् ।
उक्तानुक्ताखिलं कर्म ध्रुवं वणिजि सिद्ध्यति ।।१०।।
वधबन्धविषाग्न्यस्त्रच्छेदनोच्चाटनादि यत् ।
तुरङ्गमहिषोष्ट्रादि कर्म विष्ट्यां च सिद्ध्यति ।।११।।
न कुर्यान्मङ्गलं विष्ट्यां जीवितार्थी कदाचन ।
कुर्वन्नज्ञस्तदा क्षिप्रं तत्सर्वं नाशतां व्रजेत् ।।१२।।
रुद्रस्य भालनेत्राग्निज्वालामालासमुद्भवा ।
कृतकार्या ततः पृथ्व्यां व्यपतद्दग्धमङ्गला ।।१३।।
तस्मात्त्याज्या परीता वा विपरीतापि मङ्गले ।
तन्माहात्म्यमजानन्तो भद्रायां यदि मङ्गलम् ।।१४।।
कुर्याद्वंशक्षयं तस्य स भवेन्नष्टमङ्गलः ।
तस्मात्तत्र शुभं कर्म मनसापि न कारयेत् ।।१५।।
नाड्यः पञ्च मुखे [२२१]गलेऽथ घटिका वक्षो दशैकायुता ।
[२२२]नाभिस्तद्घटिकाश्चतुष्टयमिताः षण्नाडिकास्तत्कटिः ।। १६।।
पुच्छं तन्नाडिकास्तिस्रः पुच्छान्तं मुखतः क्रमात् ।
विष्टेरङ्गविभागोऽयं फलं वक्ष्ये पृथक्पृथक् ।।१७।।
कार्यस्य नाशो वदने गले तु
मृत्युः सदा वक्षसि चार्थहानिः ।
नाभौ च विघ्नं त्वथ बुद्धिनाशः
कट्यां जयः संयति पुच्छभागे ।।१८।।
सुरासुराणां समरेऽमरेषु

---

२२० व३ विक्रयशब्दस्य लोपः
२२१ व१ गले कटि वक्षौ दशैकाधिका, व२ गलेऽष्ट
२२२ व१ नाभिस्तर्द्धघटिका

पराजितेष्वीश्वरकोपदृष्टेः ।
जाता सुरघ्नी मुदितैः सुरौघै-
[223]र्विष्टिर्नियुक्ता करणावसाने ।।१९।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां करणाध्यायः षोडशः ।।१६।।

---

२२३ व३ विष्टीर्निरुक्ता

१७

२.१७.० मुहूर्तम्

शिवसर्पमित्रपितरो वसुजलविश्वाब्जजद्रुहिण: ।
सुरपद्विदैवदनुजा: शम्बरनाथार्यमाख्यभगा: ।।१।।
दिवसमुहूर्ता: कथिता दशपञ्चमितास्तथैव रात्रेश्च ।
रुद्राजपादेवाहिर्बुध्न्याख्यस्ततश्च [224]पूषाख्य: ।।२।।
अश्वियमवह्निधातृसुधाकरास्त्वदितिसुरमन्त्री ।
हरिस्तीक्ष्णकरत्वाष्ट्रप्रभञ्जनाश्चेति पञ्चदश ।।३।।
पञ्चदशांशो दिवसे क्षणमानं तत्त्रियामाया: ।
नक्षत्रेश्वरसदृशे क्षणे च तन्नामधिष्ण्यं तत् ।।४।।
यत्कर्म कथितमृक्षे यस्मिंस्तत्कर्म तत्क्षणे[225] कार्यम् ।
दिक्छूलादिकमखिलं पारिघदण्डं च विज्ञेयम् ।।५।।
निर्ऋतपितृसार्पाख्या रौद्रेन्द्राग्नीश्वराख्यभगा: ।
पापमुहूर्तास्त्वेते शुभकर्मणि दु:खशोकदा नित्यम् ।।६।।
द्युमुहूर्तास्त्ववशिष्टा सौम्या: शुभदाश्च मङ्गले नूनम् ।
शान्तिकपौष्टिककर्मसु विशेषतस्तत्प्रदा: सततम् ।।७।।
रात्रिमुहूर्तास्त्वजपाद्रौद्राग्नेयाख्ययाम्यसंज्ञाश्च ।
क्रूरताश्चत्वारस्त्वनिष्टदास्त्विष्टदास्त्वपरे ।।८।।
अर्यम्णस्त्वर्कवारे हिमकरदिवसे [226]राक्षसब्रह्मसंज्ञौ
[227]पित्राग्नेयौ क्षणौ तौ क्षितिसुतदिवसे सौम्यवारेऽभिजिच्च ।
दैत्याप्यौ जीववारे भृगुतनयदिने ब्राह्मपित्र्यौ मुहूर्तौ ।

---

२२४ व१,व३ पूषादेवाख्य

२२५ व३ कार्यादिक

२२६ व३ राक्षब्राह्मसंज्ञौ

२२७ व३ पित्राग्नयो

सार्पेशौ तिग्मरोचिप्रियसुतदिवसे वर्जनीया मुहूर्ता: ।।९।।
[२२८]यस्मिन्वारे यो मुहूर्तो निन्द्यस्तं विषमं त्यजेत्।
उद्वाहादिषु कार्येषु ह्यपि सर्वगुणान्वितम्।।१०।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां मुहूर्ताध्याय: सप्तदश: ।।१७।।

---

२२८ व१ व२ –अनुसारेणाधिक: श्लोक:

१८

२.१८.० गोचरविचारः

कथयामि गोचरबलं सवेधबलमम्बराटानाम् ।
सदसद्बलकथनार्थं विज्ञाते जन्मभे क्षितीशानाम् ।।१।।
त्रिषडेकादशमे सूर्यः शुभदो ग्रहैर्न विद्धश्चेत् ।
नवरिःफात्मजजलगैः स्वबलोपेतैर्विसूर्यसूतैः ।।२।।
भवदशमाद्यकलत्रत्रिषट्सु निशाकरोऽत्र बली ।
नैधनजलधीष्वर्थनवान्त्यगतैर्विबुधखेचरैर्न हतः ।।३।।
त्रिषडेकादशसहितो धरासुतः कामधर्मसुतसंस्थैः।
दिनकरतनयोऽपि शुभो न विद्धयते खचरैर्विनोष्णकरैः ।।४।।
दशमेकादशनिधनस्वबन्धुशत्रुस्थितः शुभः शशिजः ।
निधनान्त्यप्रथमात्मजतृतीयस्थैर्विनेन्दुखेचरैर्न हतः ।।५।।
पञ्चमनवमायधनस्मरगः शुभदो गुरुर्न विद्धश्चेत् ।
गृहकर्माष्टान्त्यत्रिस्थितखेचरैर्नास्तमितैः ।।६।।
आसुतनिधनाङ्कान्त्यभवगृहगतः शुक्रः शुभदो न हतः।
वसुमदनाद्यखधर्मसुतारिसहजायगैर्न विद्धस्तैः ।।७।।
वेधसमन्वितखचरा नृणां न दिशन्ति सत्फलं किञ्चित् ।
व्यत्ययवेधविधानाद्दिशन्त्यशुभाः[२२९] शुभफलं सततम् ।।८।।
गोचरबलचिन्तायां ये न विदन्ति यथाक्रमं चेति ।
गोचरबलानभिज्ञा लोके यान्ति हास्यतां सुजनाः ।।९।।
अशुभेक्षितः कष्टफलः शुभेक्षितः सत्फलः खचरः ।
शत्रुविलोकनसहिताः सर्वे ते निष्फलाः खचराः।।१०।।
नीचगता रिपुविजिता रव्याभिभूताः स्वशत्रुगेहस्थाः।

---

२२९ व३ प्रददन्त्यशुभा

भुजगा इव मन्त्रहता न भवन्ति[230] कार्यक्षमा [231]लग्ने ।।११।।
हिमकिरण: सितपक्षे द्वितीयनवपञ्चमगोऽपि शुभ: ।
गोचरबलविषये वै विबल: पक्षे सितेतरे नूनम् ।।१२।।
भवनान्त्यगताश्च यदा धिष्ण्यान्त्यगताश्च [232]गगनचरा: ।
दद्यु: परभवनफलं[233] प्राग्भवनफलं च वक्रिता ये च ।।१३।।
दशदिवसपञ्चदिनात्त्रिपक्षमतिचारवक्रयोर्दद्यु: ।
भौमाद्या: पञ्चमदिनप्राग्राशिफलं पञ्च मासांश्च ।।१४।।
भवनादिगतौ फलदौ रविभौमौ मध्यगौ च गुरुशुक्रौ।
अन्त्यगतौ शनिशशिनौ सदैव फलद: शशाङ्कसुत: ।।१५।।
राजालोकनसमये रविरार्य: करग्रहेषु[234] बली ।
रणसमये धरणिसुत: प्रयाणसमये सितोऽतिबली ।।१६।।
दीक्षणसमये त्वसित: शशितनयो ज्ञानशिल्पविधौ ।
निखिलेषु च कार्येषु चन्द्रबलमुख्यमखिलनृणाम् ।।१७।।
हिमकरवीर्याद्वीर्यं संश्रित्यैव ग्रहाश्च साध्वसाधु फलम् ।
ददतीन्द्रियाणि मनसा सहितानि यथा स्वकार्यदक्षाणि ।।१८।।
खचरेषु यदा विषमेष्वखिलनृणां व्याधिरर्थहानि: स्यात् ।
सम्यग्विचार्य मनसा ग्रहशान्तिं कारयेन्नृपति: ।।१९।।
उच्छ्रयपतनानि नृणां खचराधीनानि विशेषतो यस्मात् ।
अखिलानामपि लोकानां वृद्धिस्तस्माद् ग्रहाश्च पूज्यतमा: ।।२०।।
मासि मास्ययने चन्द्रसूर्ययोर्ग्रहणेऽपि वा ।
विषुवत्यर्कसंक्रान्तौ व्यतीपाते [235]दिनक्षये ।।२१।।

---

२३० व२ भवत्य
२३१ व२ खचरा:, व३ नैते
२३२ व२ यदा नति- अधिकम्
२३३ व२ फलं प्राग्भवनफलं –शब्दानां लोप:
२३४ व३ करतलग्रहेषु
२३५ व१ दिनत्रये

[236]पुण्येऽह्नि चन्द्रताराणां बलयुक्तो च जन्मभे ।
गृहस्येशानभागे तु मण्डपं कारयेद्बुधः ।।२२।।
[237]षड्द्वादशाष्टभिर्हस्तैः षोडशैर्वा समन्ततः ।
[238]चतुर्द्वारसमायुक्तस्तोरणाद्यैः समन्वितः ।।२३।।
कुण्डं तन्मध्यभागे तु कारयेच्चतुरस्त्रकम् ।
वितस्तिद्वयखातं यत्कुण्डं सचतुरङ्गुलम् ।।२४।।
विप्राणां क्षत्रियाणां तदङ्गुलत्रयसंयुतम् ।
वैश्यानां द्व्यङ्गुलाधिक्यं शूद्राणां हस्तमात्रकम् ।।२५।।
प्रथमा मेखला तत्र द्वादशाङ्गुलविस्तृता ।
चतुर्भिरङ्गुलैस्तस्याश्चोन्नतं[239] च समन्ततः ।।२६।।
तस्याश्चोपरि वप्रः स्याच्चतुरङ्गुलमुन्नतम् ।
अष्टभिरङ्गुलैः सम्यग्विस्तीर्णं च समन्ततः ।।२७।।
तस्योपरि पुनः कार्यो वप्रः [240]सोऽपि तृतीयकः ।
चतुरङ्गुलविस्तीर्णं चोन्नतं च [241]यथाविधि ।।२८।।
योनिश्च पश्चिमे भागे प्राङ्मुखी मध्यसंस्थिता ।
षडङ्गुलैश्च विस्तीर्णा चायता द्वादशाङ्गुलैः ।।२९।।
पृष्ठोन्नता गजास्यैव सच्छिद्रा मध्यमोन्नता ।
एवं लक्षणसंयुक्तं कुण्डमिष्टार्थसिद्धये ।।३०।।
अनेकदोषदं[242] कुण्डं यत्र न्यूनाधिकं यदि ।
तस्मात्सम्यक्परीक्ष्यैव कर्तव्यं शुभमिच्छता।।३१।।

---

२३६ व१ प्रथमपादभिन्नता -- पुण्येह्नि चंद्रताराणां बलयुक्ते च जन्मभे
२३७ व३ षड्वा
२३८ व१ चतुर्द्वारसमया युक्तो
२३९ व१ श्लो.लोपः- तस्या..तः अष्टभिरङ्गुलैः पर्यंतं
२४० व२ सोपि तृतयकः
२४१ व१ तथाविधः
२४२ व२ सुखदुखदं

कुण्डस्येशानभागे तु पूजावेदीं प्रकल्पयेत् ।
हस्तोन्नतां च विस्तीर्णां चतुरस्रां समन्ततः ।।३२।।
स्नात्वादौ कायशुद्ध्यर्थं द्विजानुज्ञां लभेत्ततः ।
आशिषो वाचनं कार्यं मधुपर्कपुरःसरम् ।।३३।।
ऋत्विजो वरयेत्पश्चात्कृतविद्यान्विशारदान् ।
षोडश ब्राह्मणाञ्छुद्धान्दम्भानृत(वि)वर्जितान् ।।३४।।
तेषां मध्ये श्रेष्ठतममाचार्यं तं प्रकल्पयेत् ।
लिखेदष्टदलं पद्मं वेदिकोपरि तण्डुलैः ।।३५।।
आदित्याद्यग्रहाणां च प्रतिमां कल्पयेत्ततः।
ताम्रेण कारयेत्सूर्यं स्फटिकेन निशाकरम् ।।३६।।
कुजं तु चन्दनेन ज्ञं सुवर्णेन गुरुं तथा ।
रजतेन सितं सौरिं लोहेन तु विधुन्तुदम् ।।३७।।
सीसेन शुद्धकांस्येन केतुं कुर्यात्प्रयत्नतः ।
यथारुचिप्रमाणेन प्रतिमां कल्पयेत्सुधीः ।।३८।।
वेदीमध्ये ललितकमले कर्णिकायामधःस्थः
[243]सप्ताश्वोऽर्कोऽरुणरुचिवपुः सप्तरज्जुर्द्विबाहुः।
गोत्रे रम्ये बहुविधगुणे काश्यपाख्ये प्रसूतः
कालिङ्गाख्ये विषयजनितः प्राङ्मुखः पद्महस्तः ।।३९।।
आकृष्णेनेति मन्त्रेण रविं ध्यात्वा समर्चयेत् ।
[244]अस्य मन्त्रस्य च ऋषिर्हिरण्यस्तपसंज्ञितः ।।४०।।
त्रिष्टुप्छन्दो देवताऽर्को मन्त्रोऽसौ सर्वकामदः ।
अस्याधिदेवता रुद्रं स्थापयेद्दक्षिणे ततः।।४१।।
मन्त्रं तु त्र्यम्बकं चास्य छन्दोऽनुष्टुप्ततो ऋषी ।
वामदेववसिष्ठाख्यौ देवता परमेश्वरः ।।४२।।
सूर्यस्य स्थापयेद्वह्निं वामे प्रत्यधिदेवताम् ।

---

२४३ व१ सलाभवोर्के
२४४ व१ अप्य

ग्रहाधिदेवतांस्त्वेवं स्थापनीया: प्रयत्नत: ।।४३।।
मन्त्रोऽग्निं दूतमित्यस्य ऋषिर्मेधातिथिस्तथा ।
अग्निस्तु देवता छन्दो गायत्री पापमोचनी ।।४४।।
आग्नेयभागे सरथो दशाश्वश्चात्रेयजो पावनदेशजश्च ।
प्रत्यङ्मुखस्थश्चतुरस्रपीठे गदावराङ्को हिमगु: सिताभ: ।।४५।।
[245]आप्यायस्येतिमन्त्रेण यजेच्चन्द्रमसं सदा।
अस्य ऋषिर्गौतमाख्यो गायत्री देवता शशी ।।४६।।
गौरीर्मिमायमन्त्रेण गौरीं प्रत्यधिदेवताम् ।
ऋषिर्दीर्घतमाश्चास्य जगती देवता उमा ।।४७।।
[246]अस्याधिदेवतास्त्वापस्त्वापोहिष्ठामयो ऋच: ।
सिन्धुद्वीपोऽस्य मन्त्रस्य गायत्री देवता ऋषि: ।।४८।।
याम्ये गत: शक्तिगदात्रिशूलो
वरप्रदो याम्यमुखोऽतिरिक्त: ।
कुजस्त्ववन्तीविषयस्त्रिकोण-
स्तस्मिन्भरद्वाजकुले प्रसूत: ।।४९।।
अग्निर्मूर्द्धेति मन्त्रेण सम्यग्ध्यात्वा कुजं यजेत् ।
ऋषिर्विरूपो गायत्री देवताङ्गारकोऽस्य च ।।५०।।
स्कन्दोऽधिदेवता त्वस्य सावित्री देवता गुह: ।
मन्त्रस्य स्कन्दगायत्री स्कन्दस्य प्रीतिदायिका ।।५१।।
स्योना पृथिव्यसौ मन्त्रस्त्वितरा देवता मही ।
गायत्री देवता भूमिस्तस्य मेधातिथिर्ऋषि: ।।५२।।[247]
उदङ्मुखो मागधजो हरिस्थ-
स्त्वात्रेयगोत्र: शरमण्डलस्थ: ।
सखड्गचर्मोरुगदाधरो ज्ञ-

---

२४५ व३ आपायस्येति
२४६ व१ अत्रान्यादेवतास्तापो
२४७ व१ पूर्णश्लोकस्य लोप:

स्त्वीशानभागे वरदः सपीतः ।।५३।।
अग्ने विवस्वदुषसस्त्विति मन्त्रेण चन्द्रजम् ।
प्रस्कण्वो बृहती छन्दस्त्वस्यास्ति देवता बुधः ।।५४।।
मन्त्रेणेदं विष्णुरिति विष्णुः पूज्योऽधिदेवता ।
ऋषिर्मेधातिथिश्छन्दो गायत्री देवता हरिः ।।५५।।
विष्णुं च देवतामन्यत्पुरुषसूक्तेन चार्चयेत् ।
ऋषिर्नारायणोऽनुष्टुबन्यस्मिन्देवता ऋषिः ।।५६।।
सौम्ये सुदीर्घे चतुरस्रपीठे
रथोऽङ्गिराः सौम्यमुखः सुपीतः।
द्वन्द्वाक्षमालाजलपात्रधारी
सिन्ध्वाख्यदेशो वरदश्च जीवः ।।५७।।
बृहस्पते अतियदर्यो[२४८] अनेन गुरुमर्चयेत् ।
ऋषिरस्य [२४९]प्रतिरथस्त्रिष्टुब्जीवोऽत्र देवता ।।५८।।
अस्याधिदेवता ब्रह्म ब्रह्मजज्ञानमित्यृचः ।
तमर्चयेदृत्रिर्भर्गस्त्रिष्टुब्ब्रह्मैव देवता ।।५९।।[२५०]
इन्द्रायेन्द्रो मरुत्त्वष्टस्त्वनेनेतरदैवतम् ।
छन्दो ऋषिः कश्यपोऽस्य गायत्री देवता हरिः ।।६०।।
प्राच्यां भृगुर्भोजकटे प्रजातः
स भार्गवः पूर्वमुखः सिताभः ।
सपञ्चकोणे सरथाधिरूढो[२५१]
दण्डाक्षमालावरदाम्बुपात्रः ।।६१।।
ध्यात्वा समर्चयेच्छुक्रं तत्रान्नादिति तदृचा ।
त्रिष्टुबृषिर्भरद्वाजो देवता दनुरर्चितः ।।६२।।

---

२४८ वे.पा. परिदीया
२४९ वे.पा.अप्रतिरथस्
२५० व१,व३ पूर्ण श्लोकलोपः
२५१ व१ रवे

अस्याधिदेवता शक्रस्त्वनेनैवार्चयेत्तु ताम् ।
[२५२]इन्द्राणी देवता चास्य धृतिर्मेधातिथिर्ऋषि: ।।६३।।[२५३]
मन्त्रेणोत्तानपर्णेन चास्य मेधातिथिर्ऋषि: ।
इन्द्राणी देवता तत्र त्वनुष्टुप्छन्दसंज्ञितम्।।६४।।
चापासने गृध्ररथ: सुनील:
  प्रत्यङ्मुख: काश्यपज: प्रतीच्याम् ।
सशूलचापेषु वरप्रदश्च
  सौराष्ट्रदेशे प्रसवश्च सौरि: ।।६५।।
शन्नोदेवीत्यनेनैव मन्त्रेण शनिमर्चयेत् ।
अस्य सिन्धुद्वीप ऋषिर्गायत्री देवता शनि: ।।६६।।
यमोऽधिदेवता पूज्या त्वायङ्गौरित्यनेन च ।
सर्पराज्ञी ऋषिश्चास्य गायत्री देवता यम: ।।६७।।
प्रजापतिस्त्वस्य शने: प्रतिपूर्वाधिदेवता ।
प्रजापते न त्वदेतेत्यनेनैव यजेत्तु ताम् ।।६८।।
त्रिष्टुप्छन्दोऽस्य मन्त्रस्य स्वर्णगर्भ ऋषिस्तत: ।
प्रजापतिर्देवतायां मन्त्र: स पापमोचक: ।।६९।।
पैठीनसो वर्वरदेशजात:
  शूर्पासन: सिंहगम: सधूम्र: ।
याम्यायने नैर्ऋतग: करालो
  वरप्रद: शूलसचर्मखड्ग: ।।७०।।
कयानश्चित्र आभुव इति मन्त्रेण चार्चयेत् ।
गायत्री वामदेवोऽस्य ऋषी राहुश्च देवता ।।७१।।

---

२५२ व१ इंद्राधिदेवता तस्य इति मेघातिथिऋषि:
२५३ व१,व२, व३ श्लो.६३ अनन्तरमधिक: श्लोक:
छन्दोस्य बृहती नाम देवता चामरेश्वर: ।
अस्य शुक्रस्य चेंदाणी त्वत्र प्रत्यधिदेवता ।।६३।।

कालोऽधिदेवता ब्रह्मजज्ञानमिति चार्चयेत् ।
त्रिष्टुप्छन्दो वामदेव ऋषि: [२५४]कालोऽधिदेवता ।।७२।।
अपरा देवता सर्पा नमोऽस्त्विति समर्चयेत् ।
अग्निर्ऋषिर्विराट्छन्द: सर्पाश्चास्याधिदेवता:[२५५] ।।७३।।
वृकासनो जैमिनिगोत्रजोऽन्त-
वेंदीसुदेश: सुविचित्रवर्ण: ।
याम्यायनो वायुदिशि प्रखड्ग-
चर्मा शिखी चाष्टशतोऽथ चैक: ।।७४।।
केतुं कृण्वन्ननेनैव चार्चयेत्तं प्रयत्नत: ।
मधुच्छन्दो ऋषिरस्य गायत्री देवता शिखी ।।७५।।
अस्याधिदेवता चित्रगुप्तो ज्ञात्वा तमर्चयेत् ।
छन्दोऽनुष्टुप्सोम ऋषिश्चित्रगुप्तोऽस्य देवता ।।७६।।
अस्याधिदेवता ब्रह्मा त्वेष ब्रह्म य इत्यृचा ।
विश्वेदेवा ऋषिर्विराड्गायत्री ब्रह्मदेवता ।।७७।।
शनै: पश्चिमत: स्थाप्य विनायकमथार्चयेत् ।
गणानान्त्वेति जगती भर्गर्षिदेवता स्वयम् ।।७८।।
तस्य दक्षिणतो दुर्गा जातवेदस इत्यृचा ।
त्रिष्टुब्छन्द: कश्यपोऽस्य ऋषिर्दुर्गात्र देवता ।।७९।।
वायुतो दक्षिणे कोणे शिशुमन्त्रेण चार्चयेत् ।
गौरी इति ऋषिश्चास्य गायत्रीदेवता मरुत् ।।८०।।
दक्षिणे तस्य चाकाशमादित्यं च समर्चयेत् ।
ऋषिर्भर्गोऽस्य गायत्री चाकाशो देवता तत: ।।८१।।
अश्विनौ दक्षिणे तस्य कार्या वै षोडशा ऋचा ।
ऋषि: [२५६]कण्वोऽस्य गायत्री छन्दोऽश्विनौ च देवते ।।८२।।

---

२५४ व१ कालोस्य देवता
२५५ व१ स्य तु देवता
२५६ व२, व३ कंठोस्य

इन्द्रश्चैरावतारूढो वज्रपाणिः शचीप्रियः ।
स्वर्णवर्णः सहस्राक्षो नायकस्त्वमरेश्वरः ।।८३।।
पद्मपूर्वदलाग्रे च इन्द्रमिन्द्रश्च इत्यृचा ।
वायुश्छन्द ऋषिरस्य गायत्री देवता स्वयम् ।।८४।।
अग्निः सुवर्णः सप्तार्चिः सप्त हस्तोर्ध्ववक्त्रकः ।
स्वाहाप्रियो मेषगमः षडक्षः स्रुक्स्रुवायुधः।।८५।।
आग्नेय्यामर्चयेदग्निमग्निं दूतमनेन च ।
ऋषिर्मेधातिथिश्छन्दो गायत्री देवतानलः ।।८६।।
[257]इन्द्रप्रियो दण्डधरो यमो महिषवाहनः ।
रक्तवर्णो हि लोकानां स्वस्वकर्मफलप्रदः ।।८७।।
यमं यजेद्याम्यदले यमाय सोममित्यृचा ।
ऋषिः शातातपोऽनुष्टुप्छन्दोऽसौ देवता यमः ।।८८।।
खड्गचर्मधरो नीलो निर्ऋतिवाहनः ।
ऊर्ध्वकेशो विरूपाक्षः करालः कालिकाप्रियः ।।८९।।
मोषुणस्त्विति मन्त्रेण नैर्ऋत्यां निर्ऋतिं यजेत् ।
गायत्री घोरकण्ठोऽस्य निर्ऋतिर्देवता स्वयम् ।।९०।।
नागपाशधरो रत्नभूषणः पद्मिनीप्रियः ।
वरुणोऽम्बुपतिः स्वर्णवर्णो मकरवाहनः ।।९१।।
वरुणं पश्चिमे भागे त्वन्नो अग्न इत्यृचा ।
वामदेव ऋषिस्त्रिष्टुब्वरुणो देवताऽस्य च ।।९२।।
प्राणरूपो हि जगतो वायुः कृष्णमृगासनः ।
हेमदण्डधरः श्यामवर्णोऽसौ मोहिनीप्रियः ।।९३।।
तव वायुवृत इति यजेद्वायुं मरुद्दिशि ।
वायुश्च देवता त्वस्य गायत्री ऋषिरङ्गिराः ।।९४।।
अश्वारूढः कुन्तपाणिः कुबेरश्चित्रिणीप्रियः।

---

२५७ वे.इलप्रियो

निधीश्वरः स्वर्णवर्णः स्वर्णदो रूपवान्प्रभुः ।।९५।।
सोमो धेनुमनेनैव उदीच्यां च धनेश्वरः ।
त्रिष्टुप्छन्दो गौतमोऽस्य देवता सोमसंज्ञकः ।।९६।।
शुद्धस्फटिकसंकाशो गौरीशो वृषवाहनः ।
वरदाभयशूलाक्षः शूलभृत्परमेश्वरः ।।९७।।
कद्रुद्रायेति मन्त्रेण ईशान्यां रुद्रमर्चयेत् ।
गायत्री घोरकण्ठोऽस्य देवता चन्द्रशेखरः ।।९८।।
अर्कः पलाशखदिरापामार्गाश्वत्थसम्भवाः।
उदुम्बरशमीदूर्वाकुशजाः समिधाः क्रमात् ।।९९।।
आर्द्राश्च सत्त्वनिबिडाः स्निग्धाः प्रादेशसंमिताः ।
कनिष्ठिकातुल्यवृत्ता होमकर्मणि कामदाः ।।१००।।
लिखिताष्टदले पद्मे तस्मिन्कुण्डे हुताशनम् ।
आचार्यः स्थापयेत्सम्यक् स्वगृह्योक्तविधानतः ।।१०१।।
मुखान्ते चार्चयेत्साधिदेवताश्चाखिलसंग्रहान् ।
पूर्वोक्तमन्त्रैः स्वैः स्वैश्च लोकपालान्समर्चयेत् ।।१०२।।
तस्याश्चेशानभागे तु पूर्णकुम्भं नवं न्यसेत् ।
पञ्चत्वक्पल्लवोपेतं शतौषधिसमन्वितम् ।।१०३।।
स्वर्णरत्नफलोपेतं मृत्तिकावस्त्रसंयुतम् ।
अब्लिङ्गैर्वारुणैर्मन्त्रैरर्चयेद्द्विजसंयुतम् ।।१०४।।
उदुम्बरवटाश्वत्थप्लक्षाम्राब्जजसम्भवम् ।
तिलमाषव्रीहियवा गोधूमाण्डप्रियङ्गवः ।।१०५।।
गजाश्वगोकुलस्थानाद्रथ्यावल्मीकसम्भवात् ।
ह्रदाच्च नगरद्वारात्सम्भूताष्ट च मृत्तिकाः ।।१०६।।
श्रीवृक्षबिल्वखदिरविष्णुक्रान्तापुनर्नवाः ।
देवदारुजटामांसीसहदेवीमुराशिवाः ।।१०७।।
फलिनीबकुलाजातिर्लतामञ्जिष्ठसंज्ञिका: ।
वटप्लक्षाम्रनीवारखदिरामल्लिकार्जुनाः ।।१०८।।

दमयन्तीमहाजातीनिम्बोशीरहरिद्रकाः ।
सर्पाक्षीतुलसीरौद्रकुटादाडिमचम्पकाः ।।१०९।।
मातुलुङ्गजपात्वष्टौकर्णिकारोर्णकाञ्चनाः ।
सेवतीपनसद्राक्षाविशाक्षीश्वेतसर्षपाः ।।११०।।
राजीवकुन्दमुकुलनीलोत्पलकरञ्जकाः ।
पुन्नागचन्दनद्रोणमन्दरो हेमदुग्धकः ।।१११।।
रक्तचन्दनजम्बीरयूथिकागृहमल्लिकाः ।
सम्पर्कसिन्दुवारेन्द्ररक्तधत्तूरखाण्डिमाः ।।११२।।
अपामार्गोरुपालाशबृहतीकरवीरकाः ।
नन्द्यावर्तकुबेराक्षापाटलीहेमपुष्पिकाः ।।११३।।
शिरीषामलकाशोकरक्तागस्तिकपित्थकाः ।
बन्धूकभृङ्गराजाख्यकृष्णवीमाधवीलताः ।।११४।।
चतुर्जातो बर्हिशिखा कुटजो मधुबिम्बकः ।
[२५८]तमालतरुपुष्पारुपुष्पाख्यश्चक्रमर्दिनी ।।११५।।
व्याकुली शाल्मली मौडीरास्नाखर्वपटोलिकाः।
महाखर्जूरिकानारिकेलाख्यास्ते शतद्रुमाः ।।११६।।
एषां मूलानि सर्वाणि नृणामेनो नुदन्ति यत् ।
शान्तिकर्मणि सर्वत्र निःक्षिपेत्कलशोदके ।।११७।।
एषामभावे तु दश सर्वौषध्यः प्रकीर्तिताः ।
उद्धृतासीति मन्त्रेण सदा तत्राष्टमृत्तिकाः ।।११८।।
चातुर्जातमुशीरं च पद्मकं फलिनीमुखम् ।
देवदारुनिशा चैषां त्वक्पत्राणि च निक्षिपेत् ।।११९।।
उपचाराणि सर्वेषामपि शुक्लाक्षतैः सदा ।
ग्रहवर्णाश्च दातव्या गन्धपुष्पाक्षतध्वजाः ।।१२०।।
कर्पूरागरुकस्तूर्यः कुङ्कुमं गन्धगुग्गुलुः ।

---

२५८ व२ पुष्पोह

SMT. HANSA MEHTA LIBRARY • The M. S. University of Baroda

कृष्णागुर्वक्षकर्पूरा धूपाः स्युर्भास्करादितः ।।१२१।।
उक्तसमिदभावे तु पालाशं तत्र कल्पयेत् ।
गन्धाभावे शुक्लगन्धं पुष्पाभावे सुगन्धकम् ।।१२२।।
धूपाभावे गुग्गुलुः स्याद्रव्याभावे [२५९]गुडौदनम् ।
पञ्चामृते गव्यमेव मिश्रकं न कदाचन ।।१२३।।
घृतान्नपायसापूपक्षीरमिश्रं गुडौदनम् ।
दधिमिश्रं तिलैर्मिश्रं सामिषं चित्रितौदनम् ।।१२४।।
संस्कारार्थे चतुर्णां च होमार्थे स्थापयेच्च तान् ।
अग्नेयजुष्टमन्त्रेण उद्धृतेष्वभिपूरयेत् ।।१२५।।
आदौ तु समिधाज्यान्नैः पृथगष्टोत्तरं शतम् ।
स्वस्वमन्त्रैश्च जुहुयाद् ग्रहोद्देशेन भक्तितः ।।१२६।।
द्वित्राश्चैवाधिदैवत्याः पञ्चानां चैव पञ्चधा ।
इन्द्रादिलोकपालानां न कुर्यात्समिधादि यत् ।।१२७।।
हुनेदाज्याक्तसमिधश्चोपस्तरणपूर्वकम् ।
अवदानं सकृत्कुर्यात्पश्चाच्चैवाभिघारणम् ।।१२८।।
प्रमाणमाहुतेश्चात्र पक्वामलकसम्मितम् ।
चरुशेषं च नैवेद्यं विविधान्नं समर्पयेत् ।।१२९।।
ततो व्याहृतिभिः कुर्यात्तिलहोमान्प्रयत्नतः ।
प्रथमोऽयुतहोमश्च लक्षहोमो द्वितीयकः ।।१३०।।
तृतीयः कोटिहोमः स्यात्त्रिविधो ग्रहयज्ञकः ।
एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ।।१३१।।
शिवगाथां विष्णुगाथां शान्तिर्ब्राह्मणभोजनम् ।
[२६०]समाचरेत्प्रतिदिनमेवं भक्त्या समन्वितः ।।१३२।।
ततो जपादीञ्जुहुयात्पूर्णाहुति समाचरेत् ।
स्वस्तिकं कल्पयेत्पश्चात्कुण्डस्येशानभागतः ।।१३३।।

---

२५९ व३ तु मिश्रकं

२६० व३ समापयेत्

यजमानाभिषेकार्थं तत्र भद्रासनं न्यसेत् ।
प्राङ्गमुखस्योपविष्टस्य यजमानस्य तत्र च ।।१३४।।
अभिषेकं ततः कुर्युः साचार्याः षोडशर्त्विजः ।
विविधैर्मङ्गलैर्घोषैः सूतमागधकैः सह ।।१३५।।
वक्ष्यमाणैश्च मन्त्रैश्च अब्लिङ्गैर्वेदमन्त्रकैः ।
कुम्भोदकैः पूर्णजलैरुक्तद्रव्यसमन्वितैः ।।१३६।।
ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।
विषमस्थानसम्भूतां पीडां दहतु मे रविः ।।१३७।।
रोहिणीशः सुधादीप्तः सुधागात्रः सुधाशनः ।
विषमस्थानसम्भूतां पीडां दहतु मे विधुः ।। १३८।।
भूमिपुत्रो महातेजा[२६१] जगतां भयकृत्सदा ।
वृष्टिकृद्वृष्टिहर्ता च पीडां दहतु मे कुजः ।।१३९।।
उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान्पीडां दहतु मे बुधः ।।१४०।।
देवमन्त्री विशालाक्षः सदा लोकहिते रतः ।
अनेकशिष्यसम्पूर्णः पीडां दहतु मे गुरुः ।।१४१।।[२६२]
दैत्यमन्त्री गुरुस्तेषां प्राणदः स महाद्युतिः ।
प्रभुस्ताराग्रहाणां च पीडां दहतु मे भृगुः।।१४२।।
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।
मन्दचारः प्रसन्नात्मा पीडां दहतु मेऽर्कजः ।।१४३।।
महाशिरो महावक्त्रो दीर्घदंष्ट्रो महाबलः ।
अतनुश्चोर्ध्वकेशश्च पीडां दहतु मे तमः ।।१४४।।
अनेकरूपवर्णश्च शतशोऽथ सहस्रशः ।
उत्पातरूपो जगतः पीडां दहतु मे शिखी ।।१४५।।
ततो राज्ञोऽभिषिक्तस्य रक्षार्थे बलिमुत्क्षिपेत् ।

---

२६१ व२ जाया
२६२ व२ पूर्णश्लोकलोपः

दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्ततः ।।१४६।।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ।
ततो मण्डपमागत्य ध्यायेदग्निं ग्रहान् सुरान् ।।१४७।।
प्रत्येकं प्रतिमन्त्रैश्च दद्यात्पुष्पाञ्जलिं ततः ।
मन्त्रतन्त्रक्रियालोपप्रायश्चित्तार्थमेव च ।।१४८।।
यदस्य कर्मण इति स्विष्टकृज्जुहयात्ततः ।
अस्य मन्त्रस्यातिधृतिः स्वर्णगर्भ ऋषिस्ततः ।।१४९ ।।
देवताग्निः स्विष्टकृच्च व्याहृतेर्व्याहृतं ततः ।
समिधादिद्रव्यमयमवदाय सकृत्सकृत् ।।१५०।।
मिलित्वा स्रुक्स्रुवं तत्र निक्षिपेदभिघार्य तत् ।
मन्त्रेण सप्त ते अग्नेरिति पूर्णाहुतिं [२६३]यजेत् ।।१५१।।
आचार्येभ्यो नवभ्यश्च ग्रहार्चनफलं ततः ।
समिधाज्यचरूणां च तिलहोमफलं च यत् ।।१५२।।
ब्रह्मत्वं कुम्भपूजायां चार्चनस्य फलं च यत् ।
गणपक्षेत्रपालाश्च[२६४] दुर्गाहव्याङ्गदेवताः ।।१५३।।
तासां जपफलं सम्यग्गृहणीज्जलपूर्वकम् ।
एवं षोडशऋत्विग्भ्यो दातव्या दक्षिणा ततः ।।१५४।।
धेनुं शङ्खं रक्तवृषं हेमं पीताम्बरं हयम् ।
श्वेताश्वं कृष्णवर्णां गां कृष्णलोहमजं क्रमात् ।।१५५।।[२६५]
स्वर्णेन वा समीकृत्य दातव्या दक्षिणा ततः।
आचार्यार्थं जापकेभ्यो ब्राह्मणेभ्योऽथ शक्तितः ।।१५६।।

तत्र दानमन्त्राः[२६६]

---

२६३ व३ हुनेत्

२६४ व२ श्लोकप्रथमपादलोपः, व१ पार्केश

२६५ व१ श्लोकलोपः

२६६ व३ श्लोकसंख्या १५५ अनन्तरं ग्रन्थो नोपलभ्यते। हस्तलिखितस्योपरिभागेऽधोभागे च गर्गमतं प्रदर्शितम्–

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ।।१५७।।
कपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थरूपमयी यस्मादतः शान्तिं प्रयच्छ मे ।।१५८।।
इति गोदानकपिलादानमन्त्रौ ।
पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गल।
विष्णुनापि धृतो यस्मादतः शान्तिं प्रयच्छ मे ।।१५९।।
इति शङ्खदानमन्त्रः ।।
धर्मस्त्वं वृषभरूपेण जगदानन्दकारकः ।
अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ।।१६०।।
इति वृषभदानमन्त्रः ।
हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।१६१।।
इति स्वर्णदानमन्त्रः।
पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ।
प्रदानात्तस्य मे विष्णुर्ह्यतः शान्तिं प्रयच्छ मे ।।१६२।।
इति पीतवस्त्रदानम् ।
विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः ।

धरणिधरविरोधो व्याधिबाधाप्रजानामुरगनहशामुर्विकम्पनं वातपातैः
शुभदसमवियोगो सर्वजशस्यवाप्तो भवत्तितिभानर्दने हीनचारे जीवेति
चाहीनरुजे भयाय शस्त्राग्निबाधामहशाप्रजानां सिंधोदिर्वात
र्घजवाऽग्निराज्यधत्ते तत्र वसरूपनाशमुत्पन्नद्विजजामीश्वरा
ज्ञानजासुताक्षपिकाश्मीरेषु क्षयं यंतिअतिचारी बृहस्पतिः।
ऋक्षे राहुशनैश्चरा यदि गजाशोकाग्निशोङ्गवराज्योज्याटन
भृज्युकालदहनं भूकम्पमुल्काशनिदुर्भिक्षत्वथ यस्थक्षीर
सहसा गाव पञ्चनामजिर्वाधिर्पित्तरोगजापसहिता शस्त्राग्निवाघापरि—इति गर्गः

चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ।।१६३।।

इत्यश्वदानमन्त्रः।

यस्मात्त्वं पृथिवी सर्वा धेनो कृष्णेन सन्निभा ।
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ।।१६४।।

इति कृष्णधेनुदानमन्त्रः ।

यस्मादायसकर्माणि तवाधीनानि सर्वदा ।
लाङ्गलाद्यायुधादीनि तस्माच्छान्तिं प्रयच्छ मे ।।१६५।।

इत्यायसदानमन्त्रः।

यस्माद्रत्नप्रदानेन स्वर्गभोगं लभेन्नरः ।
तस्मादनेन दानेन स्वर्गभोगश्च मे भवेत् ।।१६६।।

इति रत्नदानमन्त्रः ।

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तफलदा यस्मादतः शान्तिं प्रयच्छ मे ।।१६७।।

इति भूमिदानमन्त्रः ।

यस्मात्त्वं छाग यज्ञानामङ्गत्वेन व्यवस्थितः ।
योनिर्विभासोर्नित्यमतः शान्तिं प्रयच्छ मे ।। १६८।।

इति छागदानमन्त्रः ।

यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
तथा मे शयनं शश्वद्भवेज्जन्मनि जन्मनि।।१६९।।[२६७]

इति शय्यादानमन्त्रः ।

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।१७०।।

इति वस्त्रदानमन्त्रः।

अवशिष्टद्विजेभ्यश्च यावच्छक्त्या च दक्षिणाम् ।
दीनान्धकृपणादिभ्यः किंचित्किंचित्प्रदापयेत् ।।१७१।।

---

२६७ व१ पूर्णश्लोकलोपः

वन्दे सर्वरसश्रेष्ठ त्वामहं भगवन्नजः ।
अत आज्य सुधारूप सर्वश्रेष्ठं कुरुष्व माम् ।।१७२।।
इति आज्यपात्रपूजनमन्त्रः ।
या लक्ष्मीर्यच्च मे दौस्थ्यं सर्वमात्रेष्ववस्थितम् ।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ।।१७३।।
इत्याज्यावेक्षणमन्त्रः।
उद्वासयेत्ततो वह्निं ग्रहान्देवान्द्विजान्पितऽन् ।
ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ।।१७४।।
एवं यः कुरुते सम्यग्ग्रहयज्ञं सहैव सः ।
सर्वान्कामानवाप्नोति स्वस्थानस्थफलं लभेत् ।।१७५।।
इदं बलद्वयं चिन्त्यं मासि मासि स्वजन्मतः ।
अष्टवर्गबलं मुख्यमुभयोः सर्वकामिकम् ।।१७६।।
यथा ग्रहाणां तीक्ष्णांशुः सदा तु सदृशो बली ।
अष्टवर्गबलं तद्वद् ग्रहाणामुत्कटं बलम् ।।१७७।।
अष्टवर्गबलं यत्र तत्रास्ति त्रिविधं बलम् ।
तस्माद्बलत्रयाणां तत्साधयेदष्टवर्गजम् ।।१७८।।
ग्रहेषु विषमस्थेषु यः शान्तिं न करोति सः ।
अर्थहानिं मनस्तापं [२६८]चाश्नुते सर्वसंकटान् ।।१७९।।[२६९]

---

२६८ व१ मरणं च समाप्नुयात्

२६९ व२ मध्येऽधिकम्-
नवोद्ध्र्ववेलाः प्रविलिख्य तिर्यक् त्रयोदशीभिश्च विधाय खेटान्।
मंदामरेज्यारस्वरांशुक्रशशांकजेंडूनपि जन्मलग्नं ।।१८०।।
जीवश्चतुर्विंशतिरेतदेव समस्तसिद्धांतनिदानभूताः
वक्ति समाश्रित्य हि वक्ष्यमाणा प्रपंचमेनं प्रविधाय यंति ।।१८१।।
सर्वाष्टवर्गेषु शनैश्चरादीन् भूगोलवत् तत्र लिखेदधोधः।
विलिख्य बिन्दूनपि तत्र तत्र दैवत्यवर्योमृतबिंदुतुल्यान् ।।१८२।।
आदौ चक्रसमुद्धारे बिंदुनास्फोटनं ततः।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां गोचरविचाराध्यायोऽष्टादशः ।।१८।।

प्रस्तारादष्टवर्गेण प्रत्येकाष्टकवर्गतः।।
आयुर्दायस्ततो भावफलं तस्य च कारणं ।
देशकालविभागोपि कालाकालश्च कीर्तितः।
प्रस्तारादष्टवर्गेण प्रत्येकाष्टवर्गतः ।
आयुर्दायस्ततो भावफलं तस्य च कारणं।।
देशकालविभागोपि कालाकालश्रुतीस्ततः ।
प्रस्तारादष्टवर्गेण प्रत्येकाष्टवर्गतः।
शरस्य परिणामोपि तत लोकविलंबनं ।
भाविजन्मपदं यच्च चिंतनीयं पितामहात् ।।

१९

२.१९.० संक्रान्तिः

रविरविजभौमवारसंक्रान्तौ दिनकरस्य यन्मासे ।
पित्तकफानिलजामयनरपतिकलहस्त्ववृष्टिश्च ।।१।।
बुधगुरुसितचन्द्राहे संक्रान्तावनामयं नृणाम् ।
क्षितिपतिनिकरक्षेमं सस्यविवृद्धिं विधर्मिणां मरणम् ।।२।।
घोरोग्रर्क्षे ध्वाङ्क्षी लघुभे चरभे महोदरी मृदुभे ।
मन्दाकिन्यचरर्क्षे मन्दा मिश्रा च राक्षसी तीक्ष्णे ।।३।।
शुद्रविट्चौरभूपद्विजगणपशुमुख्यसर्वजन्तूनाम् ।
शुभफलदाः [270]क्रमशस्ता नूनं संक्रान्तयस्तेषाम् ।।४।।
नागचतुष्पदतैतिलकरणे सुप्तः करोति संक्रमणम् ।
कौलवशकुनिकिंस्तुघ्ने करणे चोर्ध्वस्थितो दिनकृत् ।।५।।
गरबवविष्ट्यां वणिजे सबालवे सततं च निविष्टः।
सततं जगतां वृष्टिर्धान्यार्घत्वं विशेषतः क्षेमम् ।।६।।
क्रमशस्त्वनिष्टमिष्टं मध्यमरूपं भवेदतुलम् ।
नानाविधान्रोगानप्येवं ज्ञातव्यमर्भकादीनाम् ।।७।।
पूर्वाह्णे नृपतिभयं मध्याह्ने हन्ति भूसुरानखिलान् ।
अपराह्णे वैश्यगणं शूद्रानखिलान्हि चास्तमये ।।८।।
रात्रिचरान्निशिसमये सन्ध्यासमये पिशाचगणान् ।
नटनर्तकानपरनिशि पशुपान्निखिलान्निहन्त्युषसि ।।९।।
केवलसंध्यासमये लिङ्गिव्रातं च निखिलसंन्यासीन् ।
शुभफलदा संक्रान्तिरनुक्तकाले नृणां सततम् ।।१०।।
[271]दिनपतिसंक्रमणात्प्राक् षोडशनाड्यः स पुण्यकालस्तु ।

---

२७० व२ क्रमकौलवशकुने
२७१ व१ दिनकर

परतः षोडशनाड्यः सर्वत्र स्नानदानयोः[२७२] पुण्याः ।।११।।
संक्रमणं यद्यहनि तदहः पुण्यं च पुण्यकार्येषु ।
निश्यर्धात्प्राक्संक्रमणं पूर्वाहः स्नानदानयोः पुण्यम् ।।१२।।
निश्यर्धात्संक्रान्तिः पश्चाच्चेत्परदिनं पुण्यम् ।
निशिसमये साक्षाच्चेद्दिनद्वयं स्नानदानयोः पुण्यम् ।।१३।।
स्थिरराशिषु विष्णुपदं षडशीतिमुखं यद्युभयभे चैव ।
मृगकर्कटसंक्रान्ती ह्युदगयनं दक्षिणायनं चैव ।।१४।।
[२७३]अजतुलसंक्रान्तिद्वयं विषुवत्प्रकीर्तितं नित्यम् ।
द्वादशसंक्रान्तीनां चतुष्टयं तद्विशिष्टतमम् ।।१५।।
हरिपदयाम्यत्वयने पूर्वदिनं स्नानदानयोः पुण्यम् ।
षडशीतिमुखे त्वयने सौम्ये पुण्यं च परदिनं निशि चेत् ।[२७४]
इति सञ्चिन्त्य विनिर्णयमादेष्टव्यं सदैव दैवज्ञैः ।।१६।।
विषुवत्ययने ग्रहणे संक्रान्तौ पुण्यदिवसे वा ।
पितृतृप्तिं यो न करोति दत्त्वा शापं व्रजन्ति तस्य सदा ।।१७।।
आगतगतसमयेऽपि च करोति दानं जपं च होमाद्यम् ।
ऊषरवापितबीजं यद्वत्तद्वच्च निष्फलं भवति ।।१८।।
सुतजनने संक्रान्तौ उपरागे चन्द्रसूर्ययोर्नित्यम् ।
रात्रावपि कर्तव्यं स्नानं दानं विशेषतो नऽणाम् ।।१९।।
अजकन्यावृषकर्किणि संक्रान्तौ यदि भवेद्वर्षम् ।
अतुलं क्षेमसुभिक्षं नृपसज्जनगोकुले क्षेमम् ।।२०।।
[२७५]घटचापसिंहमिथुनसंक्रान्तौ यदि भवेद्वर्षम् ।
आमयडामरभूभुजयुद्धभयं[२७६] त्ववृष्टिश्च ।।२१।।

---

२७२ व२ स्नानकार्येषु
२७३ व१ अजघट, वे.धट
२७४ व१ मध्येऽधिकम्
पदहस्तविषुवद्वयमस्मिन्नह्नि प्राकीर्तितं पुण्यं।।१७
२७५ व१,व२ घट, चौ. झष

[२७७]घटतुलवृश्चिकमकरे वृष्टिः स्यात्संक्रमणसमये ।
विस्फोटामयतस्करपीडावृष्टिः कृशानुभयम् ।।२२।।
हरिशार्दूलवराहगर्दभगजमहिषाश्च[२७८] घोटकाश्चैव ।
[२७९]श्वाजवृषभकुक्कुटाः स्युः संक्रान्तेर्वाहनानि बवकरणात् ।।२३।।
बाह्लीकखशवङ्गाङ्गेषु तु विज्ञेयं वाहनं च ऋक्षभवम् ।
करणभवं त्वन्यस्मिन्देशे नियतं च वाहनं ज्ञेयम् ।।२४।।
क्रमशो बिभर्ति दिनपो बवतो भुशुण्डी गदाख्यं च ।
खड्गाख्यं दण्डकार्मुकतोमरकुन्तपाशाङ्कुशास्त्रशराः ।।२५।।[२८०]
विधोर्बलाबलेनैतत्संक्रमेण दिवाकरः ।
ददाति तत्फलं नृणां तस्मिन्मासे तु गौणतः ।।२६।।
हानिश्चेदर्कसंक्रान्तिर्जन्मपूर्वर्क्षतस्त्रिषु ।
अर्थलाभं तथा षट्सु[२८१] शेषेष्वेवमुपप्लवः ।।२७।।
[२८२]दशन्ति सूर्यभुक्तर्क्षान्निर्जीवाख्यं च भत्रयम् ।
एकादशर्क्षं विंशर्क्षं मङ्गले निधनप्रदम् ।।२८।।
शूलदोषापनुत्त्यर्थं निर्जीवस्यापनुत्तये ।
स्वर्णशूलं द्विजे दद्यात्तिलवस्त्रसमन्वितम् ।।२९।।
अर्कबिम्बचरान्नित्यं[२८३] भचक्रं लभतेऽयनात् ।
अस्तोदये तदयनमुच्चनीचोच्चवर्त्मनः ।।३०।।

---

२७६ वर युद्धमनर्घनष्टवृष्टिश्च
२७७ व१ घटवृश्चिकवृष, व२ घटवृषवृश्चिक, वे.घटवृष
२७८ व१ श्वोष्ट्र
२७९ व१ अजवृषभ
२८० व१ क्रमशो विभाति दिनपो बवतो मुष्टिं भिंडिपालाख्या।
खङ्गाख्यदंडकार्मुक्तो मरकुताख्यपाशबाणसणीः।।२६
२८१ व१ षड्
२८२ व१ दशांत
२८३ व१ वरान्निसंभवं तु लभते

तदंशैर्न्यूनकालो हि वर्तमानस्य निर्गमः ।
परराशिप्रवेशश्च राशीनामेवमेव हि ।।३१।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां संक्रान्त्यध्याय एकोनविंशः ।।१९।।

२०

२.२०.० चन्द्रताराबलम्

प्रथमदिने वत्सरत: शुभदे चन्द्रे च यस्य पुरुषस्य ।
तद्वर्षे शिशिरकर: शुभफलदस्तस्य [२८४]वेधयुक्तोऽपि ।।१।।
अयनादौ ऋतुसमये मासेऽप्येवमेव विजानीयात् ।
ताराबलमाप्तिस्तच्छुभतारा चेत्तथैव शुभदा स्यात् ।।२।।
सितपक्षस्याद्यदिने शुभदस्तत्पक्षमतिशुभद: ।
असितस्यादावशुभ: शुभफलद: पक्षमखिलं तत् ।।३।।
जन्मत्रिकलत्ररिपुद्वितीयनवमायसुतदशमे ।
सितपक्षे हिमकिरण: शुभद: कृष्णे त्रिपञ्चधननवमे ।।४।।
जन्मभमनुजन्मर्क्षं त्रिजन्मभं नेष्टमखिलकार्येषु ।
सम्पत्तारा शुभदा विपदाख्या विपत्प्रदा तारा ।।५।।
क्षेमाख्या क्षेमकरी प्रतिकूला प्रत्यरिस्तारा ।
साधनभं साधनदं नैधनभं नैधनं नृणाम् ।।६।।
मैत्रीकरणं मित्रभमतिमैत्रं परममैत्रर्क्षम् ।
एवं विचार्य सततं बलाबलं दैववित्कथयेत् ।।७।।
सितपक्षे हिमकिरणो बलवान्कृष्णेऽपि बलवती तारा ।
शशिबलवत्प्राधान्यं शुक्ले कृष्णे च तारका याश्च ।।८।।
अमृतकिरणस्त्वमृतभवस्तद्बलमखिलं च तद्वत्स्यात् ।
अमृतमयं तत्तस्मादभ्यधिकं त्वन्यखेटबलान् ।।९।।
[२८५]तुहिनकरो जगतां यद्वत्तद्वच्च तद्बलं त्वखिलम् ।
तन्महिमानं व्याचष्टे गुणरूपं निखिलजन्तूनाम् ।।१०।।
[२८६]अखिलमृगाणां हरिरिव खचरबलानां च चन्द्रबलम् ।

---

२८४ वे.चौ.वेध
२८५ व२ आनंदकरो

हिमकिरणे बलिनि सति सर्वे बलिनो वियच्चरा नित्यम् ।।११।।
[२८७]अभ्यधिकं चन्द्रबलं त्वबलं ताराग्रहोद्भवं निखिलम् ।
हिमकिरणबलार्धादपि नो तुल्यं ग्रहबलं सर्वम् ।।१२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां चन्द्रताराबलाध्यायो विंशः ।।२०।।

---

२८६ वे.चौ. बला –शब्दोऽधिकः

२८७ व१ अधिकाधिकं

२१

२.२१.० उपग्रहाः

दिनकरभात्सप्तमभं भूकम्पं पञ्चमर्क्षमतिविद्युत् ।
शूलोपग्रहमष्टमभं दशमर्क्ष[२८८] चाशनिं च विज्ञेयम् ।।१।।
केतुरूपग्रहदोषस्त्वष्टादशमं च दण्डसंज्ञश्च ।
पञ्चदशं दशनवमं चोल्कापातं चतुर्दशं पातः ।।२।।
मेघोपग्रहदोषो निर्घातकम्पसंज्ञवज्रनिभः।
एकोत्तरविंशतिभादुक्ताः क्रमशो ह्युपग्रहा दोषाः ।।३।।
हिमकिरणे त्वेषु युते शुभकार्यं मृत्युदं नृणाम् ।
उद्वाहादिषु सततं विचार्य लग्नं वदेद्धीमान् ।।४।।
रविभादहिपितृमित्रत्वाष्ट्रभहरिपौष्णभेषु [२८९]गणितेषु ।
अश्विनीभादिन्दुयुते तावति वै[२९०] पतति गणनया पातः ।।५।।
अयमपि पातो दोषश्चण्डीशचण्डायुधाह्वयो ज्ञेयः ।
अखिलेषु मङ्गलेष्वपि वर्ज्यो यस्माद्विनाशदः[२९१] कर्तुः ।।६।।
दस्रेन्दुभुजगभास्करमित्रोत्तराषाढजलधिष्ण्येषु ।
क्रमशो रविवारादिष्वानन्दाद्याः[२९२] क्रमाद्योगाः ।।७।।[२९३]
आनन्दः कालदण्डो धूम्राख्योऽथ प्रजापतिः सौम्यः।
ध्वाङ्क्षोऽथो ध्वजसंज्ञः श्रीवत्सो वज्रमुद्गरौ छत्रम् ।।८।।
मित्रं मानससंज्ञः पद्माख्यो लम्बकस्तथोत्पातः ।
मृत्युः काणः सिद्धिः शुभामृतौ मुशलमथ गदाख्यश्च।।९।।

---

२८८ व१ दशमं चाशशिनि
२८९ व१,व२ सत्सु
२९० व२ ये गणनया पाते
२९१ व२ विनाशदिक्
२९२ व१ दिष्टानां दोषास्त्वमी योगे
२९३ व२ श्लोकस्योपरि- सू,चं.मं,बु.बृ,शु,श. इति व्याख्या लिखिता

मातङ्गराक्षसाह्वयचरस्थिरप्रवर्धमानसंज्ञाः स्युः ।
अष्टाविंशतिसंख्या निजनिजसंज्ञासदृशफलदाः स्युः ।।१०।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायामुपग्रहाध्याय एकविंशः ।।२१।।

२२

२.२२.० ग्रहकूटम्

ग्रहकूटमतो यस्माच्छुभाशुभं भवति जन्तूनाम् ।
तद्ग्रहकूटविधानं नूनं सम्यक्समासतो वक्ष्ये ।।१।।
स्फुटमानीय खगेन्द्रं लिप्तीकृत्वा खखाष्टभिर्भक्तम् ।
गतधिष्ण्यानि च लब्धमवशिष्टं वर्तमानकं ज्ञेयम् ।।२।।
षष्टिहतं गतगम्यं भुक्तिहृतं नाडिकादितो ज्ञेयम् ।
खचराधिष्ठितधिष्ण्यं ज्ञात्वा सर्वं विचिन्तयेत्पश्चात् ।।३।।
यस्य नरस्य हि जन्मनि धिष्ण्ये क्रूरैर्निपीडिते खचरैः ।
अतिदुःखामयशोकं भयं प्रवासः शत्रोर्भयं भवति ।।४।।
यस्मिन्धिष्ण्ये विपदि प्रत्यरिभे स्थाननाशनं भवति ।
निधनं नैधनधिष्ण्ये बन्धनमथवा [२९४]स्थितेऽपाये ।।५।।
शुभखचरेषु स्थितेषु नक्षत्रेषु त्वल्पहानिः स्यात् ।
मध्यमफलदाः सौम्याः पापाश्चानुक्तभेषु भीतिकराः ।।६।।
यस्मिन्धिष्ण्ये यः प्रभवति तदेव तज्जन्मभं विजानीयात् ।
दशमर्क्षं कर्माख्यं संघाताख्यं च षोडशं धिष्ण्यम् ।।७।।
समुदायं द्विनवमभं यद्वैनाशं त्रयोविंशम् ।
पञ्चोत्तरविंशच्च मानसंज्ञं[२९५] महादुष्टम्[२९६] ।।८।।
[२९७]षड्भानि च शुभकर्माणि तानि विनाशदानि जन्तूनाम् ।
राज्ञां विशेषभानि तु देशोद्भवजानि पट्टबन्धानि ।।९।।
नवधिष्ण्यानि नृपाणां विनाशदान्येव सर्वकार्येषु ।

---

२९४ व१ स्थिते पापे, व२ स्थिते पाते
२९५ व२ मानससंज्ञं,
२९६ व२ दुःखं
२९७ व२ यद्

अत एवाखिलविषये नूनं वर्ज्याणि सर्वदात्यर्थम् ।।१०।।
कृतमखिलं जन्मनि भे विनाशमायाति तत्कार्यम् ।
कर्मणि कर्मविनाशं संघातर्क्षे शरीरनाशः स्यात् ।।११।।
रोगभयं समुदाये वैनाशिकभेऽपि नाशः स्यात् ।
हृदयभयं मानसभे देशजभे राजपीडा स्यात् ।।१२।।
जात्यर्क्षे जातिभयमभिषेकर्क्षे च राजनाशः स्यात् ।
क्रूराम्बरचरनिहतेष्वेषु च भेषु प्रभूतपीडा स्यात् ।।१३।।[२९८]
ग्रहयज्ञैरभिषेकैर्होमैर्दानैः [२९९]प्रयाति शमनं वै ।
जन्मनि धिष्ण्ये यस्य ग्रहणोत्पाता भवन्ति तस्यैवम् ।।१४।।[३००]

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां ग्रहकूटाध्यायो द्वाविंशः ।।२२।।

---

२९८ व१ श्लोकस्य द्वितीयपादलोपः
२९९ व१ प्रशमनं याति
३०० व१ श्लोकस्य द्वितीयपादलोपः

२३

२.२३.० लग्नबलम्

अभिषेको नृपतीनां साहसकर्मादि वैरोधम् ।
आकरधातुवादाद्यखिलं मेषोदये कार्यम् ।।१।।
स्थिरचरकार्यं त्वखिलं विवाहवास्त्वादिकन्यकावरणम् ।
क्षेत्रारम्भणमखिलं भूषणशिल्पादिकारकं वृषभे ।।२।।
मेषवृषोक्तं कर्म गजतुरगोष्ट्रादिकं च गोकर्म ।
अविकलमहिषमेषक्षितिपतिसेवादिकं मिथुने ।।३।।
शान्तिकपौष्टिकमाङ्गलजलबन्धनमोक्षमखिलजलकर्म ।
[३०१]दैविककूपतडागशिल्पोद्वाहादि कर्कटे कार्यम् ।।४।।
परयोगो नृपसेवा कृषिकर्मवणिङ्महाहवाद्यखिलम् ।
स्थिरकर्माखिलवास्तुनि वेश्मशिल्पादि सिंहभे कार्यम् ।।५।।
भूषणमङ्गलकार्यमौषधविज्ञानपुण्यशिल्पादि ।[३०२]
उद्वाहशान्तिपौष्टिकगजतुरगोष्ट्रादि कन्यायाम् ।।६।।
कन्योक्ताखिलकार्यं तुलादिमानानि भाण्डकर्माणि ।
यात्रावास्तुविधानं तौलिनि कृषिकर्म वाणिज्यम् ।।७।।
साहसदारुणचित्रकलेखकवास्तूग्रशास्त्रकर्माद्यम् ।
आहवकृषिवाणिज्यं क्षितिपतिवादश्च वृश्चिके कार्यम् ।।८।।[३०३]
शान्तिकपौष्टिकशिल्पिकसन्धानाश्वादिनृत्यगीताद्यम् ।

---

३०१ व१ दैर्घिक

३०२ व१ प्रथमपादलोप:

३०३ व१ श्लोकस्य द्वितीयपादत: श्लोकक्रमाङ्क पञ्चविंशतिश्लोकस्य प्रथमपादपर्यन्तं श्लोकानां लोप: व२ पूर्णश्लोकस्य लोप:

राजोपकरणमखिलं भूषणवास्त्वादि चापभे सेवा ।।९।।
शम्बरमोचनबन्धनभूषणरत्नादि शिल्पधान्यादि ।
क्रयविक्रयमखिलं यद्रिपुहननोद्योगमाहवं मकरे ।।१०।।
युद्धोपकरणभूषणजलधान्यशिल्पाश्च गोधनाद्यं यत् ।
पण्यासवपुरनगरप्रवेशनं कर्म घटे लग्ने ।।११।।
यज्जलबन्धनमोचनजलयात्रारत्नभूषणं कर्म ।
रथतुरगेभपशूनां कार्यं मीनोदये शिल्पम् ।।१२।।
[३०४]पापयुतेक्षितरहिता मेषाद्याश्चोक्तफलदाः स्युः ।
नो चेदुक्तफलं वै दातुं शक्ता भवन्ति न कदाचित् ।।१३।।
सम्पूर्णफलदमादौ विलग्नमध्येऽथ मध्यफलम् ।
अन्ते तु तुच्छफलं सर्वत्रैवं विचिन्तयेद्धीमान् ।।१४।।
त्रिंशद्भागं लग्नमितं तदर्धतुलिता तु होराख्या ।
लग्नतृतीयो भागो द्रेष्काणः स्यान्नवांशको नवमः ।।१५।।
द्वादशभागो द्वादशमस्त्रिंशत्तमस्त्रिंशदंशः स्यात्।
षड्वर्गो भवति सदा शुभखचरसमुद्भवाः शुभदाः ।।१६।।
पापसमुत्थस्त्वशुभस्तस्माद्ग्राह्यस्तु[३०५] सौम्यषड्वर्गः ।
शुभकर्मणि सततं संत्याज्यः पापाह्वयो वर्गः ।।१७।।
चापनृयुग्घटवृषभा कर्कटकन्यान्त्यराशयः शुभदाः ।
शुभभवनत्वादन्ये त्वशुभग्रहत्वादशोभनाः पञ्च ।।१८।।
स्थिरराशौ शुभवर्गे नैधनशुद्धे चतुष्टये सौम्ये ।
द्विपदगृहे लग्नगते वास्तुनिवेशः शुभो न भोगचरे ।।१९।।
शुभखचरा[३०६] घटराशिं विसृज्य धनलाभलग्नकर्मस्थाः ।
अव्ययगास्त्वशुभखगा विपणिं यदि सेन्दुभार्गवे योगे ।।२०।।
धर्मात्मजनैधनभे चरवर्गे त्वर्थसंग्रहः कार्यः ।

---

३०४ व२ पापयुते शब्दस्य लोपः

३०५ वे.बाह्यस्

३०६ व१ शुभखेचराश्चरराशौ विसर्ज्य

बुधे लग्नदशमगते भौमे चौर्यस्य मुख्यकालः स्यात् ।।२१।।
शुभलग्ने दशमभावे रवौ कुजे वाऽथ तद्वर्गे ।
आयुधविद्या कार्या नृपसेवा वैरिनिग्रह कार्यः ।।२२।।
शुभखचरे लग्नगते शुभवर्गे चाथ नैधने शुद्धे ।
पशुसंग्रहणं कार्यं रक्षावृद्धिर्विशेषतस्तेषाम् ।।२३।।
बलवति दितिजगुरौ वा शुक्रे वा दुर्बलेष्वकथितेषु ।
पुंजन्मकथितलग्ने पुत्रार्थी कामयेत्प्रियां पत्नीम् ।।२४।।
सुरसचिवे शुक्रे वा धर्मात्मजलग्नगे बलिनि ।
पुंजन्मकथितयोगे समुपेयात्प्रेयसीं मुदितः ।।२५।।
बलयुक्तैः शुभखचरैरन्यैः स्थिरोदये ग्राम्ये ।[३०७]
अष्टमशुद्धियुतेऽस्मिन्नवसद्मप्रवेशनं कार्यम् ।।२६।।
सुरगुरुहिबुके लग्ने भानौ वारे च सुकृतवृद्धिः स्यात् ।
गुरुलग्नेऽर्के दशमे कर्तव्यं त्वभिचारमखिलं हि ।।२७।।
उदगयने पूर्णेन्दौ जीवे वा भास्करे च दशमगते ।
अभिषेकं नृपतीनामुत्सवकार्याणि सितदिवसे ।।२८।।
हिमकिरणे लग्नगते जीवे केन्द्रे च चन्द्रसितवारे ।
रससंग्रहणं कार्यं सस्यारामादिनिखिलजलकर्म ।।२९।।
लग्नगते सुरसचिवे दशमस्थैः क्रूरखेचरैरबलैः ।
प्रवज्याह्वययोगे ज्ञानग्रहणं मुमुक्षुभिः कार्यम् ।।३०।।
बुधराशिगते चन्द्रे शुभखचरे शुभे[३०८] वर्गे ।
ज्ञानग्रहणं कार्यं हित्वा पापग्रहोदयं च तद्वर्गम् ।।३१।।
शुभकार्याण्यखिलानि तु त्रिकोणकेन्द्रस्थितेषु सौम्येषु ।
व्ययनैधनरिपुलग्नैरसंयुते यत्र तुहिनकरे ।।३२।।
शशितनये जीवे वा चन्द्रे वा लग्नगे बलिनि धर्मे वा ।
तद्वर्गे लग्नगते शिल्पारम्भः प्रशस्यते सततम् ।। ३३।।

---

३०७ व१ प्रथमपादलोपः

३०८ वे.पा. षड्

उदगयने शशितनये गुरुवीक्षिते शीतगौ ज्ञराशिस्थे ।
हिबुकस्थैः शुभखचरैर्नाट्यारम्भः [३०९]प्रशस्यते नूनम् ।।३४।।
लग्नगते तुहिनकरे त्रिकोणकेन्द्रस्थितैः शुभदैः ।
सततं घटभं हित्वा पण्यं कर्म लाभदं भवति ।।३५।।
निधनारिव्ययमन्मथभवने शुद्धे शुभेषु बलवत्सु ।
वरसिद्धामृतयोगे त्वौषधसेवा सुवीर्यदा तत्र।।३६।।
सुरगुरुमैत्रभभाग्ये द्वादश्यां वा पक्षमध्यतिथौ ।
सितयुतवीक्षितलग्ने तैतिलकरणे च [३१०]सन्धिः स्यात् ।।३७।।
शशिनैर्ऋतयमपितृभेष्वष्टमशुद्धे भृगौ च पाताले ।
घटलग्नगते शशिजे निखिलवेतालकर्मसिद्धिः स्यात् ।।३८।।
अशुभयुतेन्दावशुभग्रहवर्गगते बुधे बलिनि।
रिपुनैधनलग्नगृहे विष्टौ योगेषु चाभिचारः स्यात् ।।३९।।
उपचयभे लग्नगते व्ययनैधनशुद्धिसंयुते लग्ने ।
उपचयगे शीतकरे मङ्गलकर्माणि [३११]कार्याणि ।।४०।।
शक्तियुते भृगुतनये चन्द्रे वासितार्कधरणिसुतैः ।
बलहीने हिमकिरणे लाभे जीवे कृषिक्रिया लग्ने ।।४१।।
भवरिपुसहजैः पापैस्त्रिकोणकेन्द्रस्थितैश्च शुभैः ।
कथितेषु च धिष्ण्येष्वपि शुभलग्ने बीजवापनं कार्यम् ।।४२।।
शय्यासनयुवतिजनशस्त्राभरणानुलेपनं निखिलम् ।
सितवासरवर्गेष्वपि कर्तव्यं शशिजीवयोर्वापि ।।४३।।
महिषखरकरभाणां दासकर्मादि सूर्यसुतलग्ने ।
शुभकार्यं शुभलग्ने त्वशुभं सर्वे(र्वं) त्वशुभलग्ने च ।।४४।।
निधनव्ययगाः सौम्याः प्रायो न शुभप्रदास्त्वितरे ।
तत्र च केन्द्रेष्वशुभो लग्ने चन्द्रः शुभान्वितो निधनः ।।४५।।

---

३०९ व२ प्रवर्तते

३१० व२ सिद्धिः

३११ व२ कर्माणि

शशिबलमादौ कल्प्यं पश्चादितरग्रहबलं कर्तुः ।
बलयुक्ते हिमकिरणे बलिनो भवन्ति निखिलखगाः ।।४६।।
हिमकिरणबलमाधारं त्वाधेयं त्वन्यखेटजं वीर्यम् ।
आधारस्थान्यखिलान्याधेयान्येव [३१२]जृम्भन्ते ।।४७।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां लग्नबलाध्यायस्त्रयोविंशः ।।२३।।

---

३१२ वर२ जृभति

२४

२.२४.० आधानम्

सोमात्मिकाः स्त्रियः सर्वाः पुरुषा भास्करात्मकाः ।
तस्माच्चन्द्रवशात्तासां तेषां सर्वं हि सूर्यतः ।।१।।
[३१३]अर्कान्मुक्तः शशी यद्वद्द्वादशांशादुदेष्यति ।
रजोदर्शनमप्यासां द्वादशांशैश्च जन्मतः ।।२।।[३१४]
अत ऊर्ध्वं प्रतिमासं भवति रजो भौमयोगतस्तासाम् ।
अनुपचयस्थे चन्द्रे धरणिसुतवीक्षणाद्वापि ।।३।।
प्रथमरजोदर्शनतः शुभाशुभं भवति सर्ववनितानाम् ।
तस्मात्प्रतिधिष्ण्यफलं वक्ष्ये दस्रादितः क्रमशः ।।४।।
बहुसुतधनसंपच्छीलसौभाग्ययुक्ता
[३१५]विगतनिखिलदोषा दस्रभे पुष्पिणी वा ।
सुरगुरुपतिभक्ता मानिनी गीतनृत्या[३१६]
प्रवरकुसुमवस्त्रैर्भूषणैर्भूषिता स्यात् ।।५।।
परपरुषपरा स्याद्दुर्भगा याम्यधिष्ण्ये
विविधचपलभाषा भूषणासृक्स्रवार्ता।
नियतमनतवाक्यत्रस्तविद्वेषिणी सा
कुलजनगुणहीना छन्नपापा खला स्यात् ।।६।।
वैश्वानरर्क्षे बहुमित्रपुत्र-
धनान्विता सत्यपरा गुणाढ्या ।

---

३१३ व२ अनकान्मुक्त
३१४ व१ पूर्णश्लोकस्य लोपः
३१५ व२ विदित
३१६ वे.नृत्य-

विकीर्णकामा प्रियवादिनी च
नारी सहोत्थप्रवरा कलाज्ञा ।।७।।
पितामहर्क्षे सुगुणा सुवृत्ता
पतिप्रिया सत्यवती धनाढ्या।
बन्धुप्रिया मानरता सुरूपा
प्रहृष्टचित्ता प्रविकीर्णकामा ।।८।।
सदा मृगे भाग्यवती सुवृत्ता
कलानुरक्ता विपुलार्थयुक्ता ।
पतिप्रिया मानवती बहुज्ञा
प्रजावती बन्धुजनैः सुमान्या[३१७] ।।९।।
महेशभे पुष्पवती विशाला
[३१८]मृषानुरक्ता परकार्यसक्ता ।
पत्युज्झिता प्रेष्यवती विनिःस्वा
परप्रिया दुःखवती विपुत्रा ।।१०।।
मायाविनी कार्पटिका विशाला-
दित्याख्यधिष्ण्ये कुचरित्रयुक्ता ।
वन्ध्या पुनर्भूः परसद्मसक्ता
दुश्चेष्टिता पुष्पवती कलाढ्या ।।११।।
सुगन्धपुष्पाम्बरभूषणेषु
सदा कलागीतनिबद्धचित्ता ।
पुष्ये त्वगम्यागमना गतार्ता
प्रजावती दुष्प्रतिभान्विता सा ।।१२।।
खला पुनर्भूर्बहुदोषसक्ता
भौजङ्गभे पुष्पवती विशीला ।
मायापटुर्लम्पटिकार्थहीना

---

३१७ वर२ सुमाज्ञा
३१८ वे.पा.मूर्खानुरक्ता

स्वच्छन्दगा व्याधिकटी कलाज्ञा ।।१३।।
पतिप्रिया पुष्पवती मघायां
प्रजावती सा कुलटा तथापि ।
[३१९]सिंहीव योषिद्वरवृन्दमध्ये
प्रभाति खद्योतवदम्बरेऽपि ।।१४।।
भाग्ये भाग्यवती बहुव्ययपरा पानप्रसक्ता वृता
सत्स्वीर्ष्या कुलटा कलासु निपुणा नीरुक्च भग्नव्रता ।
दुष्पुत्रा कुलपांसिनी खलरता भग्नोद्यमा पांशुला
दुःखा पापरता विधर्मनिरता षण्ढप्रिया सन्ततम् ।।१५।।
कुलद्वयानन्दकरी विभक्त-
कार्या कलाढ्या विनिगृह्यचित्ता ।
विकीर्णकामा रुचिरा सुवृत्ता
श्लक्ष्णार्यमर्क्षे विगतारिवैरा ।।१६।।
सम्भोगशीला परकार्यकारिणी
बन्ध्वर्चिता श्रेष्ठगुणानुरक्ता ।
गताभ्यसूया विगतारिवर्गा
हस्तेऽङ्गना पुष्पवती विलोला ।।१७।।
त्वाष्ट्रे प्रियालुः सुरतप्रियोद्य-
द्वैरा निगृह्यात्महिते नियुक्ता ।
निवृत्तवैरामयपीडिताङ्गी
सङ्गीतविद्यानिपुणा कलासु ।।१८।।
दृढव्रता सत्यपरा सुवृत्ता
निवृत्तरागा पररन्ध्रगोप्त्री ।
गजाभिगामिन्यनिलाह्वयर्क्षे
प्रमोदिनी मङ्गलकार्यवृन्दे ।।१९।।

---

३१९ व१ श्लो.लोपः सिंहीव -शब्दतः श्लो.२७ पर्यन्तं पूर्णश्लोकलोपः

द्विदैवभे पुष्पवती प्रवृत्ता
विचित्तमोघामप(पर)वैरिसंघा ।
विवादशीला विपुलप्रतापा
सम्भोगमाप्नोति [320]शुनीव शश्वत् ॥२०॥
मैत्रे विमित्रा सगदाङ्गहीना
विवादशीला विगुणा सवैरा ।
प्रवृत्तरागा प्रविकीर्णकामा
स्वगर्भसंस्रावपरा विरक्ता ॥२१॥
पौरन्दरे पुष्पवती विमर्षा
विनिन्दितातिव्यसनी सुगूढा ।
परंतपा प्रव्रजिते रतात्मा
परप्रजासूयवती सपापा ॥२२॥
मूले प्रकामाधिकसत्त्वहीना
व्यसुर्बुभुक्षोद्धतदोषचित्ता ।
निरन्तरं दूषितकर्मवृत्ता
प्रजावती गोगजगामिनी च ॥२३॥
पानीयभे पुष्पवती विवाद-
शीला कलाकर्मणि दुष्टचित्ता ।
परानुरक्ता वनशैलसक्ता
प्रच्छन्नपापाद्भुतकर्मरक्ता ॥२४॥
वैश्वे सती पुष्पवती सुवृत्ता
महागुणैरुन्नतिमातनोति ।
चित्तानुरक्ता स्वपतेरुदारा
युक्ता विवैरा विनिवृत्तदोषा ॥२५॥
[321]बहुसुतधनधान्यप्रोल्लसद्भूषणाढ्या

३२० व२ सुनी च संख्या
३२१ व२ बहुतधनधान्यं

प्रचुरगुणगणाद्यैर्भर्तुरानन्ददा स्यात् ।
युवतिजनमता सा विष्णुधिष्ण्ये विचित्रा
प्रवरनटनगीतातोद्यवाद्ये ह्यभिज्ञा ।।२६।।
अतिवसुधनभाक्स्यान्मानिनी सच्चरित्रा
विगतभयकुवृत्ता सन्नताङ्गी गुणाढ्या ।
पतिहितनिरता स्याद्बन्धुवर्गैः प्रपूज्या
प्रियहितकरकर्मण्युत्सुका[322] प्रोष्ठपद्याम् ।।२७।।
निखिलवरकलाढ्या नृत्यगीतानुरक्ता
विविधगुणगणाढ्या मानिनी भाग्ययुक्ता ।
विविधपरिवरौघैः संवियुक्ता शतर्क्षे [323]
पतिकुलजनमान्या पुष्पवत्यङ्गना सा ।।२८।।
शुभगुणगणहीना कर्कशा भाग्यहीना
त्वनृतपरुषमन्त्रैर्दुर्जनान्तर्जयन्ती।
विचरति गुणमध्ये दुर्भगा वाजपादे
जनकसदनवासा नष्टकामाद्यरूपा ।।२९।।
गुणसुतसुखसंपद्भूषिताङ्गी त्वभिज्ञा
अभिभवति सपत्नान्सज्जनान्मानयन्ती ।
मृदुमधुरसुवाचा गीतनृत्योद्यता सा
प्रवरबहुकलाज्ञा चोत्तराभाद्रपादे ।।३०।।
पौष्णे विशीला बहुदुःखशोका
विवादशीला पितृवेश्मसंस्था ।
पराभितप्ता पतिपुत्रदूरा
नीचै रता कापटिका च कन्या ।।३१।।
रिक्तासु पर्वस्वथ कार्त्तिकेय-
हर्योः क्षयाहे व्यतिपातविष्ट्याम् ।

---

३२२ व२ करकर्मवासरे वासवे च

३२३ तृतीयचतुर्थपादयोः पूर्णलोपः

एकार्गले परिघवैधृतेषु
चोत्पातसन्ध्यासु रजोऽप्यनिष्टम् ।।३२।।
सदा गदार्त्ता सुपतिव्रता सा
वन्ध्या प्रजावत्यतुलार्थयुक्ता ।
आनन्दकर्त्री त्वसती च पुष्प-
वती क्रमाद्भास्करवासरेषु ।।३३।।
आरोग्यसौभाग्यवती च सौम्य-
वर्गेषु सा पुष्पवती च कन्या ।
दु:खा तथानर्थविवादशीला
वर्गेषु सौम्येषु च दुर्मति: स्यात् ।।३४।।
नक्षत्रवारतिथियोगदिनार्धकाल-
षड्वर्गसंकथितमिष्टमनिष्टमेतत् ।
ज्ञात्वाल्पदोषमथ भूरि गुणं च पश्चा-
द्वृद्धान् गुणोत्तमपरं शुभकर्म कार्यम् ।।३५।।
प्रभूतदोषं यदि दृश्यते त-
त्पुष्पं तदा शान्तिककर्म कार्यम् ।
विवर्जयेदेव तदेकशय्यां
यावद्रजोदर्शनमिष्टमग्रे[३२४] ।।३६।।
चाण्डाली पतितासमाथ रजकी शूद्रा दिनादिक्रमा-
च्छुद्धा पुष्पवती च पञ्चमदिने हव्येषु कव्येषु च ।
चेद्दुष्टेऽह्नि नवोदकुम्भसलिलै: सन्मन्त्रितैरौषधै:
स्नानं पापनुदं सपञ्चकलशै: [३२५] कार्यं समृद्धिर्जलै: ।।३७।।
ऐशान्यतो गोमयमण्डले च
परिस्तृतेऽग्नौ जुहुयाच्च दुर्गाम् ।
युग्मां घृताक्तां च समित्प्रमाणां

---

३२४ व२ दर्शमिष्टलग्ने
३२५ व२ कार्यं समृद्धैर्जनै:

गायत्रीसंज्ञाष्टसहस्रसंख्याम् ।।३८।।
शतप्रमाणामथवा सहस्त्रीं[३२६]
शुभैर्यवैर्व्याहृतिभिस्तिलैश्च ।
तातः सुरान्भूमिसुरान्पितृंश्च
सन्तर्पयेदन्नसुवर्णवस्त्रैः ।।३९।।
पौष्णद्वये पैतृभयाम्यसार्थ-
विष्णुद्वये नैधनजन्मभेषु ।
उत्पातपात[३२७] ग्रहदूषितेषु
न कार्यमाधानमनिष्टलग्ने ।।४०।।
उपप्लवे वैधृतिपातयोश्च
विष्ट्यां दिवा पारिघपूर्वभागे ।
सन्ध्यासु पर्वस्वपि मातृपित्रो-
र्मृतेऽह्नि पत्नीगमनं विवर्ज्यम् ।।४१।।
दिनेषु युग्मेषु च वक्ष्यमाण-
योगैः सुतार्थी स्वसतीमुपेयात् ।
दिनेष्वयुग्मेषु च कन्यकार्थी
हित्वा च गण्डांस्तिथिलग्नभानाम् ।।४२।।
आधानलग्ने विषमांशराशौ
जीवेन्दुजाभ्यां युतवीक्षिते वा ।
नान्यैः सुपुत्रस्त्वथ पापखेटैः
पापी च मिश्रैर्बलिभिर्विमिश्रः ।।४३।।
युग्मांशलग्ने बलयुक्तशुक्र-
निशाकराभ्यां युतवीक्षिते वा ।
नान्यैः सुकन्या त्वथ पापरूपा

---

३२६ वे.वाद्यहन्त्री
३२७ वे.पा.पाप-

पापैस्त्वशेषं तु विचिन्त्य वाच्यम् ।।४४।।
ओजर्क्षांशे लग्नगे[३२८] वीर्ययुक्ते
जीवेन्द्वर्कैरोजराश्यंशकस्थैः ।
पुंजन्म स्याद्व्यत्यये कन्यका
स्यान्मिश्रैः षण्ढो द्व्यङ्गगैर्द्वित्रिजन्म ।।४५।।
ओजांशकर्क्षाद्विषमर्क्षसंस्थः
पुंजन्मकारी रविसूनुरेकः ।
विचार्य वीर्यं पुरुषग्रहाणां
वाच्योऽथ पुत्रस्त्वथ पुत्रिका वा ।।४६।।
चन्द्रार्कपुत्रक्षितिजैः स्ववर्गे-
र्बृहस्पतौ धर्मविलग्नपुत्रगे ।
योगेष्वपत्यं भवतीह निश्चया-
दमी च योगा विफला विबीजिनाम् ।।४७।।
न च दशमनिशाविवर्जनं प्रकुर्या-
दृतुसमये पुरुषः स्त्रियः कदाचित् ।
ऋतुरपि दशषड्वासराणि
प्रथमनिशात्रितयं न तत्र गम्यम् ।।४८।।[३२९]

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायामाधनाध्यायश्चतुर्विंशः ।।२४।।

---

३२८ व२ वीर्यतल्लग्नयुक्ते
३२९ व१ पूर्णश्लोकस्य लोपः
१३ व२ नरवदनवीक्षितानि कुर्यादृतुसमये पुरुषस्त्रियः कदाचित् ।
ज्ञातुः परि दशषड्वासराणि प्रथमा निशा वीतयन न तत्र गच्छेत्।।४८।।
ओसनमंदमटाव मे छे
इति वृद्धवसिष्ठब्रह्मर्षिविरचितायां महासंहितायामाधानं समाप्तं लीपीकृतं सं १८९७ रा
भाद्रपक्षप्रथम तिथौ अष्टमी जोधपुरमध्ये पत्रसुहेवानदचरारेहानरादे पुस्तक संपूर्ण छे

२५

२.२५.० पुंसवनसीमन्तौ

कुर्यात्पुंसवनं प्रसिद्धविषये गर्भे तृतीयेऽथवा
मासि स्फीततनौ तुषारकिरणे पुष्येऽथ वा वैष्णवे ।
हित्वा कर्कटकं नृयुग्ममबलामन्येऽप्यरिक्ते तिथौ
शुद्धे नैधनधाम्नि शुक्रशशभृद्विन्मन्त्रिणां वासरे ।।१।।
[330]पुंनाम्नि श्रवणं तिष्य: स्वाती हस्त: पुनर्वसु: ।
मूलं प्रोष्ठपदं चानुराधा मृगशिरोऽश्विनी ।।२।।
चन्द्रे लग्नेऽतिसंपत्स्याच्छुभवीक्षितसंयुते ।
सीमन्तस्यापि संपत्स्यादिष्ट: पुंसवनस्य य: ।।३।।
कृतसवनसतीनामाद्यगर्भे प्रसक्ते
विहितमथ चतुर्थे मासि षष्ठाष्टमे वा ।
उडुनि शशिनि वीर्ये मासपे वीर्ययुक्ते
बहुगुणयुतघस्रेऽप्येव सीमन्तकर्म ।।४।।
मासे मासे मासपादिग्रहाणां
शान्तिं कुर्याच्छान्तिवाक्यैर्जपैश्च ।
होमैर्दानै: सज्जनानां च वाक्यै-
र्गर्भं सम्यग्रक्षयेत्पुत्रकामी ।।५।।
ऋक्षेषु साधारणदारुणोग्र-
वर्ज्येषु सूर्येज्यमहीसुतानाम् ।
वारेष्वरिक्ताक्षयपञ्चपर्व-
दिनेषु पुंलग्ननवांशकेषु ।।६।।
न नैधने नैधनशुद्धलग्ने

---

३३० व१ पुत्रामित्रं

शुभग्रहैर्युक्तनिरीक्षिते वा ।
इष्टैः सदा पञ्चभिरर्कचन्द्र-
सुरेज्यपूर्वैरथवा चतुर्भिः ।।७।।
केन्द्रत्रिकोणत्रिधनायसौम्यै-
र्दुश्चिक्यलाभारिगतैश्च पापैः ।
षड्लग्नान्त्यविवर्जितेन्दौ
सीमन्तकार्यं शुभं सदैव ।।८।।
व्ययेऽष्टमे वा सुतभे विलग्ने
चैकोऽपि पापोऽथ नभश्चराणाम् ।
सीमन्तिनीनाशकरस्त्ववश्यं
करोति गर्भस्य च वा विनाशम् ।।९।।
सितावनेयामरपूज्यसूर्य-
चन्द्रार्किसूर्योदयपेन्दुसूर्याः ।
मासाधिपाः स्युः क्रमशो दशैते
निपीडितो नाशयति स्वमासि ।।१०।।[३३१]
रोहिण्यां वा वैष्णवे पूर्वपक्षे
द्वादश्यां वा सप्तमे वा तिथौ वा ।
मध्याह्ने वा पूर्वभागेऽनुकूले
विष्णोः पूजां कारयेद्गर्भपुष्ट्यै।।११।।
पीताम्बरं कृष्णवर्णं शङ्खचक्रगदाम्बुजम् ।
वैकुण्ठवासिनं विष्णुं मृत्कुम्भे विन्यसेत्ततः ।।१२।।
विष्णोः स्वरूपं कनकेन कृत्वा
तल्लिङ्गमन्त्रैरथ गन्धपुष्पैः ।
वस्त्राक्षतैर्गुग्गुलगन्धदीपै-
र्नैवेद्यताम्बूलफलैश्च सम्यक् ।।१३।।

---

३३१ व१ श्लो.१०तः १७पर्यन्तं लोपः

विष्णुं च देवतां पूज्य गर्भिणां रक्षणाय च ।
ब्राह्मणेभ्यः प्रदातव्या प्रतिमा वस्त्रसंयुता ॥१४॥
चैत्रादिमासनामानि वैकुण्ठोऽश जनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्त्रिविक्रमः ॥१५॥
योगीशः पुण्डरीकाक्षः कृष्णोऽनन्तोऽच्युतस्तथा ।
चक्रधारीति चैतानि क्रमादाहुर्मनीषिणः ॥१६॥
तद्व्यक्षरं वा चतुरक्षरं वा
विवर्जयेच्चान्त्यलकाररेफम् ।
तन्मासनामादिकमेव चिन्त्यं
स्फुटं वदेद्दक्षिणकर्णरन्ध्रे ॥१७॥

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां पुंसवनसीमन्ताध्यायः पञ्चविंशः ॥२५॥

२६

२.२६.० जातकर्मनामकर्मणी

यस्मिम्मुहूर्ते जनितः कुमार-
स्तस्मिन्विधेयं खलु जातकर्म ।
विनिर्गते वाप्यथ सूतकेऽपि
तस्मिन्दिने तस्य च नामधेयम् ।।१।।
सन्तर्प्य देवान्सपितॄन्द्विजांश्च
सुवर्णगोभूतिलधान्यवस्त्रैः ।
गुडाज्यरौप्यैर्लवणैश्च होमै-
रक्षोघ्नमन्त्रैः सह जातकर्म ।।२।।
[332]अतीतकार्याण्यखिलानि तानि
कार्याणि सौम्यायनगे दिनेशे ।
सिते गुरौ वाप्यथ दृश्यमाने
तदुक्तपञ्चाङ्गदिनेऽप्यखण्डम् ।।३।।
मैत्रध्रुवक्षिप्रचरेषु भेषु
चारिक्तपर्वाख्यदिनेषु कार्यम् ।
शुभग्रहाणां दिनलग्नवर्गे
तज्जातकर्म त्वथ नामधेयम् ।।४।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां जातकर्मनामकर्माध्यायः ।।२६।।

---

३३२ व२ अजात

२७

२.२७.० अन्नप्राशनम्

युग्मेषु मासेषु च षष्ठमासा-
त्संवत्सरे वा नियतं शिशूनाम् ।
अयुग्ममासेषु च कन्यकानां
नवान्नसंप्राशनमिष्टमेतत् ।।१।।
मृदुध्रुवक्षिप्रचरेषु भेषु
वारेषु शुक्रज्ञसुरार्चितानाम्।[333]
धर्मार्कगौरीन्द्रहिधातृकाम-
दिनेषु तारेन्दुबलान्वितेषु ।।२।।
शुभग्रहाणां भवने विलग्ने
नवांशके पूर्वदले दिनस्य ।
पूर्णेन्दुवारेऽप्यथ वा विलग्ने
नवांशके वाप्यथ वा नु तस्य ।।३।।
न नैधने कर्मविशुद्धियुक्ते
दोषैर्विहीनैः शुभदृष्टियुक्ते ।
नोत्पातपापग्रहदूषितर्क्षे
वैनाशिकाद्यर्क्षविवर्जितेषु[334] ।।४।।
[335]चौलान्नभुक्तौ व्रतबन्धने च
राजाभिषेके खलु जन्मधिष्ण्यम् ।
शुभं त्वनिष्टं सततं विवाह-
सीमन्तयात्रादिषु मङ्गलेषु ।।५।।

---

३३३ व३, वे. चौ. सुरार्चिताभ्यां
३३४ व२ च
३३५ व१,व२ बालान्न

शुभाशुभेषु त्रिधनायकेन्द्र-
त्रिकोणगेष्वायरिपुत्रिगेषु ।
अषष्ठरिष्फाष्टगते हिमांशौ
बालान्नभुक्तिः शुभदा च तेषाम् ।।६।।
कुष्ठी लग्नगते सूर्ये क्षीणे चन्द्रे च भिक्षुकः।
सत्रदः पूर्णचन्द्रे च कुजे पित्तरुजार्दितः ।।७।।
बुधे ज्ञानी गुरौ भोगी दीर्घायुर्भोगवान् सिते ।
वातरोगी शनौ राहौ केतौ चान्नविवर्जितः ।।८।।
सम्पूर्णेन्दूभयाष्टम्योर्मध्येन्दुः पूर्णसंज्ञकः ।
विनष्टेन्दुभयाष्टम्योर्मध्येऽसौ क्षीणसंज्ञकः ।।९।।
षष्ठाष्टमान्त्यगश्चन्द्रो भोक्तुश्च निधनप्रदः ।
केन्द्रत्रिकोणगो मन्दस्तस्यान्नमपहारकः ।।१०।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायामन्नप्राशनाध्यायः सप्तविंशः।।२७।।

२८

२.२८.० चौलम्

तृतीये पञ्चमेऽब्दे वा स्वकुलाचारतो हितम् ।
चौलं शिशूनां यत्नेन स्वगृह्योक्तविधानतः ।।१।।
आधानतो जन्मतो वा सप्तमेऽब्देऽपि कारयेत् ।
कृत्वाभ्युदयिकं कर्म पश्चात्सर्वं समाचरेत् ।।२।।
सौम्यायने गुरौ शुक्रे दृश्यमाने शुभे दिने ।
चन्द्रताराबलोपेते शुभलग्ने शुभांशके ।।३।।
गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म च ।
पञ्चमासादधः कुर्यात्तदूर्ध्वं न च कारयेत् ।।४।।
गृहनिर्माणमुदधिस्नानं चौलं सुतस्य च ।[३३६]
तीर्थयात्रा न स्वश्मश्रु न कुर्याद्गर्भिणीपतिः ।।५।।
पुत्रचूडाकृतौ माता गर्भिणी यदि वा भवेत् ।
विपद्यते गुरुश्चैव दम्पती शिशुरब्दतः ।।६।।
गर्भिण्यां मातरि शिशोश्चौलकर्म न कारयेत् ।
[३३७]शताभिषेकेऽप्येवं स्यात्काले वेद[३३८]कृतेष्वपि ।।७।।
सर्वेषामेव वर्णानां चूडाकर्मविधिः स्मृतः ।
केशमूलं पिता ज्ञेयः केशाग्रं जननी तथा ।।८।।
[३३९]चौलेनैवायुषो वृद्धिश्चौलेनैवायुषः क्षयः ।
तस्माच्चौलं प्रयत्नेन कारयेद्बुद्धिसत्तमः ।।९।।

---

३३६ व१ –भिन्नतया पठितम्–
सिन्धुस्नानं तथा चौलं सूनोः प्रेतस्य वाहनम्।
३३७ व१ राजा
३३८ व१ श्रुतेषु
३३९ व१ केशेन

पञ्चमी सप्तमी चैव दशम्यैकादशी तथा ।
त्रयोदशी तृतीया च चौलकर्मणि[340] शोभना ।।१०।।[341]
विधातृद्वितये सार्पात्त्रितये च चतुष्टये ।
धर्मादर्शदिने चौलं श्रेष्ठं कृष्णाद्यवासरे ।
अदितिद्वितये पौष्णद्वितये श्रवणत्रये ।
हस्ताच्च त्रितये शाक्रे सैन्दवे चौलमीरितम् ।।११।।
चन्द्रशुक्रगुरुज्ञानां वारलग्नांशका: शुभा: ।
एवं सम्यग्विचार्याथ चौलकार्यं च कारयेत् ।।१२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां चौलाध्यायोऽष्टाविंशः ।।२८।।

---

३४० वर२ चौलकर्मशुभावहा
३४१ व१ पूर्णश्लोकलोप:

२९

२.२९.० उपनयनम्

श्रुतिस्मृतीनां पदमुत्तमं द्विज-
 स्तदुत्तमत्वं व्रतबन्धलग्नतः ।।
तस्माद् द्विजानां तदवाप्तिकारणं
 तल्लग्नशुद्धिं कथयामि शास्त्रतः ।।१।।
मौञ्जीबन्धः शस्यते ब्राह्मणानां
 गर्भाधानाज्जन्मतो वाष्टमेऽब्दे ।
भूमीशानामेवमेकादशाब्दे
 वैश्यानां च द्वादशे वेदविद्भिः ।।२।।
विप्राणामुपनयनं वसन्तसमये धराधिनाथानाम् ।
ग्रीष्मर्तौ शरदि विशां मासाः साधारणाः पञ्च माघाद्याः ।।३।।
ऋग्यजुःसामशाखेशा गुरुशुक्रधरात्मजाः ।
अथर्वणस्य वेदस्य शाखेशश्चन्द्रनन्दनः ।।४।।
शाखेशगुरुशुक्राणां प्रौढ्ये बाल्ये च वार्धके ।
नैवोपनयनं कार्यं वर्णेशे दुर्बलेऽपि च ।।५।।
शाखेश्वरस्ववर्णेशगुरूणां बलपूर्वकम् ।
ततोऽप्येषां गुरुबलं मुख्यमाचार्यशिष्ययोः ।।६।।
उक्तेऽपि वर्षे न गुरुर्बली चे-
 च्छान्त्या प्रशस्तं व्रतबन्धकर्म ।
अनुक्तवर्षेऽपि बलप्रदोऽपि
 न वै तयोरब्दबलो बलीयान् ।।७।।
शाखेशगुरुशुक्राणामेकस्मिञ्छत्रुनिर्जिते ।
विद्याव्रतार्थिभिस्तत्र न कार्यं चोपनायनम् ।।८।।
शाखेशे वा गुरौ शुक्रे स्वनीचगृहसंस्थिते ।
तदोपनीतः स शिशुर्विद्यावृत्तिविवर्जितः ।।९।।

नीचांशसंस्थिते शुक्रे शाखेशे वा बृहस्पतौ ।
स्वकुलाचारविच्छ्रेष्ठो नीचकर्मरतो व्रती ।।१०।।
नीचर्क्षनीचांशकसंस्थितेऽपि
शाखेश्वरे वास्फुजितीन्द्रपूज्ये ।
व्रती शिशुर्हीनकुलप्रसक्तः
शस्त्रोपजीवी स्वकुलं विसृज्य ।।११।।
स्वारिनीचगते जीवे शाखेशे वा भृगोः सुते ।
उपनीतस्तदा बालः क्षिप्रादन्त्यजसेवकः ।।१२।।
शाखेशगुरुशुक्राणामेकस्मिञ्छत्रुराशिगे ।
परदारासु निरतश्चोपनीतस्तदा शिशुः ।।१३।।[३४२]
शाखेशगुरुशुक्राणां मध्ये शुक्रनवांशगे ।
एकस्मिन्नुपनीतो यस्तदा मूर्खः खलो भवेत् ।।१४।।
शत्रुराशौ तदंशस्थे चैकस्मिन्खचरे व्रती ।
शाखेशगुरुशुक्राणां महापातककृद्भवेत् ।।१५।।
स्वनीचस्वारिषड्वर्गसंस्थे जीवेऽथ वा सिते ।
शाखेशे वा तदा बालो महापातककृद्व्रती।।१६।।
अधिशत्रुगृहस्थे वा तदंशस्थे गुरौ भृगौ ।
शाखेशे वा व्रती बालस्तदा चाण्डालसेवकः ।।१७।।
शत्रुनीचाधिशत्र्वृक्षे स्वांशे वा स्वोच्चभागगे ।
शाखेशे वा गुरौ शुक्रे न नीचफलमश्नुते ।।१८।।
स्वमित्रराशिसंस्थे वा स्वमित्रांशे च संस्थिते।
गुरौ भृगौ वा शाखेशे व्रती विद्यायुतस्तदा ।।१९।।
स्वमित्रगेहे मित्रांशे संस्थे भार्गवनन्दने ।
गुरौ शाखाधिपे वापि[३४३] विद्यायुक्तो भवेद् व्रती ।।२०।।
स्वाधिमित्रगृहस्थे वा स्वाधिमित्रांशगेऽपि वा ।

---

३४२ व२ पूर्णश्लोकलोपः
३४३ व१ वित्तविद्यायुक्तो व्रती भवेत्

गुरौ शाखाधिपे [३४४]वापि वित्तविद्याधिको व्रती ।।२१।।
स्वाधिमित्रगृहे स्वाधिमित्रांशकगते व्रती ।
गुरौ भृगौ वा शाखेशे तत्र विद्याविशारदः ।।२२।।
तुङ्गस्थे वा तदंशस्थे गुरौ शाखाधिपे सति ।
उपनीतस्तदा बालो विद्यावान्धनवान्भवेत् ।।२३।।[३४५]
स्वतुङ्गतुङ्गांशगते शाखेशे वा गुरौ सिते ।[३४६]
व्रती शिशुर्धनायुष्यव्रतविद्याविशारदः ।।२४।।
सूर्यांशकगते चन्द्रे महापातककृद्व्रती ।
पण्योपजीवी स्वांशस्थे नीचो निःस्वः [३४७]खलो भवेत् ।।२५।।
श्रवणादितिकर्कांशसंस्थिते यदि शीतगौ ।
विद्यावान्धनवाञ्छ्रीमान्व्रतवान्भोगवान्व्रती ।।२६।।
कुजांशकगते चन्द्रे शस्त्रजीवी खलो व्रती ।
बुधांशकगते चन्द्रे वेदवादी भवेद्बटुः ।।२७।।
जीवांशकगते यज्वा साङ्गवेदविशारदः ।
शुक्रांशगे धनी दाता विद्यावित्तविशारदः ।।२८।।
क्षिप्रोद्वाही यज्ञकृत्स्यात्सत्रदो भोगवान्भवेत् ।
सौरांशकगते चन्द्रे सदा चाण्डालसेवकः ।।२९।।
पापांशकगते चन्द्रे स्वाधिनीचस्थितेऽपि च ।
अनध्यायोपनीतश्च पुनः संस्कारमर्हति ।।३०।।
नैमित्तिकमनध्यायं कृष्णे च प्रतिपद्दिने ।
मेखलाबन्धनं शस्तं[३४८] चौले वेदव्रतेष्वपि ।।३१।।
प्रशस्ता प्रतिपत्कृष्णा न पूर्वापरसंयुता ।

---

३४४ व१ शुक्रे
३४५ व१ श्लोकप्रथमपादलोपः
३४६ व१ श्लोकप्रथमपादलोपः
३४७ व१ स्थलस्तदा
३४८ वे.चौ. शस्त

चातुर्मास्यद्वितीयायां तृतीया चाक्षये तिथी ।।३२।।
उपनीतो यतः श्रीमान्विद्यावान्धनवान्भवेत् ।
[349]व्रते हि पूर्वसंध्यायां वारिदो यदि गर्जति ।
तद्दिनं स्यादनध्यायं व्रतबन्धे विवर्जयेत् ।।३३।।
कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् ।
त्रयोदशी चतुष्कं च अष्टावेते गलग्रहाः ।।३४।।
विधातृ(२)गौरी(३)फणि(५)षण्मुखा(६)द्रि(१०)-
यमाः सकामास्तिथयः प्रशस्ताः।
मध्येऽर्क(११)रुद्रे(१२)ऽपि च ते प्रशस्ते
सुहृत्स्वतुङ्गर्क्षगते शशाङ्के ।।३५।।
त्यक्त्वा चतुर्थीमपि कृष्णपक्षे
त्वाद्यं त्रिभागं शुभदं व्रते च ।
शस्ता सितेज्येन्दुजवासरास्ते
रवीन्दुवारौ खलु मध्यमौ तौ ।।३६।।
हस्तत्रये च श्रवणत्रये च
धातृद्वये त्र्युत्तरमैत्रभेषु ।
पौष्णद्वये चादितिभद्वये च
शस्तं द्विजानां खलु मौञ्जिकर्म ।।३७।।
दिवसस्य त्रिभागे[350] तु पूर्वाह्णे कर्म दैविकम् ।
द्वितीये मानुषं कर्म तृतीये पैतृकं च तत् ।।३८।।
या चैत्रवैशाखसिततृतीया
माघस्य सप्तम्यपि फाल्गुनस्य ।
कृष्णद्वितीयोपनये प्रशस्ताः
प्रोक्ता **भरद्वाज**मुनीन्द्रमुख्यैः ।।३९।।
लग्नादिसौम्यग्रहराशयो ये

---

३४९ व२ जाते
३५० व२ -गे यः तस्मिन्मध्ये तु दैविकं

ग्रहा न पापग्रहराशयो ये ।
ग्राह्याश्च तेऽपि प्रबलैश्च सौम्यै-
रधिष्ठिताश्चापि निरीक्षिता वा ।।४०।।
शेषैः[३५१] सुदुष्टः सततं हि काल-
स्तेभ्योऽपि मार्ष्टुं गुरुरप्यशक्तः ।
दोषैर्न चाद्याः सगुणैर्गुणाढ्या-
स्तस्मात्स कालः शुभदः शुभेषु ।।४१।।
एवं तत्समयं वीक्ष्य शोभनं च समाचरेत् ।
मङ्गले दिवसे तस्मिंश्चन्द्रताराबलान्विते ।।४२।।
कुलीरकांशं परिहृत्य सौम्य-
नवांशका मौञ्जिविधौ प्रशस्ताः ।
ते निन्दिताः क्रूरनभश्चराद्या-
श्चेदष्टमांशा अपि मानवस्य ।।४३।।
न नैधनं नैधनशुद्धलग्नं
न नैधनर्क्षं न च तन्नवांशम् ।
न नैधनेशं न तदंशकेशं
लग्ने प्रशस्तं न च रात्रिनाथः ।।४४।।
प्रालेयरश्मौ यदि लग्नसंस्थे
वलक्षपक्षेऽपि भवेत्स रोगी ।
व्रती च सौम्यग्रहवर्गगेऽपि
खलोऽतिनिःस्वः श्रुतिकर्महीनः ।।४५।।
इष्टाः पञ्च ग्रहा यस्य राशेस्तद्गृहसंज्ञके ।
[३५२]रविचन्द्रेज्यमुख्यास्ते चत्वारो वा बलान्विताः ।।४६।।
नीचस्थिताः शत्रुगृहस्थिताश्च
पराजिताश्चास्तमिता ग्रहेन्द्राः ।

३५१ व१ दोषैकदुष्टः
३५२ व१ चन्द्रार्य

लग्ने ग्रहास्ते स्वफलं प्रदातुं
क्षमा न किंचिद्रिपुदृष्टदेहाः ।।४७।।
सूर्यभौमशनिराहुकेतवः
क्रूरसंज्ञखचराः क्षयेन्दुना ।
पूर्णचन्द्रगुरुशुक्रसोमजाः
सर्वकर्मसु हि सौम्यखेचराः ।।४८।।
रवौ लग्नादिकेन्द्रस्थे दोषाः स्फूर्जितसंज्ञकाः ।[३५३]
तत्रोपनीतस्य शिशोः कलनाशो भवेत्तदा ।।४९।।
कुजे लग्नादिकेन्द्रस्थे दोषाः स्फूर्जितसंज्ञकाः ।
तत्रोपनीतं कौमारं हन्ति वर्षान्न संशयः ।।५०।।
शनौ लग्नादिकेन्द्रस्थे दोषो रुधिरसंज्ञकः ।
करोति महतीं पीडां व्रतिनो वा गुरोश्च वा ।।५१।।
राहौ लग्नादिकेन्द्रस्थे दोषो रन्ध्राह्वयो भवेत् ।
व्रतिनो जननीं हन्ति चार्थं वा न च संशयः ।।५२।।
केतौ लग्नादिकेन्द्रस्थे दोषश्च उग्रसंज्ञकः ।
समग्रं व्रतिनो वित्तव्रतविद्याविनाशनम् ।।५३।।
लग्नषष्ठाष्टमान्त्यस्थः करोति च निशाकरः ।
व्रतिनो रोगमधनं निर्धनं दुःखसञ्चयम् ।।५४।।
बुधो लग्नगतो जीवः शुक्रो वाप्यथ शाखपः ।
करोति व्रतिनं नूनं [३५४]व्रतविद्याविशारदम् ।।५५।।
द्वितीयस्था ग्रहाः सौम्याः सौख्यारोग्यबलप्रदाः ।
तृतीयस्थाः शुभाः पापा व्रतविद्याधनप्रदाः।
चतुर्थस्थानगाः सौम्याः संपद्भोगधनप्रदाः ।।५७।।
पञ्चमस्थानगाः सौम्या नृपपूजार्थसिद्धिदाः ।
तत्र पापग्रहाः सर्वे सदा सत्फलनाशदाः ।।५८।।

---

३५३ वे. पा.कूजित
३५४ व१ वृत्तविशारदं

षष्ठस्था: खचरा: सौम्या दु:खशोकभयप्रदा: ।
तत्रस्था: क्रूरखचरा: सदा तत्फलनाशदा: ।।५९।।
लग्नात्सप्तमगा: सौम्या व्रतविद्यासुखप्रदा: ।
सर्वे ग्रहाश्चाष्टमस्था निधनाधनशोकदा: ।।६०।।
नवमे सौम्यखचरा वित्तायुष्यशुभप्रदा: ।
तत्र पापा: सौम्यखेटकृततत्फलनाशका: ।।६१।।
सौम्या: कुर्वन्ति दशमे वृत्तिविद्याधनान्वितम् ।
सर्वे ग्रहाश्च लाभस्था: कुर्वन्त्यभिमतं फलम् ।।६२।।
[355]व्ययस्थानस्थिता: सर्वे कुर्वन्ति व्ययशीलिनम् ।
खलं नीचं पापरतं बुद्धिहीनं विदेशगम् ।।६३।।
द्वादशस्थं रविं भौम: पश्यन्नाचार्यनेत्रहा ।
बलिनं बलवान्नूनमचिरात्तु न संशय: ।।६४।।
दोषोऽप्येको गुणान्हन्ति तद्विरोधी गुणे न चेत् ।
पञ्चगव्ययुतं पूर्णं कुम्भं मद्यलवो यथा ।।६५।।
लग्नं सर्वगुणोपेतं दोषेणैकेन दूषितम् ।
त्यजेत्तदङ्गुलमिव ह्युरगक्षतदूषितम् ।।६६।।
दोषोऽप्येको निहन्त्येव सकलं गुणसञ्चयम् ।
लग्नोत्थं शुभखेटोत्थमनृतं सुकृतं यथा ।।६७।।
पञ्चाङ्गलग्नलग्नांशशुभग्रहकृतान्गुणान् ।
दोषोऽप्येको गुणान्हन्ति स्वैरिणी स्वजनानिव ।।६८।।
निहन्ति सिद्धामृतयोगजाता-
न्पञ्चाङ्गजातानपि लग्नजातान् ।
शुभग्रहोत्थानखिलान्गुणौघा-
नेकोऽपि दोषो हि यथा वृकोऽजान् ।।६९।।
गुणानेकाञ्छुभखेटजाता-

---

३५५ व१ व्ययस्थानगता:

न्पञ्चाङ्गलग्नामृतयोगजातान् ।
एकोऽपि दोषः सुतरां निहन्ति
सुपुण्यराशीनिव कूटसाक्षी ।।७०।।
एकस्मिन् कूटगे दोषे नाशयत्यखिलान्गुणान् ।
शरीरस्थे क्षये रोगे यथा द्राक्सप्त धातवः ।।७१।।[३५६]

इति दोषनिरूपणम् ।

सर्वानिमानतिबलः स्फुरदंशुजालो
लग्नोपगः प्रशमयेत्सुरराजमन्त्री ।
एको बहूनि दुरितानि सुदुस्तराणि
भक्त्या प्रयुक्त इव शूलधरे प्रणामः ।।७२।।
एकोऽपि केन्द्रगः सौम्यः सकलं दोषसञ्चयम् ।
विनाशयति घर्मांशुरुदितस्तिमिरं यथा ।।७३।।
शुभग्रहः स्वोच्चसंस्थो लग्नं पश्यति चेद्यदा ।
तदा दोषा लयं प्राप्ता ग्रीष्मे कुसरितो यथा ।।७४।।
निरीक्ष्यमाणे लग्ने तु मित्रसंस्थे शुभग्रहे ।
दोषा लयं ययुः सर्वे लग्नलग्नांशसम्भवाः ।।७५।।
स्वोच्चांशगे शुभे लग्ने दृष्टे युक्ते यदा तदा ।
लग्नलग्नांशसम्भूताः सर्वदोषा लयं गताः ।।७६।।
एकोऽपि सौम्यखचरः स्वाधिमित्रगृहस्थितः ।
आलोकयति चेल्लग्नं सर्वदोषविनाशकृत् ।।७७।।
मित्राधिमित्रस्वक्षेत्रसंस्थे सति शुभग्रहे ।
वीक्ष्यमाणे यदा लग्ने तदा दोषा लयं ययुः ।।७८।।
ये पापखेटप्रभवाश्च दोषा
विलग्नलग्नांशकसम्भवा ये ।
केन्द्रे गुरुस्तान्विमलान्करोति

---

३५६ व१ पूर्णश्लोकलोपः

फलं यथाम्भः कतकद्रुमस्य ।।७९।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायामुपनयनाध्याय एकोनत्रिंशः ।।२९।।

३०

२.३०.० समावर्तनम्

अधीत्य वेदांश्च तदर्थशास्त्रा-
ण्यभ्यस्य लब्ध्वा स्वगुरोरनुज्ञाम् ।
कुर्यात्समावर्तनकर्म पश्चा-
द्गोदानतः पाणिनिपीडनात्प्राक् ।।१।।
सौम्यायने निर्मलयोः सुरेज्य-
दैत्येज्ययोर्व्योम्नि वलक्षपक्षे ।
संत्यज्य रिक्तामवमाष्टमीं च
वैनाशिकाख्याखिलऋक्षवृन्दम् ।।२।।
करादिपञ्चस्वदितिद्वयाश्वि-
विष्णुत्रये त्र्युत्तरधातृभेषु ।
सपौष्णचान्द्रेषु शुभग्रहर्क्ष-
वारेषु यत्स्नातककर्म शस्तम् ।।३।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां समावर्तनाध्यायस्त्रिंशः ।।३०।।

३१

२.३१.० विवाहप्रश्नाः

शुभे दिने दैवविदं त्वभिज्ञं
ताम्बूलपुष्पाक्षतपूर्णपाणिः ।
कर्ता च गत्वा प्रणिपत्य पृच्छे-
न्निवेद्य तस्मै वरकन्ययोश्च ।।१।।[३५७]
एकोऽपि लग्नोपगतश्च पापः
पापस्ततोऽन्यः खलु सप्तमस्थः।
आसप्तमाब्दान्निधनं वरस्य
बलान्वितौ तौ कुरुतस्त्ववश्यम् ।।२।।
प्रालेयरश्मौ यदि लग्नसंस्थे
तस्मात्कुजः सप्तमराशिसंस्थः।
तदाष्टमाब्दात्कुरुतस्त्ववश्यं
वरस्य मृत्युं त्वथ वाङ्गनायाः ।।३।।[३५८]
स्वनीचगः शत्रुनिरीक्षितश्च
पापौ विलग्नाद्यदि सप्तमस्थः ।
विवाहिता सा मृतपुत्रिणी स्या-
द्वन्ध्याथवा भर्तृविवर्जिता वा ।।४।।
लग्नात्त्रिपञ्चास्तदशायगेषु
हिमद्युतिर्जीवनिरीक्षितश्च ।

---

३५७ व२ तृतीयचतुर्थपङ्क्तिभेदः - निवेद्य तस्मै प्रणतः सलग्नं पृछेद्विदित्वा वरकन्ययोश्च।
व१,व२ -मध्येऽधिकम्-
प्रष्टुर्विलग्नात्प्रबलः शशांकः शत्रुस्थितो मृत्युगृहस्थितो वा।
यद्यष्टमाब्दात्परतो विवाहे करोति मृत्युं वरकन्ययोश्च।

३५८ व२ पूर्णश्लोकलोपः

तयोस्तु सम्बन्धकरस्तदानीं
नार्कांशुलुप्तो न च नीचगश्चेत् ।।५।।
विलग्नगा गोघटकर्कटाश्च
हिमांशुदैत्येज्यसमन्वितास्ते ।
संवीक्षिता वा यदि कन्यकाया
लाभं भवेदत्र च पृच्छकस्य ।।६।।
[३५९]अन्योन्यराश्यंशगतौ सितेन्दू
निरीक्षितौ तौ बलिनौ विलग्नम् ।
तयोस्तदानीं कुरुतस्त्ववश्यं
सम्बन्धमाजीवितशर्मदं स्यात् ।।७।।
अयुग्मराश्यंशगते विलग्ने
निरीक्षिते पुंखचरैर्दृकाणे ।
तथाविधे तस्य वरस्य लाभं
वदेत्तदानीं खलु कन्यकाया: ।।८।।[३६०]

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां विवाहप्रश्नाध्याय एकत्रिंश: ।।३१।।

---

३५९ व२ अनोज

३६० व२ सुवरुजंतुजान्यस्थितस्वशिरोधर।। यस्यापि प्लवने रेतो ह्यदि मूत्रं च फेनिलं । पुमान्स्याल्लक्षणैरेभिर्विपरीतस्तु षंढकं।। अपत्यार्थं स्त्रिय: सृष्टा: स्त्रीक्षेत्रबीजिनो नरा:। क्षेत्रं विजयते देयं नाबीजी क्षेत्रमर्हति। प्रह्लाद।। समाण्डत्वे सुखं चायुर्ह्रस्वाण्डत्वे प्रभुर्भवेत् ।। वक्राण्डत्वे सेकश्च मण्डितासु नंपुसकं।।

SMT. HANSA MEHTA LIBRARY • The M. S. University of Baroda

३२

२.३२.० विवाहः

कश्चिद्गृहाश्रमसमो न परोऽस्ति धर्मः
सोऽपि स्थितः सुगुणवृत्तयुताङ्गनासु ।
उद्वाहलग्नवशतो गुणवृत्तिलब्धि-
स्तासां तथाविधसुलग्नमतः प्रवच्मि ॥१॥
अब्देषु युग्मेष्वपि कन्यकानां
स्वजन्मवर्षाच्छुभदो विवाहः ।
अयुग्मवर्षेषु शुभो नराणां
विपर्यये दुःखगदप्रदः सः ॥२॥[361]
दिनाधिपे मेषवृषालिकुम्भ-
नृयुङ्मृगाख्येषु गृहेषु संस्थे ।
माघद्वये माधवशुक्रयोस्तु

---

३६१ व२ श्लोका अधिकाः (व१ मध्ये ६ श्लोकानन्तरमधिकम्)
रजो हि दृष्टं यदि कन्यकायाः कुलं तदा दुर्गतिमेति न तस्याः।
तस्मान्नितान्तं तु तदुक्तकालमुल्लिंध्य पाणिग्रहणं विधेयम्।।३(व२)
कुलं च शीलं च सनाथता च विद्याप्तिवित्तं च वपुर्वयश्च।
एतान्गुणान् सप्त परीक्ष्य कन्या देया बुधैः शेषमचिन्तनीयम् ।।४(व२)
अत्यासन्नेति दूरस्थे असाद्ये पतिदुर्बले।
वत्तिहीने च मूर्खे च तस्य कन्या न दीयते ।।५(व२)
दूरस्थानामविद्यानां मोक्षधर्मानुवर्त्तिनाम्।
शूराणां निर्धनानां च न देया कन्यका बुधैः ।।६(व२)
गीता षष्टं मवोप्पष्टं भागवतस्य चात्रिप्रष्टमिति।
यो वेत्ति तस्मै देया न कन्यका ।।७(व२)
कुली विद्यान्वयः शीलं कांति शांतिः समीपगः।
रूपवानर्थवान्साधुर्वरो नवगुणः स्मृतः ।।८(व२)

मुख्योऽथवा कार्त्तिकसौम्ययोश्च ।।३।।
शुक्ले द्वितीयादित एव कृष्ण-
पक्षे दशम्यन्तगताः शुभाः स्युः ।
तास्वष्टमीस्कन्दगणेशदुर्गा-
श्चतुर्दशी चापि तिथिर्विवर्ज्याः ।।४।।
दिने दिने वृद्धिमुपागतत्वा-
द्बली हि चन्द्रः शुभ एव शुक्ले ।
तथैव कृष्णे विलयं गतत्वा-
त्पक्षापरार्धात्खलु पाप एव ।।५।।
वाराः प्रशस्ताः शुभखेचराणां
सूर्यार्किवारौ खलु मध्यमौ तौ ।
त्याज्यः सदा भूमिसुतस्य वारः
कामार्कतिथ्योरपि तौ प्रदोषौ ।।६।।
तिस्रोत्तरामूलमघान्त्यमैत्र-
प्राजेशचन्द्रार्कसमीरभेषु ।
सदा प्रशस्तः खलु कन्यकायाः
पाणिग्रहो वेधविवर्जितेषु ।।७।।
रेखाश्चोर्ध्वाः पञ्च तिर्यक् च पञ्च
द्वे द्वे रेखे कोणयोरत्र चक्रे ।
क्रमान्न्यसेच्छम्भुकोणे द्वितीये
रेखायां भान्यग्निभात्साभिजिच्च ।।८।।
चक्रे तस्मिन्नेकरेखास्थितेन
तद्विद्धयर्क्षं खेचरेण प्रदिष्टम् ।
क्रूरैर्विद्धं सर्वधिष्ण्यं विवर्ज्यं
सौम्यैर्विद्धं नाखिलं पादमेव ।।९।।

[३६२]आर्द्रोदयादूर्द्धवमिनस्य कार्यं
  नक्षत्रवृन्दे दशके कदाचित् ।
मासोक्तकर्मान्तरमङ्गलाद्यं
  न बोधनेऽह्नि प्रकटं मुरारेः ।।१०।।
आर्द्रादिकस्वातिविरामकाले
  नक्षत्रवृन्दे दशके तथैव ।
विवाहचौलव्रतबन्धनाद्यं
  सुरप्रतिष्ठा न च कार्यमेव ।।११।।
प्रागुद्गतोऽहस्त्रितयं शिशुः स्याद्
  वृद्धो दशाहं दिशि तत्र शुक्रः ।
पश्चाद्दशाहं शिशुरत्र वृद्धः
  पञ्चाहमार्योभयस्तु पक्षम् ।।१२।।
वृद्धत्वमिन्दोस्त्रिदिनं दिनार्धं
  बालत्वमस्तत्वमहर्द्वयं च ।
अस्ते विधौ मृत्युमुपैति कन्या
  बालेऽन्यसक्ता विधवा च वृद्धे ।।१३।।
येनोक्तमेकं दिवसं शिशुत्व-
  मित्येतदिन्दोस्तदयुक्तमत्र ।
महत्त्वशीघ्रत्वसुधामयत्वा-
  द्दिनार्धमित्यब्जजनिष्ठितत्वात् ।।१४।।
स्वजन्ममासर्क्षतिथिक्षयेषु [३६३] ?
  वैनाशिकाद्व्यृक्षगणेषु भेषु ।
नोद्वाहमात्माभ्युदयाभिलाषी
  नैवाद्यगर्भं द्वितयं कदाचित् ।।१५।।
दम्पत्योर्जन्मभे चैक्ये राशौ च निधनं तयोः ।

---

३६२ व१ अर्धो
३६३ वे. क्षणेषु

एकस्य च तथोद्वाहे किञ्चिद्भेदेऽपि वा न च ।।१६।।
ज्येष्ठे मासे ज्येष्ठयोर्वा नृनार्यो-
नैंवोद्वाहो नोपरागाद्भुतेषु ।
सर्वग्रासे सप्तरात्रं तदर्धं
खण्डे त्याज्यं चाद्भुते सप्तरात्रम् ।।१७।।
ग्रस्तोदये चोर्ध्वमनिष्टमादौ
ग्रस्तास्तमानेऽप्युडुमासषट्कम् ।
नाड्यश्चतस्त्रस्तिथिऋक्षयोगे
सन्धिर्द्विपादं करणस्य सन्धिः ।।१८।।
पक्षोऽब्दसन्धिस्त्रिदिनं च मास-
सन्धिस्त्रिनाड्योभयसन्ध्ययोश्च ।
सवैधृता विष्टिरथाष्टमेन्दुः
स पापयोगः परिघार्धमाद्यम् ।।१९।।
तिस्रोऽष्टकाश्चोक्तनिसर्गदोषाः
सर्वत्र वर्ज्याः खलु मङ्गलेषु ।
निमित्तसंयोगनिसर्गजानां
मध्ये महादोषचयं ब्रवीमि ।।२०।।
पञ्चाङ्गदोषो रविसंक्रमश्च
ससंग्रहः कर्तरिकांशदोषौ ।
चन्द्रोऽरिरिष्फाष्टमपापवर्गौ
कुजोऽष्टमस्थो भृगुः षट्कसंस्थः ।।२१।।
गण्डान्तखार्जूरिकवारदोष-
विषाख्यनाड्योऽष्टमलग्नराशी ।
तस्मिन्महादोषचयेऽपि कार्यं
कृतं च तन्नाशमुपैत्यवश्यम् ।।२२।।
अकालवृष्टिः कुमुहूर्तदोषो
महाव्यतीपातजवैधृतोत्थः ।

लग्नास्तजाता ग्रहणर्क्षजाता
पापर्क्षविद्धर्क्षसमुद्भवा ये ।।२३।।
उत्पातभोल्कामहदाख्यदोषाः
सर्वेषु देशेषु सदा विवर्ज्याः ।
एकोत्तरा विंशतिरत्र दोषाः
स्वसंहितायां च पितामहेन ।।२४।।
उपग्रहोलत्तभयातितर्क्षे
शुभग्रहैर्विद्धविदूषितं यत् ।
विरुद्धयोगेषु विरुद्धनाड्यो
द्युराशयश्च ग्रहजन्मधिष्ण्यम् ।।२५।।
या मासदग्धास्तिथयो विलग्ना-
न्यन्धानि शून्यानि च बाधिराणि।
द्युदग्धलग्नानि सपङ्गुकाण-
ज्वालामुखोद्बन्धनमासतिथ्यः ।।२६।।
प्रत्यर्कनीहारमहेन्द्रचाप-
विद्युत्वता भूभ्रमणाभ्रदोषाः ।
मरुत्प्रचारः परिवेषकम्पः
प्रतीन्दुवैवर्णमथेन्दुभान्वोः ।।२७।।
द्युवारवारर्क्षजमृत्युघात-
हालाहलोत्था तु महानलाद्याः।
एतेऽल्पदोषाः क्रमशस्तथैषां
देशव्यवस्था क्रियते सुसम्यक् ।।२८।।
उपग्रहर्क्षं कुरुबाह्लिकेषु
कलिङ्गवङ्गेषु च पातितं भम् ।
सौराष्ट्रशाल्वेषु च लत्तितं भं
देशेषु वर्ज्यं शुभविद्धभं च ।।२९।।
निषिद्धयोगद्युनराशिजाता

निषिद्धनाड्यो ग्रहजन्मभं च ।
निशासु वारप्रभवादिदोषा-
स्त्याज्या: सदा कौङ्कणसंज्ञदेशे ।।३०।।
ये मासदग्धादिदशैव दोषा
विवर्जनीया: खलु मध्यदेशे ।
दु:स्वप्नदुर्दर्शनदुर्निमित्तं
दि:शाकुनाद्यास्त्वपि यत्र तत्र ।३१।।
प्रत्यर्कपूर्वा दशपूर्वदोषा-
स्त्याज्या: सदा मागधगौडयोश्च ।
नानाभिधानास्तिथिवारजाता
नक्षत्रवारप्रभवाश्च दोषा: ।।३२।।
ते हूणवङ्गाङ्गखशेषु वर्ज्या:
शेषेषु देशेषु न ते निषिद्धा: ।
तस्मात्तु तेष्वेव विवर्जितास्ते
देशेषु चान्येषु न दोषदा: स्यु: ।।३३।।
कृत्वाधुनैषां विषयव्यवस्थां
तान्पूर्वशास्त्रानुसरेण सम्यक् ।
ततो महादोषनिरूपणं च
फलं तथा विस्तरतोऽभिधास्ये ।।३४।।
क्रमशस्तिथिवारर्क्षं योगतिथ्यर्धसंज्ञकम् ।
तत्पञ्चाङ्गमिति प्रोक्तं पुण्यमर्केन्दुसम्भवा: ।।३५।।
पञ्चाङ्गसंज्ञात्प्रभव: सदोष-
स्तस्मिन्कृतं मङ्गलसञ्चयं यत् ।
दहत्यघौघं निखिलं च यद्व-
द्दावानलो विस्तृतकाननं यत् ।।३६।।
विषुवतोऽयनतोऽपि दिनत्रयं
हरिपदे षडशीतिमुखेषु च ।

पूर्वतोऽपि परतोऽपि संक्रमा-
न्नाडिकाश्च खलु षोडश षोडश ।।३७।।
संक्रान्तिदोषे त्वचिरात्कृतं य-
दुद्वाहपूर्वाखिलमङ्गलौघम् ।
लाक्षासमूहं ज्वलिताग्निमध्ये
विलीयते यद्वदशेषकोटिः ।।३८।।
यदा[३६४]यनप्रवेशः स्यात्तदा तद्राशिसंक्रमः ।
तस्मिन्नपि तदा त्याज्या नाड्यः षोडश षोडश ।।३९।।[३६५]
इति संक्रान्तिः ।
आदित्यभूमिपुत्राद्यैः संयुक्तश्चन्द्रमा यदा ।
सग्रहाख्यो महादोषो हालाहलविषोपमः ।।४०।।
यः पापखेटोद्भवसग्रहाख्यो
दोषः स लग्नोत्थगुणान्समस्तान् ।
निहन्ति मत्तेभगणाननेका-
नेकोऽपि सिंहः प्रबलश्च यद्वत् ।।४१।।
दारिद्र्यं रविणा कुजेन मरणं सौम्येन न स्युः प्रजा
दौर्भाग्यं गुरुणा सितेन सहिते चन्द्रे ससापत्यकम् ।
प्रव्रज्यार्कसुतेन सेन्दुजगुरौ वाञ्छन्ति केचिच्छुभं
व्याध्यैर्मृत्युरसद्ग्रहैः शशियुतैर्दीर्घः प्रया(वा)सः शुभैः ।।४२।।
लग्नेऽस्य पृष्ठाग्रगयोरसाध्वोः
सा कर्तरी स्यादृजुवक्रगत्योः ।
तावेव शीघ्रं यदि वक्रचारौ

---

३६४ व१,व२ यदा यत्र

३६५ व२ मध्य उपरिभागे लिखितम्-प्रतिपन्मूलसंयुक्ता भरणी पंचमीयुता। अष्टमी कृत्तिकायुक्ता रोहिणी नवमीयुता। दशमी सार्पयुक्ता च योगो ज्वालामुखी भवेत्। शुभकार्येषु सर्वेषु वर्जनीयाः प्रयत्नतः।।

न कर्तरी चेति **पितामहोक्तिः** ।।४३।।

यः कर्तरी नाम महान्हि दोषो
लग्नोद्भवानेकशुभग्रहोत्थान् ।
गुणान्निहन्ति प्रबलानशेषा-
न्व्याघ्रो यथा गोसमितिं समस्ताम् ।।४४।।

क्रूरग्रहमध्यगते लग्ने चन्द्रेऽथवा करग्रहणम् ।
ते यमसदनाभिमुखं गमनं चेच्छन्ति कन्यायाः ।।४५।।

पापयोः कर्तरीकर्त्रोर्नीचशत्रुगृहस्थयोः ।
यदा चास्तगयोर्वापि कर्तरी नैव दोषदा ।।४६।।

लग्नादिसर्वे(र्वाः) खलु राशयश्च
शुभेक्षिताश्चाथ युताः शुभाः स्युः ।
नवांशकास्तौलिनृयुग्मवत्य-
श्चापार्धभागः शुभदो न चान्ये ।।४७।।

द्विभर्तृका मेषनवांशके स्या-
द्वृषांशके स्यात्पशुशीलयुक्ता ।
धनान्विता पुत्रवती तृतीये
कुलीरकांशे कुलटाप्यजस्रम् ।।४८।।

सिंहांशके सा पितृमन्दिरस्था
कन्यांशके वित्तयुता सुशीला ।
तुलांशके सर्वगुणास्पदा सा
कीटांशके निःस्वतरा विशीला ।।४९।।

चापांशकाद्ये धनिनी द्वितीये
भागेऽन्यसक्ता मलिनी गदाढ्या ।
निःस्वा मृगांशे विगुणा घटांशे
विभर्तृका योगरता विशीर्णा ।।५०।।

मीनांशके भर्तृसुतार्थहीना
शुभग्रहैर्युक्तनिरीक्षितेऽपि ।

तस्मात्सदैवोक्तनवांशकेषु
कुर्याद्विवाहं गुणसंप्रवृद्ध्यै ।।५१।।
अन्त्यांशकश्चेद्विशुभांशकानां
मध्ये य एको न शुभप्रदः सः ।
स एव वर्गोत्तमसंज्ञितश्चे-[366]
च्छुभप्रदश्चाखिलमङ्गलेषु ।।५२।।
वर्गोत्तमं विनान्त्यांशो विवाहे न शुभप्रदः ।
वर्गोत्तमश्चेदन्त्यांशः पुत्रपौत्राभिवृद्धिदः ।।५३।।[367]
नवांशदोषः सकलं गुणौघं
लग्नोत्थसौम्यग्रहसम्भवं च ।
[368]दत्तं निहन्तीव वृकोऽजसंघं
षट्वर्गजं सौम्यवियच्चराणाम् ।।५४।।
विधोस्तु षष्ठाष्टमरिफ्फदोषः
करोति नाशं विविधं गुणौघम् ।
लग्नांशसौम्यग्रहजं च तद्व-

---

३६६ व१ संज्ञकश्चे
३६७ व२ श्लोकाः ५३-५५ अन्यरूपेण पठिताः-
वर्गोत्तमविनात्यांशो विवाहे न शुभप्रदः ।
वर्गोत्तमसंज्ञितश्चेछुभदोखिलमंगले।५१
वर्गोत्तमविनाल्पांशो विवाहे न शुभप्रदः।
यो लग्नस्थसौम्यग्रहसंभवश्च
ध्रुवं निहंति च वक्रीजंघं
षङ्गवर्गजं सौम्यवियच्चराणां ।५२
विधोश्च षष्टमरिछ्पूवर्गोत्तमश्चेदं
त्याशपुत्रपौत्राभिवृद्धिदः
नवांशदोषः सकलं गुणौत्यदोषः ५३
३६८ व१ श्रुवं

त्सुरालवः पावनपञ्चगव्यम् ।।५५।।
षष्ठाष्टमद्वादशके शशाङ्के
स्थिते ग्रहा वर्धयितुं न शेकुः ।
विवाहमुत्सन्नजनित्रिमुच्चै-
र्वत्सं यथा वत्सलवत्सकीयम् ।।५६।।
यः पापषड्वर्गमहान्स दोषः
पञ्चाङ्गसौम्यग्रहलग्नजातम् ।
गुणौघमम्भोधिममोघबाणः
शुष्यत्यशेषं त्विव राघवस्य ।।५७।।
पापषडवर्गजो दोषो सकलं गुणसञ्चयम् ।
हन्ति यद्वदघानीकं हरिरित्यक्षरद्वयम् ।।५८।।
लग्नस्थभौमाष्टमसंस्थदोषो
निहन्ति तत्सर्वगुणान्विशिष्टान् ।
यथानृतं धर्मचयानशेषा-
नतः परं किं च वधूवरौ च ।।५९।।
लग्नात्कुजाष्टमो दोषो नाशयत्यखिलान्गुणान् ।
यथा लग्नांशसम्भूतान्कलुषं धर्मसञ्चयम् ।।६०।।
तनुजातान्गुणनिचयान्निहन्ति भौमाष्टदोषः सः ।
दम्पत्योरपि मरणं करोति यद्वत्पराङ्गनायोगः ।।६१।।
विलग्नराशेर्भृगुषट्कदोषः
करोति नाशं विविधान्गुणौघान् ।
आधिः क्रमाद्यद्वदशेषधातू-
न्मित्राधिमित्रग्रहजानशेषान् ।।६२।।
भृगुषट्काख्यो दोषो वरवध्वोर्द्राग्वियोगकृन्नूनम् ।
कन्यां विवाहितां तां भर्तृघ्नीं वा करोत्यचिरात् ।। ६३।।
यदन्तरालं पितृसार्पधिष्ण्ये
मूलेन्द्रयोरश्विनपौष्णयोश्च ।

भसन्धिगण्डान्तमिति द्वयं त-
न्नाड्य: प्रमाणं शुभकर्म हन्ति ।।६४।।
अहिवासवपौष्णानामन्त्ययामार्धमृक्षसन्धि: स्यात् ।
पितृमूलाश्विभानामादौ यामार्धमृक्षगण्डान्तम् ।।६५।।
पुन: पुन: पञ्चमषष्ठतिथ्यो-
र्यदन्तरालं प्रहरार्धकाल: ।
तल्लग्नजातं गुणसञ्चयं य-
त्क्ष्वेडं यथा हन्ति नरं हि नूनम् ।।६६।।
लग्नान्तरालं घटिकार्धमेत-
त्कुलीरहर्योरलिचापयोश्च ।
मीनाजयो: सर्वगुणान्निहन्ति
लोभो यथा सर्वगुणान्नरस्य ।।६७।।
खर्जूरचक्रस्य समाङ्घ्रिदोषो
विलग्नसम्भूतगुणानशेषान् ।
शुभग्रहोत्थानपि तान्निहन्ति
दारिद्र्यमेकं गुणसंहतिं यत् ।।६८।।
पादेन पादं विनिहन्ति तस्य
राशेर्विनाशं हि नवांशकेन ।
ग्रहोऽपि पादेन न कृत्स्नधिष्ण्यं
नवांशकेनापि न कृत्स्नधिष्ण्यम्[३६९] ।।६९।।
न सर्वराशेरुदयो विलग्नं[३७०]
वेधो न सर्वर्क्षभव: कदाचित् ।
इष्टांशकं लग्नमुशन्ति तज्ज्ञा
विरुद्धपादा अपि भस्य शस्ता: ।।७०।।
पादेन दूष्यं सकलं च धिष्ण्यं

---

३६९ व१, व२ राशि
३७० व२ लोप: न सर्व-त: वेधो-पर्यन्तं

चेद्धिष्ण्यदोषाद्भगणं च कृत्स्नम् ।
गणस्य दोषात्सकलं च दूष्य-
मतिप्रसङ्गस्थितपाद एव ।।७१।।
विषप्रदग्धेन हतस्य पत्रिणा
मृगस्य मांसं शुभदं क्षतादृते ।
तथैव पादो न शुभोऽवशिष्टाः
पादाः शुभाश्चेति **पितामहेन** ।।७२।।
अतोऽन्त्यपादमादिगो द्वितीयगस्तृतीयगम् ।
तृतीयगो द्वितीयकं चतुर्थगस्तु चादिमम् ।।७३।।
भिनत्ति वेधकृद्ग्रहो न चान्यपादमादरात् ।
असंभवाच्छशीनयोर्दृशोः समत्वमत्र वै ।।७४।।
पाद एव न शुभः शुभग्रहै-
र्विद्ध इत्यखिलशास्त्रमतं हि ।
क्रूरविद्धमशुभं न शोभनं
शोभनेषु सकलं न पादतः ।।७५।।
[३७१]खार्जूरं यमघण्टकश्च कुलिकश्चेत्येव वारोद्भवा
दोषा लग्नतदंशसौम्यखचरप्रोद्भूतसर्वान्गुणान् ।
निघ्नन्त्येव[३७२] यथा शरीरमखिलं दोषत्रयः प्रोत्कटा-
श्चान्योऽन्यान्गुणसञ्चयानपि महान्यामार्धतुल्याः पृथक् ।।७६।।[३७३]
निधनं प्रहरार्धे तु निःसत्त्वं यमघण्टके ।
कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदाः।।७७।।

---

३७१ व१,व२ यामार्धं

३७२ व२ विघ्नन्त्येव यथा शरीरममलं

३७३ व१.२ मध्येऽधिकम्
कुलिके नैधनं विद्याद्यमघंटेर्थनाशनम्।
यामार्धे कार्यनाशश्च प्रोक्ता यामार्धसंख्ययोः। ७३

इति वारदोषाः ।।
खाक्षा ६० जिना २४ व्योमगुणा ३० खवेदा ४०
इन्द्रा १४ कुदस्राः २१ खगुणा ३० नखाश्च २० ।
दन्ताः ३२ खरामाः ३० खयमाः २० पुराणाः १८
क्ष्माबाहवो २१ विंशति २० रब्धिचन्द्राः १४ ।।७८।।
इन्द्रा १४ स्तु काष्ठा १० मनवः १४ षडक्षा ५६
वेदाश्विनो २४ व्योमभुजा २० दशा १० ऽऽशाः १० ।
नागेन्दवो १८ भूपतयो १६ऽब्धिदस्रा २४
व्योमाग्नयो ३० दस्रमुखर्क्षकाणाम् ।।७९।।
आभ्यः परस्ताद्विषनाडिकाख्या-
स्त्याज्याश्चतस्रः खलु शोभनेषु ।
विषाख्यनाडीषु कृतं शुभं य-
द्विनाशमायात्यचिराच्च सर्वे ।।८०।।
कुर्वन्ति नाशं विषनाडिकास्ता
लग्नाश्रितानंशगणान्विशेषान् ।
जन्तून्यथा कुष्ठभगन्दरार्श-
व्याघातशूलक्षयवातरोगाः ।।८१।।
कुर्वन्त्युद्वाहितां कन्यां विधवां वत्सरत्रयात् ।
अन्यस्मिन्मङ्गले ताश्च निधनं वाथ निर्धनम् ।।८२।।
इति विषनाडी ।
[३७४]यस्यास्तु लग्ने तदधीश्वरे वा
राशौ तदीशेऽथ विलग्नगे वा ।
स मृत्युमाप्नोति तदा मनोज-
स्त्रिनेत्रभालाम्बकवह्निनेव ।।८३।।
द्वादशं भवति जन्मलग्नतो

---
३७४ व१,व२ यस्याष्ट

लग्नमर्थहरमत्र योषिताम् ।
अष्टमं पुनरतोऽपि मृत्यवे
राशितोऽपि फलमेतदेव [375]च ।।८४।।
जन्मोदयर्क्षान्निधने विलग्ने
तदीश्वरेणोपगतेऽथवा स्यात् ।
कृतो विवाहो भयमृत्युकारी
त्रातुं विधातापि न तां समर्थः ।।८५।।
त्याज्यं तयोर्नैधनभं विलग्नं
तदंशकं वाथ तदीश्वरं च ।
तस्मात्स्वजन्मर्क्षनवांशयोश्च
लग्नांशकौ नैधनगौ विवर्ज्यौ ।।८६।।
जन्मेशाष्टमलग्नेशौ मिथो मित्रे व्यवस्थितौ ।
जन्मराश्यष्टमर्क्षोत्थदोषो नश्यति भावतः ।।८७।।
इत्यष्टमलग्नराशिदोषाः ।
अकालवृष्टिः प्रभवः सदोषः
करोति मृत्युं शुभकार्यकर्तुः ।
त्रातुं यथा सर्वगुणास्त्वशक्ता-
स्तं बन्धुवर्गा विषवह्निदग्धम् ।।८८।।
अकालवृष्टिप्रभवः स दोषः
करोति मुत्युं वरकन्ययोश्च ।
सीतावियोगप्रभवः सुदीर्घः
कोपो यथा दाशरथेर्दशास्यम् ।।८९।।
करोति निःस्वं कुमुहूर्तदोषः
कुमारमुद्वाहितमाशु नूनम् ।
सप्ताङ्गराज्योद्धतराजरत्नं

---

३७५ वर२ हि

नलं यथा द्यूतमिवात्मकर्म ।।९०।।
वरस्य लक्ष्मीं निखिलं निहन्ति
संवत्सरार्धात्कुमुहूर्तदोषः ।
दुर्वाससः शाप इव प्रमत्त-
महेन्द्रलक्ष्मीमसमां समग्राम् ।।९१।।
अर्यम्णो[३७६] भानुवारे शशधरदिवसे राक्षसब्रह्मसंज्ञौ
पित्रग्नी द्वौ कुजाहे शशिसुतदिवसेऽथाभिजित्संज्ञकः सः ।
जीवाहे राक्षसाख्यो भृगुसुतदिवसे ब्राह्मैत्रावहीशौ
सौरावेते विवर्ज्यास्त्वधननिधनदा मङ्गले दुर्मुहूर्ताः ।।९२।।
इति दुर्मुहूर्ताः।
दोषो महापात इति प्रसिद्धः
स वैधृतो हन्ति वधूं वरं च ।
तं रक्षितुं लग्नगुणा अशक्ताः
स्वबान्धवास्तेऽशनिनोपघातम् ।।९३।।
शास्त्रात्समानीतमहातिपातः
सवैधृतो हन्ति वधूं वरं च ।
त्रिसप्तवाराणि च जामदग्न्यो
क्रोधोऽचिरात्क्षत्रकुलं समस्तम् ।।९४।।
लग्नास्तशुद्धिस्तु महान्स दोषः
करोति मृत्युं वरकन्ययोश्च ।
त्रातुं यथा लग्नगुणास्त्वशक्ता-
स्तं बन्धुवर्गा इव सर्पदष्टम् ।।९५।।
इष्टोदयांशे निजपत्यदृष्टे
वरस्य मृत्युस्तदसंयुते वा ।
अस्तांशकेऽप्येवमदृष्टयुक्ते

---

३७६ व१ अर्यम्णे भा वारे

स्वस्वामिना नाशमुपैति कन्या ।।९६।।
उदयांशः स्वनाथेन मित्रसौम्येन संयुतः ।
प्रेक्षितो वा तथास्तांऽशो दम्पत्योः पुत्रपौत्रदः ।।९७।।
इति लग्नास्तशुद्धिः ।
उत्पातभोपप्लवभोग्रखेट-
विद्धर्क्षतद्धं वरकन्ययोस्तु ।
विनाशदं लग्नगुणास्त्वशक्ता-
स्त्रातुं यथा पातकिनं स्वकीयाः ।।९८।।
उत्पातभं ग्रहणभं क्रूरविद्धं स्थितं च भम् ।
दहतीव शुभं कर्म राघवाग्निशरोऽम्बुधिम् ।।९९।।
लग्नं महादोषविदूषितं य-
त्र तद्गुणास्त्राणविधौ समर्थाः ।
राज्ञा धृतं तं पुरुषं च यद्व-
दन्ये जना बन्धुजनाश्च सर्वे ।।१००।।
लग्नस्थजीवज्ञसितप्रयाता
गुणाः परित्रातुमशेकुरेव ।
लग्नं महादोषविदूषितं य-
द्भ्रष्टं द्विजं बन्धुजना यथैव ।।१०१।।
लग्नांशसौम्यग्रहवर्गजा ये
गुणाः समर्था न च रक्षितुं तत् ।
लग्नं महादोषविदूषितं य-
च्छूद्रार्थयज्ञा इव यायजूकम् ।।१०२।।
मित्राधि[३७७]मित्रोच्चगृहांशजाता
गुणास्त्वशक्ताः परिरक्षितुं यत् ।
लग्नं महादोषविदूषितं य-

---

३७७ वे.अधि-

द्धर्मा यथाऽधर्मपरं द्विजेन्द्रम् ।।१०३।।
वर्गोत्तमांशोद्भवचन्द्रजाता
गुणास्तदुर्धर्तुमिवासमर्था: ।
लग्नं महादोषविदूषितं
यद्गुणा यथा निर्गुणिनं च सर्वे ।।१०४।।
लग्नं महादोषविदूषितं
यदवाप्य सौम्यग्रहकेन्द्रजाता: ।
व्यर्था गुणा: पूर्णसुधाकरस्य
करा जनानन्दकरा इवान्धम् ।।१०५।।
अवाप्य वन्ध्या: सुगुणास्तदन्धं
लाभस्थखेटस्य गृहोच्चजाता: ।
लग्नं महादोषविदूषितं य-
त्कटाक्षपाता इव सुन्दरीणाम् ।।१०६।।
धनत्रिकोणस्थशुभग्रहोत्थ-
गुणा निरर्थास्तदवाप्य सर्वे ।
लग्नं महादोषविदूषितं य-
द्विबीजिनं यद्वदपत्ययोग: ।।१०७।।
अयं गुणो दोषममुं निहन्ती-
त्युक्तं हि यत्रोभयनामपूर्वम् ।
गुण: स एवान्यगुणो न शक्तो
दोषोऽपि तद्वद्गुणघातुक: स: ।।१०८।।
गन्तव्यधिष्ण्यं खलु मुक्तभं
यत्क्रूरैर्महोत्पातविदूषितं तत् ।
चन्द्रोपभोगादमलं तदानीं
शुभेषु कार्येषु शुभप्रदं च ।।१०९।।
द्युरात्रिमध्यं खिलमङ्गलेषु
यदार्धकाल: परिवर्जनीय: ।

तदाभिजिद्ब्राह्ममुहूर्तकत्वा-
    ददोषदः सोऽपि शुभप्रदः सः ।।११०।।
उक्ताखिलं दोषनिरूपणं
    यन्निरूपणं स्वल्पमहागुणानाम् ।
वक्ष्येऽन्यपक्षस्य विदूषणार्थं
    स्वपक्षसंस्थापननिर्णयार्थम् ।।१११।।
मित्राधिमित्रस्वगृहोच्चमूल-
    त्रिकोणवर्गोत्तमगग्रहोत्थाः ।
तदंशकेन्द्रोपचयत्रिकोण-
    महादशाधीशबलाधिकोत्थाः ।।११२।।
लग्नांशकाधीशशुभावलोक-
    संयोगतद्वर्गजतद्गुणोत्थाः ।
ये सिद्धयोगामृतसिद्धयोगाः
    स्थितिप्रयाताश्च महागुणाः स्युः ।।११३।।
ये चान्यसामान्यगुणाः सदैव
    स्वभावसंसिद्धगुणा यदास्ते ।
किं चाल्पदोषानपि लग्नजाता-
    न्हन्तुं न शक्ताश्च कदाचिदेव ।।११४।।
मित्रर्क्षगो मित्रनवांशगो वा
    शुभग्रहस्तेन निरीक्षितो वा ।
यदा विलग्नोपगतः स खेट-
    श्चेद्धन्ति दोषानपि लग्नजातान् ।।११५।।
शुभोऽधिमित्रर्क्षगतस्तदंश-
    संस्थोऽपि वा तेन निरीक्षितो वा ।
स लग्नगो दोषचयं निहन्ति
    रामो यथा रावणदैत्यवृन्दम् ।।११६।।
स्वक्षेत्रगः स्वस्य नवांशगो वा

शुभग्रहः सौम्यनिरीक्षितो वा ।
स लग्नगो यत्र निहन्ति दोषा-
न्पञ्चाननो यद्वदिभेन्द्रवृन्दान् ।।११७।।
उच्चस्थितः स्वोच्चनवांशगो वा
शुभः स्वमित्रेण निरीक्षितो वा ।
स केन्द्रगो यत्र निहन्ति दोषा-
न्हरिस्मृतिर्यद्वदशेषपापान् ।।११८।।
मूलत्रिकोणर्क्षगतस्तदंश-
संस्थः शुभो वाप्यथ मित्रदृष्टः ।
विलग्नगो यत्र निहन्ति दोषा-
न्पापं यथा चन्द्रधरे प्रणामः ।।११९।।
वर्गोत्तमस्थशुभखेचरसंयुतं वा ।
लग्नं च तेन खचरेण निरीक्षितं यत् ।
तत्सर्वदोषनिचयं विनिहन्ति सद्य-
स्तार्क्ष्यः समस्तमहिसंघमिव प्रतापात् ।।१२०।।
लग्नं स्वनाथशुभमित्रनवांशगं च
तस्याधिमित्रशुभखेटनवांशगं वा ।
तत्तुङ्गसंज्ञितनवांशकगं यदा वा
हन्तीव दोषनिचयं कुलिशं नगौघम् ।।१२१।।
लग्नेशसौम्यखचरोऽस्तगृहं विहाय ।
केन्द्रस्थितो यदि गतोऽखिलदोषवृन्दम् ।
एकोऽपि हन्त्युपचयोपगतस्त्रिकोण-
संस्थोऽपि यद्वदनिलोऽभ्रचयं समस्तम् ।।१२२।।
पापोऽपि लग्नाधिपतिस्त्रिषष्ठ-
लाभस्थितः स्थानबलाधिकश्च ।
लग्नोत्थदोषान्निखिलान्निहन्ति
पापानि यद्वत्परमाक्षरज्ञः ।।१२३।।

त्यक्त्वास्तकेन्द्रे स्थितसौम्यखेट-
स्त्रिकोणगो वाप्यथ लाभसंस्थः ।
दोषानशेषानुदयांशजाता-
न्निहन्ति यद्वत्तिमिरं दिनेशः ।।१२४।।
बलाधिकः सौम्यनभश्चरो यः
कुटुम्बसंस्थोऽपि निहन्ति दोषान् ।
लग्नोद्भवं विष्णुपदाब्जतोयं
यथाघसंघं शुभवर्गगोऽपि ।।१२५।।
यः सिद्धियोगो विनिहन्ति दोषा-
न्पापेक्षितोपग्रहलत्तपातान् ।
लग्नेन्दुजामित्रधनप्रचार-
नीहारविद्युत्परिवेषजांश्च ।।१२६।।
दोषानशेषानमृताख्ययोगो
निहन्ति लोभो गुणवृन्दमेकः ।
प्रत्यर्कयोगर्क्षतिथीन्द्रचाप-
कुवारपङ्गवन्धभवांश्च तद्वत् ।।१२७।।
सिद्धा तिथिर्हन्ति समस्तदोषा-
न्यान्मासशून्यानपि मासदग्धान्।
दिनप्रदग्धानपि चान्यदोषा-
नेकादशी यद्वदशेषपापान् ।।१२८।।
एकार्गलोपग्रहपातलत्ता-
जामित्रकर्तर्युदयादिदोषाः ।
नश्यन्ति चन्द्रार्कबलोपपन्ने
लग्ने यथार्काभ्युदये तु दोषाः ।।१२९।।
ये लग्नदोषाः कुनवांशदोषाः
पापगृहैर्दृष्टिनिपातदोषाः ।
लग्ने गुरुस्तान्विमलीकरोति

फलं यथाम्भः कतकद्रुमस्य ।।१३०।।
गुणाधिकं दोषविहीनकालं
ज्ञात्वा विलग्नेशनवांशपस्य ।
बलाबलं खेचरिणां सुसम्य-
ग्विचार्य लग्नं प्रवदेदभिज्ञः ।।१३१।।
बले नृनार्योरिनजीवयोश्च
तारेन्दुवीर्ये सुदिने सुलग्ने ।
पञ्चेष्टकेऽर्केन्दुसुरेज्यमुख्ये
जामित्रशुद्धौ[३७८] हिमदीधितेश्च ।।१३२।।
यत्रार्कगुर्वोरपि नैधनान्त्य-
जन्मादिदुःस्थानगयोर्द्वयोर्वा ।
एकस्य पूजामपि तत्र कृत्वा
पाणिग्रहं कार्यमतः सुसम्यक् ।।१३३।।
स्वनीचगाः शत्रुगृहस्थिताश्च
तदंशगाश्चास्तमिता ग्रहेन्द्राः ।
दातुं न शक्ताः स्वफलं विलग्ने
दष्टुं भुजङ्गा इव मन्त्रविद्धाः[३७९] ।।१३४।।
लग्नं तदर्धं च ततस्त्रिभागो
नवांशकश्च द्विरसांशकश्च ।
त्रिंशांशकश्चेति हि वर्गषट्कं
शुभाशुभं व्योमचराधिपत्यम् ।।१३५।।
शास्त्रोक्तमार्गेण सुलग्नकालं
स्फुटं समानीय जलादियन्त्रैः ।
संलभ्य तन्मङ्गलसूक्ष्मकालं
संवीक्षयेत्तत्र मिथोर्ध्वदृष्ट्या ।।१३६।।

---

३७८ व२ लोपः- शुद्धौ-तः पूजामपि तत्र(श्लोकः १३३)पर्यन्तं
३७९ व२ सिद्धा

अर्धोदयं चास्तमिनस्य वीक्ष्यं
यन्त्रं प्रदद्याज्जलपूर्णपात्रे ।
अलंकृते गन्धसुपुष्पवस्त्र-
फलाक्षतैर्दैवविदं च पूज्य ।।१३७।।
षडङ्गुलोत्सेधसमं सुवृत्तं
कृतं मुखं सद्विरसाङ्गुलं यत् ।
पलैस्तु शुल्वैर्दशभिर्जलस्य
पूर्णं पलैः षष्टभिरम्बुयन्त्रम् ।।१३८।।
यत्त्र्यंशमाद्यत्रय एव वृत्तां
शलाकया मध्यमभागविद्धाम् ।
समुद्रसंख्याङ्गुलदीर्घपात्रे[३८०]
दद्यान्मयूरं नरवानराद्यम् ।।१३९।।
व्यासाङ्गुलत्रिगुणमायतमिष्टशङ्को-
र्वृत्तं तदेव परिधिश्च तदेव तस्य।
व्यासाङ्गुलार्धदलमङ्गुलमानमिष्टं
सर्वत्र शङ्कुपरिकल्पनमेवमेव ।।१४०।।
तुल्यां समन्तादृहवामभागे
हस्तोच्छ्रितायुक्तशुभाय युक्ताम् ।
समण्डपां प्राक्प्रवणामुदग्वा
सोपानरम्यां निबिडां ककुप्सु ।।१४१।।
विचित्रातामङ्कुरचित्रकुम्भ-
वितानानाविधतोरणाद्यैः ।
भृङ्गारपुष्पाङ्गणविप्रपीठ-
पण्याङ्गनानृत्यसुगीतवाद्यैः ।।१४२।।
ताम्बूलपुष्पाक्षतगन्धवस्त्र-

---

३८० व१ दीर्घोपदेशान्मयूरनखानराद्य, व२ दीर्घोपदेशान्नखानरायं रूप

माङ्गल्यसूत्रैः फलपूर्णपात्रैः ।
[381]धान्याकहारिद्रगुडैः सलाजै-
दीपैरनेकैर्नयनाभिरामाम् ।।१४३।।
सवेणुवीणामधुरस्वरेण
मनोरमां मङ्गलवेदघोषैः ।
प्रदक्षिणप्रक्रमणाद्युपेतां
तामारुरोहेन्मिथुनं च वेदीम् ।।१४४।।
मृत्युर्नैःस्वं बहुविधधनं भ्रातृहानिः प्रजानां
व्याधिः सौख्यं बहुविधमतो भर्तृहानिश्चिरायुः ।
श्रेयो हानिर्भवति हृदये व्याधिरर्थागमश्च
भानौ स्त्रीणामतिशयरुजा लग्नभावादिसंस्थे ।।१४५।।
नाशः संपद्बहुविधयशोबन्धुवृद्धिः प्रजार्तिः
शस्त्रान्मृत्युर्भवति न चिराद्दीर्घसापत्न्यबाधा ।
प्रव्रज्यत्वं दुहितृजनितात्वं धनं भोगभाक्त्वं
दास्यं स्त्रीणां तुहिनकिरणे लग्नभावादिसंस्थे ।।१४६।।
मृत्युः शोको बहुविधधनं भ्रातृवैरं कुबुद्धि-
र्लक्ष्मीप्राप्तिर्भवति मरणं चोभयोर्वित्त[382]नाशः ।
स्त्रीणां द्वेष्यं व्यसननिरतिः पुत्रपौत्रार्थसिद्धि-
र्भीतिर्भूमेर्बलिनि तनये लग्नभावादिसंस्थे ।।१४७।।
प्रीतिर्बुद्धिः सुगुणनिरतिर्बन्धुपूजा सुताप्ति-
र्निर्वैपक्ष्यं तनयरहितत्वं तनुत्यागचिन्ता ।
धर्मे बुद्धिर्भवति धरणीलाभमत्यन्तवृद्धि-
र्हानिः स्त्रीणां हिमकरसुते लग्नभावादिसंस्थे ।।१४८।।
लक्ष्मीप्राप्तिर्भवति सुयशः प्रीतिरन्योन्यवृद्धि-

---

३८१ मरीचिहारिद्रगुडैः सजीरै-
३८२ वे.पा. वंश

रिष्टावाप्तिर्बहुविधभयं चाश्रमाणां विरक्तिः।
पापासक्तिः सुकृतनिरतिर्भूरिलाभः सुरेज्ये
स्त्रीणां सौख्यं रिपुकृतभयं लग्नभावादिसंस्थे ।।१४९।।
भोगप्राप्तिर्विविधविभवः स्वैरवृत्तिर्महत्त्वं
धूम्राधिक्यं भवति निधनं सर्वनाशो व्यसुत्वम् ।
तथ्ये प्रीतिर्बहुविधगुणः सर्वसंपत्समृद्धि-
रस्वं स्त्रीणामुशनसि तदा लग्नभावादिसंस्थे ।।१५०।।
स्वच्छन्दत्वं कदशनरतिर्वल्लभत्वं विशील्यं
व्याधिः सुश्रीर्मृतिरथ सुखं गर्भपातप्रवृत्तिः।
द्यूतासक्तिर्भवति रविजे वैभवं वक्त्ररोगः
स्वर्भानौ वा शिखिनि च तथा लग्नभावादिसंस्थे ।।१५१।।
सर्वे जामित्रसंस्था विदधति मरणं सौरिसूर्यौ प्रशस्तौ
षष्ठाष्टत्र्यायसंस्थौ भवरिपुसहजस्थोऽपि भौमः शशाङ्कः ।
लग्नान्त्याष्टारिवर्ज्यः परिणयनविधौ ज्ञान्त्यमृत्युर्विवर्ज्यौ
शुक्रेज्यौ वा सुतायास्पदनवमगतौ भ्रातृशुक्रोऽपि नेष्टः ।।१५२।।
तथा च **पितामहः** ।
लग्नस्था शुभखचराः कुर्वन्ति विवाहितां सुपुत्रवतीम् ।
सप्तभिरब्दैः क्रूराश्चन्द्रश्च विलग्नगो विधवाम् ।।१५३।।
धनसौख्यवतीं सुभगां धनगाः सौम्यग्रहाः सचन्द्राश्च ।
क्रूरा द्वितीयसंस्था धनहीनां वत्सरैस्त्रिभिः कन्याम् ।।१५४।।
विसिताः सचन्द्रसौम्यास्तृतीयगा वित्तसौख्यवतीम् ।
पापास्तृतीयसंस्थाः सततं सौभाग्यपुत्रवतीम् ।।१५५।।[३८३]
बन्धुस्थाश्चन्द्रयुताः शुभखचरा भर्तृवल्लभां साध्वीम् ।
अशुभाश्चतुर्थसंस्था दुःशीलां दुर्भगां च कुर्वन्ति ।।१५६।।
तनयगता सेन्दुशुभा बहुतनयां मानिनीं सुशीलवतीम् ।

---

३८३ व२ द्वितीयपादलोपः

अशुभखगास्तनयगता विपुत्रवतीं वा विवादशीलवतीम् ।।१५७।।
सप्तभिरब्दैर्विधवां शशिशुक्रौ षष्ठगौ कुरुतः ।
सततं पापासक्तां ज्ञेया:[३८४] पापा: प्रभूतशीलवतीम् ।।१५८।।
सप्तमगा: सकलखगा: सप्तभिरब्दैः ससप्तमासैश्च ।
दम्पत्योः सह मरणं यमरक्षितमपि च कुर्वन्ति ।।१५९।।
अष्टमगौ शशिभौमौ धनरहितां तां च पञ्चभिर्वर्षैः ।
शुभखचरा:[३८५] कापटिकामितरे साध्वीं चिरंजीवीम् ।।१६०।।
नवमगता: शुभखचरा: शशिसहिता भोगभाग्यसौख्यवतीम् ।
अशुभखगा: खलचित्तां परनिरतां पापवादिनीं चैव ।।१६१।।
दशमगता: शुभखेटा: शशिसहिता भर्तृपूजितां साध्वीम्।
अशुभखगा: प्रतिकूलां मलिनाङ्गीं कर्कशां मृषाभिरताम् ।।१६२।।
लाभगता निखिलखगा बहुविधधनधान्यपुत्रपौत्रवतीम् ।
पतिभक्तां शीलवतीं न नीचगास्तारिराशिगाश्च तथा ।।१६३।।
व्ययगो दुग्धाब्धिभव: करोति विधवां च पञ्चभिर्वर्षैः ।
मानविहीनां सौम्या: पापा: कुर्वन्ति नीचवृत्तवतीम् ।।१६४।।
सत्खचरा: सदसच्च स्थानस्वशुभफलान्यफलम् ।
सम्यग्ज्ञात्वाथ तयो: शुभफलमधिकं प्रगृह्णीयात् ।।१६५।।
तत्राधिकफलवृन्दे विनाशमायाति दोषचयम् ।
यद्वच्छशाङ्ककिरणे कलङ्कमखिलं तथैव सदा ।।१६६।।
देशे च काले च तथा शरीरे
राज्येऽपि चापद्यपि यत्र तत्र ।
भावान्तरं तत्परिकल्पनीयं
गान्धर्ववैवाहचतुष्टयार्थम् ।।१६७।।
लग्ने भावाश्चोदितास्तेषु तिष्ठँ-

---

३८४ व१ज्ञेज्यो, व२ ज्ञज्या
३८५ व२ लग्नहीना शुभखचरामितरे

ल्लग्नस्थः संस्तानतीतो द्वितीयः ।
खेटैस्त्वेवं शेषराशीषु शेषा
भावाः सम्यक्कल्पनीयाः क्रमेण ।।१६८।।
ब्राह्मोद्वाहः कायदैवार्षसंज्ञा–
श्चैते कार्याः प्रोक्तकाले विधेयाः ।
नूनं गान्धर्वासुरौ राक्षसाख्यः
पैशाचो वा सर्वकाले विधेयाः ।।१६९।।
ब्राह्मो विवाहस्तज्जातः पुरुषानेकविंशतिम् ।
आहूय दीयते शक्त्या पुनात्युभयतः स्थितान् ।।१७०।।
कायोद्वाहः पावयेत्षट् षड्वंश्यांस्तत्र सम्भवः ।
चरतामनया धर्ममित्युक्त्वा दीयतेऽर्थिने ।।१७१।।
दैवोद्वाहो यज्ञवते ऋत्विजे दीयते सदा ।
पुनात्युभयतः सप्त पुरुषांश्चैव तत्रजः ।।१७२।।
आर्षोद्वाहस्तथादाय गोद्वयं दीयते सुता ।
पुनात्युभयतस्त्रीन्स्त्रीन्पुरुषांस्तत्र सम्भवः ।।१७३।।
गान्धर्वः समयं ग्राह्य आसुरोऽर्थप्रदानतः ।
राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात् ।।१७४।।
वर्णा[३८६] दिनं गणमहेन्द्रवधूविदूर–
योन्याख्यराशितदधीशविवश्यनाड्यः ।
वेधाख्यभूतबहुलिङ्गविजातिगोत्र–
पक्ष्यापयोगिनिसुधांशयुजो दशाष्टौ[३८७] ।।१७५।।
दिनयोनयः–
नवर्क्षपर्यायवशाद्वधूभमाद्यं वरर्क्षान्तमथो गणय्य ।
जन्मत्रिभं पञ्चमसप्तमं भं त्यक्त्वान्यभं शोभनमामनन्ति ।।१७६।।

---

३८६ व२ वर्गा
३८७ २४ दशांसो दिनयोतु

गणयोतु:-
दस्रादितीज्यमृगमैत्रकरानिलान्त्य-
लक्ष्मीशभानि नव देवगण: प्रदिष्ट: ।
पूर्वात्रयान्तकविधातृहरोत्तराणि
धिष्ण्यानि मानुषगणोऽत्र नव प्रदिष्ट: ।।१७७।।
पितृद्विदैवाग्निशतेन्द्रमूल-
वस्वाहिचित्रर्क्षगणोऽसुराख्य: ।
देवासुराणां मनुजासुराणां
वैरं महास्नेहमथेतरेषाम् ।।१७८।।
माहेन्द्रयोतु:[३८८]
पुंभे सति प्रीतिरतीव शश्वन्महेन्द्रवर्गश्च वधूवरस्य ।।१७९।।
स्त्रीदूरयोतु:-
स्त्रीधिष्ण्यतो भे नवके वरस्य चाद्ये तयोर्वैरमथ द्वितीये ।
सामान्यमेतच्च वधूविदूषितं [३८९]तस्मात्तृतीये नवके विवाह: ।।१८०।।
अश्वेभमेषभुजगद्वयकुक्कुरौ तु
मेषौ तु मूषकमहोन्दुरुगोलुलाया: ।
शार्दूलमाहिषगवारिमृगद्वयाश्च-
शाखामृगोक्षकपिपञ्चमुखाश्च सिंहा: ।।१८१।।
गोकुञ्जराविति यथाक्रममाश्विनादि-
भानां भवन्ति खलु कल्पितयोनिरूपा: ।
एतद्विचार्यमखिलं सदसद्ग्रहज्ञ-
स्त्रिस्कन्धवित्प्रवरधीर्विबुधां वरिष्ठ: ।।१८२।।
बभ्रूरगं श्वैणमिभेन्द्रसिंह-
मोत्वाखुसंज्ञं त्वजवानरं च ।

---

३८८ स्त्रीधिष्ण्यतो वेद ४ दिगा १० दि १ विश्वा १३ नृपा १६ तिधृत्या १८ कृति २२ तत्त्व २५ तुल्ये।

३८९ वे.पा.श्रेष्ठं

गोव्याघ्रमश्वोत्तममाहिषं च
वैरं नृनार्योर्नृपभृत्ययोश्च ।।१८३।।

राशिकूटम् ।

[390]षट्काष्टके मृत्युरथाङ्गनाया
राशौ नृनार्योर्नवपञ्चमेऽपि ।
अपत्यहानिर्नियतं च नैःस्वं
द्विर्द्वादशे प्रीतिरतः परेषाम् ।।१८४।।

कनिष्ठं राशिकूटं यदेतच्च त्रिविधं स्मृतम् ।
व्यत्ययान्मध्यमं चैतदपरं मध्यमं सदा ।।१८५।।

एकाधिपत्ये त्वथ मित्रभावे
स्त्रीपुंसराश्योर्नवरज्जुदोषे ।
षट्काष्टकादिष्वपि शर्मदं स्या-
दुद्वाहकर्माचरतोस्तयोश्च ।।१८६।।

एकाधिपे मित्रभावेऽप्युद्वाहः शर्मदः सदा ।
द्विर्द्वादशे त्रिकोणे च न कदाचित्षडष्टके ।। १८७।।

अन्योऽन्यशात्रवे त्याज्यस्त्याज्यः षट्काष्टकेऽपि च ।
नाडीदोषे भवेन्मृत्युर्गुणैः सर्वैः समन्वितः ।।१८८।।[391]

मध्यनाडी पतिं हन्ति पार्श्वे नाड्यौ तु कन्यकाम् ।
तस्मान्नाडी सदा त्याज्या दम्पत्योः शुभमिच्छता ।।१८९।।

उत्तमे राशिकूटेऽपि समं शात्रवमेव वा ।

---

३९० व१,व२ षष्ठाष्टमे

३९१ व२ मध्येऽधिकम्-
अन्योन्यशत्रवे त्याज्यः राशिषट्काष्टकेपि च ।
एकनाडी विवाहश्च गुणैः सर्वैः समन्वितः ८२
अन्योन्यशात्रवे मृत्युर्मृत्युः षट्काष्टकेपि च ।
नाडीदोषे भवेन्मृत्युर्गुणैः सर्वैः समन्वितः ८३

विवाहः शुभदो ज्ञेयो नापि मध्यकनिष्ठयोः ।।१९०।।
स्त्रीदूरे समजामित्रे सहजायसुहृद्दशे ।
शत्रुः समः समो मित्रं मित्रं चेत्परमं सुहृत् ।।१९१।।
नृयुक्तुलामेषघटाश्विसिंहाः
कुर्वन्त्यजस्रं खलु मित्रभावम् ।
स्वषष्ठसंख्याभवनैश्च तेऽपि
स्वस्वाष्टसंख्याभवनैकतां वा ।।१९२।।
अन्योऽन्यं शात्रवं यत्र दम्पत्योर्जन्मतस्तयोः ।
प्रीतिषष्ठाष्टमं त्याज्यमपि नूनं करग्रहे ।।१९३।।
एकराशिपृथक्धिष्ण्येऽप्युत्तमं पाणिपीडनम् ।
एकधिष्ण्ये पृथग्राशौ सर्वैक्येऽपि च मृत्युदम् ।।१९४।।
जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन नामभम् ।
व्यत्ययेन यदा योज्यं दम्पत्योर्निधनप्रदम् ।।१९५।।
अज्ञातजन्मनां नृणां नामभं परिकल्पयेत् ।
तेनैव चिन्तयेत्सर्वं राशिकूटादि पूर्ववत् ।।१९६।।
रवेः समो ज्ञः सितसूर्यपुत्रा-
वरी परेऽन्ये सुहृदोऽम्बराटाः ।
चन्द्रस्य नारी रविचन्द्रपुत्रौ
मित्रे समाः शेषनभश्चराः स्युः ।।१९७।।
समौ सितार्की शशिजश्च शत्रु-
र्मित्राणि शेषा पृथिवीसुतस्य ।
शत्रुः शशी सूर्यसितौ च मित्रे
समाः परे [३९२]स्युः शशिनन्दनस्य ।।१९८।।
गुरोर्ज्ञशुक्रौ रिपुसंज्ञकौ तु
शनिः समोऽन्ये सुहृदो भवन्ति ।

---

३९२ व२ शेषनभश्चराः स्युः ९३

शुक्रस्य मित्रे बुधसूर्यपुत्रौ
समौ कुजेज्यावितरावरी तौ ।।१९९।।
शनेः समो वाक्पतिरिन्दुसूनु-
शुक्रौ च मित्रे रिपवः परेऽपि ।
ध्रुवं ग्रहाणां चतुराननोऽपि
शत्रुत्वमित्रत्वसमत्वमुक्तम् ।।२००।।
वश्यकूटम् -
वश्यास्त्यक्त्वा राशयोऽन्ये नृभाणां
सिंहं तस्याप्येकमन्ये विधेयाः ।
कीटं त्यक्त्वा लोकतोऽन्यत्प्रसिद्धं
वश्यावश्यं नैव तोयालयाश्च ।।२०१।।
नाडीकूटम्-
आवृत्तिभिर्भैस्त्रिभिरश्विभाद्यं
क्रमोत्क्रमात्सङ्गणयेच्च भानि ।
यद्येकपर्वण्युभयोश्च धिष्ण्ये
नेष्टा नृनार्योर्भृशमेकनाडी ।।२०२।।
सा मध्यनाडी पुरुषं निहन्ति
तत्पार्श्वनाडी खलु कन्यकां च ।
आसन्नपर्यायसमागता चे-
द्वर्षेण साप्यन्तरिता त्रिवर्षैः ।।२०३।।
वेधकूटम् -
पूर्वाश्विन्योर्याम्यमैत्राख्ययोश्च
वह्नीन्द्राग्न्योर्वायुतोयेशयोश्च ।
विश्वेन्द्वोर्वै त्वाष्ट्रजाङ्घ्र्योर्हुताश-
विष्ण्वोर्विश्वादित्ययोर्जीववाय्वोः ।।२०४।।
मूलाश्लेषातारयोः पौष्णपित्रो-
र्भाग्यर्क्षाहिर्बुध्न्ययोर्वै विवाहे ।

तोयेशाहिर्बुध्न्ययोराजपादा-
र्यम्णोर्वैरं सर्वदा वर्जनीयम् ।।२०५।।

[३९३]गण्डभूतकूटम् -

दस्रर्क्षतो भानि भवन्ति पञ्च
गणा धराम्ब्वग्न्यनिलाम्बराणाम् ।
पञ्चर्तुभूतर्त्विषुभिः क्रमेण
वैरं जलाग्न्योरितरत्र वृद्धिः ।।२०६।।

लिङ्गम्-

सर्पाच्चतुष्कं वसुवारिरुद्र-
त्वाष्ट्रत्रयं विश्वयमान्त्यशक्राः ।
स्त्रीलिङ्गताराः श्रवणेन्दुमूल-
तारा नपुंसाः पुरुषाः परे स्युः ।।२०७।।
स्वकीयलिङ्गेषु तयोः स्वजन्म-
धिष्ण्येषु संप्रीतिरतीव नित्यम् ।
युद्धं भवेद्व्युत्क्रमलिङ्गव
सामान्यमन्यत्र नपुंसकेषु ।।२०८।।

जातिकूटम्-

विप्रक्षमाधीश्वरविट्चतुर्था
ये पञ्चमाः संकरजाश्च षष्ठाः ।
जातिप्रभेदा इति दस्रभादि-
ऋक्षाण्यपि ब्राह्मणपूर्वकाणि ।।२०९।।
क्रमादजाङ्घ्रित्रितयं च शिष्टं
त्रैवर्णिकानां निखिलानि भानि ।
सम्यग्विचार्यैवमनुक्रमेण
जात्याख्यकूटे च फलं ब्रवीमि ।।२१०।।

---

३९३ व२ भूतबलिकूटम्

प्रीतिर्नृनार्योरतुलैक्यजात्यां
पुंजातितो हीनकुला समा स्त्री ।
स्त्रीजातितो हीनकुलः पुमांश्चे-
द्विलोमजात्यामपि तीव्रवैरम् ।।२११।।

गोत्रकूटम्-

स्युः सप्तगोत्रा भचतुष्टयेन
गजाश्विसंख्याश्विमुखानि भानि ।
मरीचिवासिष्ठमहाङ्गिरोऽत्रि-
पौलस्तिसंज्ञाः पुलहः क्रतुश्च ।।२१२।।
यदैकगोत्रे कलहस्त्वजस्रं
संप्रीतिवृद्धिर्यदि भिन्नगोत्रे ।
एषु प्रधानः खलु गोत्रवर्गः
संचिन्तनीयः सततं नृनार्योः ।।२१३।।

पक्षिकूटम्-

भेरुण्डपिङ्गलककाकसुकुक्कुटानां
बर्ही तथाश्विमुखभानि गणांश्च पञ्च।
बाणर्तुषट्शरशरैः क्रमशो विवाहे
भिन्ने गणे कलहमेकगणे प्रवृद्धिः ।।२१४।।

आयकूटम् ।

आया ध्वजाद्याः क्रमशोऽश्विपूर्व-
भान्यष्टभिर्भैश्च पुनः पुनः स्युः ।
त्रैवर्णिकं भत्रितयं च शिष्टं
प्रद्वेषमेषां खलु पञ्चमेन ।।२१५।।

योगिनीकूटम्-

ब्रह्माणी कौमारी वाराही वैष्णवी च माहेन्द्री ।
चामुण्डा माहेशी श्रीलक्ष्मीश्चाष्टयोगिन्यः ।।२१६।।
पूर्ववदूर्ध्वं सर्वं योगिन्यैक्ये शुभोऽन्यथा त्वशुभः ।

वर्गो मुख्यतरः स्यात्सर्वेषां सर्वदा करग्रहणे ।।२१७।।
पावकदुर्गादिवसौ रविरमरपतिश्च सुरपदिशि ।
धर्मचतुर्मुखदिवसौ भूतनयः पावकश्च वह्निदिशि ।।२१८।।
गिरिसुतशिवदिवसौ वा सुरगुरुः प्रेतपश्च याम्यायाम् ।
गणपतिहरिदिवसौ दिशि रवितनयः कोणपश्च नैर्ऋत्याम् ।।२१९।।
कामभुजङ्गमदिवसावसुरगुरुर्वारिपश्च वारुण्याम् ।
कलिगिरिजात्मजदिवसौ प्रभञ्जनः शीतरुक्च वायव्याम् ।।२२०।।
दिनपतिनिशिपतिदिवसौ दिनपसुतो यक्षराडुदीच्यां च ।
वसुपितृदिवसौ नूनं स्वर्भानुरथ चन्द्रमौलिरैशान्याम् ।।२२१।।
अश्विन्याद्यास्ताराः पर्यायपरैरष्टभिश्च विज्ञात्वा[३९४] ।
दम्पत्योर्दिगधीशग्रहनाथानां तिथीशानाम् ।।२२२।।
मित्रत्वे मित्रत्वं शत्रुत्वे शात्रवं च वैवाहे ।
ज्ञातव्याश्चाष्टादश वर्गाः सम्यक्सदैव विदा ।।२२३।।
मुख्योऽग्रजानां[३९५] ग्रहमित्रवर्गः
क्षमाधिपानां ग्रहसंज्ञकं च ।
विशां प्रधानं वनिता विदूरं
योन्याख्यवर्गं सततं परेषाम् ।।२२४।।
राशिकूटतदधीशमैत्रता-
स्त्रीविदूरगणयोनिनाडिकाः ।
दैवयोगवरगोत्रसमेताः
पाणिपीडनविधौ परिचिन्त्याः ।।२२५।।
मध्यंदिनगते भानौ मुहूर्तोऽभिजिदाह्वयः ।
योऽष्टमः सर्वदोषघ्नस्त्वन्धकारं यथा रविः ।।२२६।।
सूर्याच्चतुर्थं यल्लग्नमभिजित्संज्ञकं तु तत् ।
सर्वदोषं निहन्त्याशु पिनाकी त्रिपुरं यथा ।।२२७।।

---

३९४ चौ. विंज्ञात्वा
३९५ वे. मुख्योऽप्रजानां

सर्वदेशेष्विदं मुख्यं सर्ववर्णेषु सर्वदा ।
सर्वदोषहरं यद्वर्द्धरिरित्यक्षरद्वयम् ।।२२८।।[३९६]
सूर्यात्सप्तमलग्नं यद्गोधूलिकमिति स्मृतम् ।
सर्वदोषहरं यद्वत्पापं गङ्गाजलं यथा ।।२२९।।
गोधूलिकं योगलग्नं भावलग्नं च कल्पितम् ।
गान्धर्वादिविवाहेषु वैश्योद्वाहेषु योजयेत् ।।२३०।।
पुत्रोद्वाहान्नैव पुत्र्याः कदाचि-
दाषण्मासात्कार्यमुद्वाहकर्म ।
ऊर्ध्वं तद्वन्मुण्डनान्मुण्डनं च
प्रत्युद्वाहं नैव पुण्यद्वयं च ।।२३१।।

पितामहः-

निर्गमात्पूर्वतो न प्रवेशः शुभ-
स्तत्र संवत्सरान्तावधिः कथ्यते ।
निर्गमस्त्रीविवाहः पुनः पुंविवाह-
प्रवेशो न वै मण्डनान्मुण्डनम् ।।२३२।।[३९७]
पुत्रीविवाहात्परतः सदैव
शुभप्रदं पुत्रविवाहकर्म ।
पुत्रद्वयं नैव ऋतुद्वयेऽपि
पुत्रीद्वयं वापि कदाचिदेव ।।२३३।।
एकोदरप्रसूतानामेकस्मिन्वत्सरे यदि ।
पाणिग्रहो भवेन्नूनं तत्रैका विधवा भवेत् ।।२३४।।
उद्वाहश्चैकजन्यानां न विधेयो ऋतुत्रये ।

---

३९६ व२ मध्येऽधिकम्- सर्वदेशेषु गोधूलिः सर्ववर्णेषु सर्वदा।
सर्वदोषहरं यद्वद् भास्करस्तिमिरं यथा।।

३९७ व२ मध्ये भिन्नम्-
निगमात्पूर्वतो न प्रवेशः शुभस्तत्र संवत्सरांतो विधिः कीर्तितः।
स्त्रीविवाहः पुनर्निर्गमः कथ्यते पुंविवाहः प्रवेशो मुनींद्रैः स्मृतः।। २६

सोऽपि हन्ति तयोरेकं पक्षमब्दत्रयाद्ध्रुवम् ।।२३५।।
विवाहश्चैकजन्यानामेकस्मिन्नुदये कुले ।[३९८]
नाशं करोत्येव वर्षे स्यादेका विधवाथवा ।।२३६।।
पुत्रोद्वाहान्नैव पुत्रीविवाहोऽपि ऋतुत्रये ।
अब्दान्तरे मुण्डनं च न कदा मुण्डनद्वयम् ।।२३७।।
एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्ययोः ।
पुत्रिकाद्वयमेकस्मै न दद्यातु कदाचन।।२३८।।
नैर्ऋत्यभोद्भूतसुतः सुता वा
क्षिप्रादवश्यं श्वशुरं निहन्ति ।
तदन्त्यपादाज्जनितो निहन्ति
नैवोत्क्रमेणाहिभवः कलत्रम् ।।२३९।।
सुरेशताराजनिता धवाग्रजं
द्विदैवतारजनिता च देवरम् ।
पुरन्दरर्क्षाज्जनितः सुतस्तदा
स्वस्याग्रजं हन्ति न कन्यका यदि ।।२४०।।
महर्षिभिः शास्त्रवितर्कबुद्ध्या
न दूषणीयाः कुलदेशधर्माः ।
तन्मूलमज्ञातसमस्तवेदा-
स्तस्मात्प्रमुख्याः प्रथमं हि तेऽपि ।।२४१।।
जनकं जननीं हन्ति भर्तुर्मूलाहिधिष्ण्यजा ।
मूलान्त्यपादजा नैव तथाश्लेषाद्यपादजा ।।२४२।।
षष्ठाष्टमे वा दशमे दिने वा
विवाहमारभ्य वधूप्रवेशः ।
पञ्चाङ्गसंशुद्धिदिनं विनापि
विधावसद्गोचरगेऽपि कार्यः ।।२४३।।

---

३९८ व२ कुलं नाशनयत्येकवर्षे स्याद् विधवा तथा।

प्रायश्चित्तं चिकित्सां च ज्योतिषं धर्मनिर्णयम् ।
विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकम् ।।२४४।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां विवाहोऽध्यायो द्वात्रिंशः ।।३२।।

३३

२.३३.० राजाभिषेकः

आधानजन्मेशदशाधिनाथ-
    रवीन्दुभौमेज्यसितैर्बलस्थैः ।
उत्पातदोषादिविवर्जितेषु
    धराधिपानामभिषेक इष्टः ।।१।।
मूलत्रिकोणस्वगृहोच्चमित्र-
    गृहस्थितैर्वापि तदंशसंस्थैः ।
शुभे विलग्ने सततं ग्रहेन्द्रा
    दिशन्ति लक्ष्मीं विपुलां च कीर्तिम् ।।२।।
स्वनीचगैर्वैरिगृहोदिगैर्वा
    ह्यस्तङ्गतैर्वक्रमुपागतैर्वा ।
पापोदये शोकभयं त्वकीर्तिं
    दिशन्ति राज्ञां भृशमम्बराटाः[३९९] ।।३।।
शीर्षोदये चोपचये गृहे वा
    स्वजन्मलग्नादथ लग्नगेऽपि ।
शुभग्रहैर्युक्तनिरीक्षिते वा
    पदं स्थिरं स्यात्सततं च राज्ञाम् ।।४।।
रिक्तास्वमायां[४००] बुधभौमवार-
    विवर्जिते वारदिनेषु चैव ।
खले[४०१] दिने ऋक्षनिशीशयोश्च
    न नैधने भे त्वभिषेक इष्टः ।।५।।

---

३९९ व२ भृशमम्वरायाः

४०० व१ ममाया, व२ द्यमाया

४०१ व१,व२ बले

पापग्रहैः स्वान्त्यगतैश्च निःस्वो
रोगी विलग्नोपगतैर्भवेत्सः ।
पदच्युतः सप्तचतुर्थसंस्थैः[४०२]
पुत्रस्थितैः सर्वसुखैर्विहीनः ।।६।।
भ्रष्टोत्सुकः[४०३] कर्मगतैरनायु-
र्मृत्युस्थितैर्वीर्ययुतैश्च पार्थैः ।
लग्नव्ययाष्टारिगतः शशाङ्कः
क्षितीश्वरं हन्ति तदा बली चेत् ।।७।।
[४०४]केन्द्रत्रिकोणत्रिधनायसौम्यै-
स्त्रिषष्ठलाभारिगतैश्च पापैः ।
षष्ठाष्टलग्नव्ययवर्जितेन
चन्द्रेण राज्ञां शुभदोऽभिषेकः ।।८।।
यस्याभिषेके पुरुहूतमन्त्री
लग्ने त्रिकोणे यदि वा भवेत्सः ।
षष्ठे कुजः कर्मगतश्च शुक्रः
स मोदते विक्रमराज्यलक्ष्म्या ।।९।।
दुश्चिक्यलाभारिगता विनार्की
खस्थेऽमरेज्ये यदि बन्धुजे ज्ञे ।
यस्यात्र योगे क्रियतेऽभिषेक-
श्चिरायुषस्त्वस्य पदं स्थिरं स्यात् ।।१०।।
शुभेषु चन्द्रयोगेषु स्वयोगेषु शुभेषु च ।
वज्रयोगेषु यो राजा ह्यभिषिक्तः क्षितीश्वरः ।।११।।
प्राग्भागे मन्दिरस्याथ गोमयेन तु कारयेत् ।
मण्डलं चतुरस्रं तद्वर्णकैः समलङ्कृतम् ।।१२।।

---

४०२ व१ चतुर्थगस्थै, व२ चतुर्थगछैः
४०३ व१ भ्रष्टोधपः, व२ नष्टोवनः
४०४ व२ त्रिकोणकेन्द्र

तत्र भद्रासनं सम्यगर्चयेत्सुमनोहरम् ।
गङ्गातोयसुसम्पूर्णस्वर्णकुम्भोदकैः सह ।।१३।।
दिग्विदिक्षु स्थितैः शुक्लगन्धमाल्याम्बरार्चितैः ।
शतौषधीमूलहेमरत्नसद्वीजपल्लवैः ।।१४।।
मृत्तिका वृषशृङ्गं च गजदन्तं च रोचनम् ।
उत्पलं पद्मकं पद्मं मुस्तरेणुककुङ्कुमम् ।।१५।।
राजसर्षपमुस्तं च देवदारुसमन्वितैः ।
देवस्य त्वेति मन्त्रेण आयुःपुष्टियशस्करैः ।।१६।।
अब्लिङ्गैर्वेदमन्त्रैश्च शुभलग्ने शुभान्विते ।
भद्रासने स नृपतिरभिषेकं च कारयेत् ।।१७।।
नीराजनं च कर्तव्यं शङ्खवादित्रनिःस्वनैः ।
आशिषो वाचनं कृत्वा चार्चयेच्च सुरान्पितॄन् ।।१८।।
आयुधानि च पट्टं[४०५] च विप्रान्गन्धादिनार्चयेत् ।
शुक्लमाल्याम्बरधृतः प्राङ्मुखस्य महीपतेः ।।१९।।
पट्टं शिरसि बध्नीयात्सिंहासनगतस्य च ।
विप्रेभ्यो दक्षिणां दद्यान्मानयेन्मन्त्रपूर्वकम् ।।२०।।
ब्रूयात्प्रत्यङ्मुखो राजा नमामि त्वां धरेति च ।
प्राच्यां मामभिषिञ्चन्तु वसवस्तेजसे श्रियै ।।२१।।
याम्यायामभिषिञ्चन्तु मां रुद्रा विजयाय च ।
आदित्यास्त्वभिषिञ्चन्तु प्रतीच्यां दिशि वृद्धये ।।२२।।
विश्वेदेवास्तथोदीच्यामभिषिञ्चन्तु तुष्टये ।
दिगीशास्त्वभिषिञ्चन्तु मां सदा विजयाय च ।।२३।।
साम्राज्यमिति मन्त्रेण राजानं सम्यगर्चयेत् ।
व्याघ्रचर्मण्यथासीनं नवालङ्कारभूषितम् ।।२४।।

---

४०५ वे.पा. पदं चैव

छत्रचामरसंयुक्तं राज्यचिह्नसमन्वितम् ।
पुरोहितश्च जुहुयात्सावित्र्याग्नौ प्रयत्नतः ।।२५।।
उदुम्बरसमिद्भिश्च आज्येनाष्टोत्तरं शतम् ।
विद्वत्पुरोहितामात्यवृद्धबन्धुसमन्वितैः ।।२६।।
तदा संचिन्त्य सप्ताङ्गं प्रजा धर्मेण पालयेत् ।
एवं यः कुरुते सम्यक्स राजा वर्धते चिरम् ।।२७।।
अभिषेकविधिं चोक्त्वा तदाचारः प्रवक्ष्यते ।
अभिषेकगुणोपेतं राजानं धर्मशीलिनम् ।।२८।।
श्रीमान्कुलीनोऽव्यसनोऽतिशूरः
श्रुतिस्मृतिज्ञः स्मृतिमान्सुदक्षः ।
धर्मस्वरूपी त्वगदस्त्वलुब्धः
शुचिः स्थिरो नीतिपरः सुरूपः ।।२९।।
[४०६]पथ्याभिलाषी निपुणः कलासु
वक्ता सुवेषः प्रियवाक्कृतज्ञः ।
वृद्धोपसेवी गुणवान्गभीरः
स्वरन्ध्रगोप्ता पररन्ध्रवेत्ता ।।३०।।
दाता सहिष्णुर्विजितेन्द्रियश्च
मानी सुसप्ताङ्गयुतो विनीतः ।
उत्साहमन्त्रः प्रभुशक्तियुक्त-
श्चतुर्विधोपाययुतस्त्वभीतः ।।३१।।
पञ्चाङ्गमन्त्रे कुशलः प्रगल्भः
षाड्गुण्यवृन्दे विजयी सदा सः ।
पञ्चाङ्गमन्त्रे त्वथ षड्गुणानां
नामानि वक्ष्ये च पृथक् पृथग्वै ।।३२।।
आद्योपायः सुप्रारम्भस्त्वर्थाप्तिर्गुणपूर्णता ।

---

४०६ व२ तथाभिलाषी

देशकालविभागश्च विनिपातविचारणम् ।।३३।।
स्वकार्यसिद्धिरित्येवं मन्त्रः पञ्चाङ्गसंज्ञकः ।
सामभेदप्रदानाख्या दण्डोपायश्चतुर्विधः ।।३४।।
सन्धिविग्रहयानाख्यद्वैधीभावसमन्वितः ।
संश्रयश्चेति नीतिज्ञैः षड्गुणाः परिकीर्तिताः ।।३५।।
एवं लक्षणसम्पूर्णः सेव्यः सेवकसज्जनैः ।
वृद्धविद्वज्जनामात्यैः सर्वदा परिसेवितः ।।३६।।
[४०७]सप्तभिरुदयात्सर्वं चिन्तयेदात्मनो हितम् ।
गीततूर्यरवैः सार्धं त्यजेच्छय्यां नृपोत्तमः ।।३७।।
[४०८]शृण्वन्मङ्गलवाक्यानि गृहान्निर्गत्य वीक्षयेत् ।
गोहेमाग्निद्विजघृततोयसूर्यधराधिपान् ।।३८।।
मौनी मूत्रपुरीषे तु ततः कुर्यादुदङ्मुखः ।
गन्धलेपक्षयकरं शौचं कुर्याद्विधानतः ।।३९।।
प्राङ्मुखोदङ्मुखो भूत्वा दन्तधावनमाचरेत् ।
वितस्तिदीर्घकाष्ठेन सत्वगापाटितेन च ।।४०।।
शिरीषलोध्रपनसनिम्बजम्बूकदम्बकैः ।
कुटजाङ्कोलबकुलैर्लक्ष्मीवृद्धिर्भवेत्सदा ।।४१।।
भाण्डीरकरवीराम्लैर्नीपक्रमुकदाडिमैः ।
करञ्जकोविदारार्कैरन्नवृद्धिर्भवेदिह ।।४२।।
अपामार्गवटप्लक्षखदिरोदुम्बरार्जुनैः ।
बिल्वपुन्नागककुभैरायुर्वृद्धिर्भवेद्ध्रुवम् ।।४३।।
श्रीखण्डचम्पकाम्बष्ठनारिकेलविभीतकैः ।
कङ्कुष्ठशालनारङ्गनिचुलैरतुलं यशः ।।४४।।
पालाशाश्वत्थजम्बीरमातुलुङ्गकुलाम्बकैः ।
अगस्तितालहिन्तालकङ्ककाष्ठैश्च निस्वता ।।४५।।

---

४०७ व१,व२ त्यक्तनिद्रोदयात्पूर्वं

४०८ व२ भगवन्

तन्त्रणीकशमीवेणुमध्वामलकवञ्जुलैः ।
विकङ्कतव्याघ्रपादसर्जकृष्णैर्यशःक्षयः ॥४६॥
हरीतकीविष्ठिनागकेतकोद्दालतापसैः ।
कार्पासाटकिवागूचीबलाश्लेष्मान्तकैर्गदा : ॥४७॥
भल्लातको देवादारुर्मर्दयन्तीक्षुबालकैः ।
त्रिणाङ्गुलाश्मलोहाद्यैः शत्रुभ्यः साध्वसं ततः ॥४८॥
शृण्वन्हरिकथालापान्संध्यादिनियमं चरेत् ।
राजसर्षपदूर्वेभदानतीर्थाम्बुमृत्तिकाः ॥४९॥
धारयित्वा सहेमाज्यावेक्षणं दर्पणेऽपि वा ।
नत्वा देवद्विजगुरून्दद्याद्गां वत्ससंयुताम् ॥५०॥
लब्ध्वा तेभ्यः स्वस्तिवाक्यं तिथिश्रवणपूर्वकम् ।
कुर्याद्वचांसि भिषजां सम्यग्ज्ञाप्य तनुःस्थितिम् ॥५१॥
शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः ।
भृत्यशिष्टाप्तकाव्यज्ञैर्मन्त्रिनैयायिकैः सह ॥५२॥
सभां प्रविश्य राज्याभिवृद्धिं धर्मेण चिन्तयेत् ।
ततो माध्याह्निकं कृत्यं कृत्वा ग्रसनपूर्वकम् ॥५३॥
पुत्राद्यैः सह भुञ्जीत शृण्वन्गाथां हरीशयोः ।
इष्टालापांश्च निर्वर्त्य गजाश्वादींश्च वीक्षयेत् ॥५४॥
सायं संध्यादिकं कृत्वा सभां प्राग्वत्प्रवेशयेत् ।
ततो राज्ञो विलासिन्यः कुर्यात्संध्याबलिक्रियाम् ॥५५॥
तैजसेषु[४०९] च पात्रेषु नैकस्मिन्नथ वा त्रिषु ।
तत्तद्राज्यानुसारेण पञ्चस्वपि च सप्तसु ॥५६॥
तेषु कार्यान्यष्टदलपद्मान्यन्यैर्विचित्रितैः ।
दलेषु कर्णिकायां च दीपैर्बहुभिरुज्ज्वलैः ॥५७॥
नीराजयेद्रक्षमन्त्रैः सह मङ्गलपाठकैः ।

---

४०९ व२ तेजसेषु चैकस्मिन्नथवा

पूर्ववच्चिन्तयेद्राज्यं प्रेषयेद्गुप्तचारकान् ।।५८।।
अन्तःपुरं संप्रविशेन्नियम्य त्वङ्गरक्षकान् ।
तासां मनोरथान्कृत्वा प्राग्वृत्तं समनुस्मरेत् ।।५९।।
एवं समाचरेन्नित्यं सदा सत्कीर्तिमाप्नुयात् ।
तस्मात्सर्वप्रयत्नेन राज्यं धर्मेण पालयेत् ।।६०।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां राजाभिषेकाध्यायस्त्रयस्त्रिंशः ।।३३।।

३४

२.३४.० अश्वारिष्टशान्तिः

भूपतेर्यस्य सन्त्यश्वाः स एव विजयी रणे ।
श्रीमान्स एव तस्माद्धि कार्यमश्वाभिरक्षणम् ।।१।।
सूर्ये स्वात्यर्क्षसंयाते जायन्ते बहवो गदाः ।
यदा यदा रोगजननमश्वानामथवा तदा ।।२।।
सलोकपालहेरम्बपूजां होमं च कारयेत् ।
भानुवारे च संक्रान्तावयने विषुवद्द्वयोः ।।३।।
दिनक्षये व्यतीपाते द्वादश्यामश्वभेऽपि वा ।
ऐशान्यामष्टभिर्हस्तैश्चतुर्भिर्वाथ मण्डपम् ।।४।।
चतुर्द्वारं वितानस्रक्तोरणाद्यैरलंकृतम् ।
तन्मध्ये वेदिकां तस्य पञ्चविंशतिमानतः ।।५।।
मण्डपस्य बहिः कुण्डं प्राच्यां पूर्वोक्तलक्षणम् ।
वरयेत्पूर्ववद्विप्रान्स्वस्तिवाचनपूर्वकम् ।।६।।
सूर्यपुत्रं हयारूढं पञ्चवक्त्रं दशाम्बकम् ।
रक्तवर्णं कशाखण्डं रेवन्तं द्विभुजं स्मरेत् ।।७।।
सूर्यपुत्र नमस्तेऽस्तु नमस्ते पञ्चवक्त्रक ।
नमो गन्धर्वदेवाय रेवन्ताय नमो नमः ।।८।।
मन्त्रेणानेन रेवन्तं गन्धवस्त्राक्षतादिभिः ।
विधिवद्वेदिकामध्ये तण्डुलोपरि पूजयेत् ।।९।।
परितः स्वस्वमन्त्रैस्ताँल्लोकपालांश्च पूजयेत् ।
प्राग्वद्द्विजाः पञ्च षड् वै रेवन्तस्य समीपतः ।।१०।।
ऋग्वेदादिचतुर्वेदाञ्जपेद् द्वारेषु पूर्वतः ।
पूर्णकुम्भान् रक्तवर्णान् गन्धवस्त्राद्यलंकृतान् ।।११।।
पञ्चत्वक्पल्लवोपेतानष्टमृद्भिः सुसंयुतान् ।

द्वारेषु स्थाप्य चाब्लिङ्गमन्त्रैः कार्यं [410]समर्चनम् ।।१२।।
रेवन्तपूजामाचार्यः कृत्वा गृह्यविधानतः[411] ।
स्थापयेत्तं व्याहृतिभिस्तस्मिन्कुण्डे हुताशनम् ।।१३।।
ततस्तत्राज्यभागान्ते मुखाहुतिमतन्द्रितः ।
अग्नये स्वाहेति हुत्वा घृतेनादौ प्रयत्नतः ।।१४।।
रेवन्तपूजामन्त्रेण आद्यन्तप्रवणेन च ।
पलाशसमिधाज्यान्नैः पृथगष्टोत्तरं शतम् ।।१५।।
आचार्यो जुहुयाद् व्रीहींस्तिलान् व्याहृतिभिस्ततः ।
एकरात्रं त्रिरात्रं वा नवरात्रमथापि वा ।।१६।।
अनेन विधिना कुर्यादेकभुक्तो जितेन्द्रियः ।
जपादिपूर्वकं सम्यक्कर्ता पूर्णाहुतिं हुनेत् ।।१७।।
ततो मङ्गलघोषैश्च नैवेद्यं च समर्पयेत् ।
ततस्तद्धुतशेषेण सह कुम्भोदकेन च ।।१८।।
प्रदक्षिणां व्रजन्त्यश्वान्सुप्रीतो बलिमुत्तमम् ।
जीमूतस्येत्यनूवाकान् चतुरो दिक्षु निक्षिपेत् ।।१९।।
आचार्याय ततो दद्याद् दक्षिणां गोचतुष्टयम् ।
तदर्धं वा तदर्धं वा यथावित्तानुसारतः ।।२०।।
ब्राह्मणेभ्यो जापकेभ्यस्त्वाचार्यार्धं प्रदापयेत् ।
ब्राह्मणान्भोजयेत्पश्चाच्छान्तिवाचनपूर्वकम् ।।२१।।
एवं यः कुरुते सम्यगश्वशान्तिमनुत्तमाम् ।
मुच्यते सर्वरोगेभ्यो वर्धन्ते नात्र संशयः ।।२२।।
ऐश्वर्यं वीरलक्ष्मीं च लभते सर्वदा नृपः ।
तस्मात्सर्वप्रयत्नेन त्विमां शान्तिं समाचरेत् ।।२३।।

---

४१० व२ समर्चन

४११ वे. अवधानतः

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायामश्वारिष्टशान्त्यध्यायश्चतुस्त्रिंशः ।।३४।।

३५

२.३५.० गजारिष्टशान्तिः

यस्य राज्ञो गजाः सन्ति तदधीनाखिला धरा ।
तस्माद्गजाः कल्पनीयाः पोषणीयाश्च सर्वदा ।।१।।
कल्पनं[४१२] पोषणं तेषां गजवक्त्रप्रसादतः ।
तस्माद्गजाननो राज्ञां पूजनीयः प्रयत्नतः ।।२।।
तस्मिन् सम्पूजिते प्रीता ब्रह्मविष्णुमहेश्वराः ।
इन्द्रादिलोकपालाश्च वस्वादित्यमरुद्गणाः ।।३।।
सुरासुरा ग्रहाः सर्वे गन्धर्वोरगराक्षसाः ।
सिद्धविद्याधरा यक्षपिशाचाः सप्तमातृकाः ।।४।।
वेतालडाकिनीभूता दिशन्त्वपि मनोरथान् ।
गजाननो गजपतिर्गजसूक्तं जपेत्सदा ।।५।।
असावेव प्रभुस्तेषां पोषणे शोषणे सदा ।
पुरा महेश्वरो देव उक्तवानस्य जन्मनि ।।६।।
यदा यदा गजानां च जायन्ते व्याधयस्तदा ।
तदा शान्तिं प्रकुर्वन्ति पूजाहोमजपादिभिः ।।७।।
[४१३]भानुवारे च संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
विषुवत्ययने चैव व्यतीपाते दिनक्षये ।।८।।
अन्ये च पुण्यदिवसे चन्द्रताराबलेष्वपि ।
दिक्साधनं समभुवि चैशान्ये च सुरालये ।।९।।
मध्याद्विनिर्गतैः सूत्रैश्चतुरस्रं च कारयेत् ।
मण्डपं त्वष्टभिर्हस्तैः सूत्रमार्गेण कारयेत् ।।१०।।
चतुःषष्टिदलं कृत्वा मण्डपान्तःक्षमातलम् ।

---

४१२ व२ कल्पते
४१३ व२ भावारे

मध्ये चतुष्पदं व्योममण्डलं वेदिकास्थलम् ।।११।।
द्वादशांशात्मकं वायुमण्डलं व्योमवेष्टितम् ।
विंशांशकात्मकं वह्निमण्डलं व्योमवेष्टितम् ।।१२।।
निखिलान्मण्डलान्वेष्ट्य महीमण्डलमास्थितम्[४१४] ।
ज्ञात्वाग्निमण्डलं तत्र दिक्षु कुण्डचतुष्टयम् ।।१३।।
प्राग्रेखामध्यमं कुण्डं द्वारं चैकांशमानतः ।
तथैव कुण्डद्वारं च शेषदिक्षु प्रकल्पयेत् ।।१४।।
पूर्वोक्तलक्षणोपेतं मेखलावप्रसंयुतम् ।
तोरणाद्यैरलङ्कृत्य वितानं वेदिकोपरि ।।१५।।
आशिषो वाचनं कुर्यात्सम्यक्संकल्पपूर्वकम् ।
ऋत्विजो वरयेत्पश्चाच्चतुर्विंशतिसंख्यकान् ।।१६।।
विद्यातपोव्रतयुतान्विधिज्ञान्कुशलाञ्छुभान् ।
तेषां मध्ये शिष्टतममाचार्यं तं प्रकल्पयेत् ।।१७।।
मधुपर्कादिकं कुर्यात्तत्र कार्ये नियोजयेत् ।
ब्राह्मणांश्चतुरो होतॄन्कुण्डेषु च [४१५]नियोजयेत् ।।१८।।
द्वारेषु जापकानष्टौ षट्संख्यानङ्गजापकान् ।
गन्धपुष्पादिकं दत्त्वा तत्तत्कार्ये नियोजयेत् ।।१९।।
ब्राह्मणाँस्तत्त्वसंख्याकान्[४१६] भोजयेच्च यथाविधि ।
कारयेत्तु सुवर्णेन गजवक्त्रं चतुर्भुजम् ।।२०।।
अक्षमालाधरं चाब्जबीजदण्डधरं क्रमात् ।
वाहनायुधवर्णादीन्सर्वेषां कथितं पुरा ।।२१।।
तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयाद् वामदेवाह्वयो ऋषिः ।।२२।।

---

४१४ व१ आच्छित, व२ आस्छिते
४१५ व२ प्रयोजयेत्
४१६ व१ ब्रह्मणः पञ्च विप्रांश्च योजयेच्च, व२ ब्राह्मणान्पञ्च विप्रांश्च योजयेच्च

छन्दोऽसौ तत्र गायत्री गजवक्त्रो हि देवता ।
कुम्भाष्टकं चतुर्द्वारि पूर्वोक्तद्रव्यसंयुतम् ॥२३॥
लिखेदष्टदलं पद्मं वेदिकां तण्डुलोपरि ।
गजवक्त्रं कर्णिकायां लोकपालान्दलेषु च ॥२४॥
गणेशशक्रयोर्मध्ये पद्ममष्टदलं लिखेत् ।
आदित्यादिग्रहांस्तत्र पूजयेत्पूर्ववत्क्रमात् ॥२५॥
गणेशयमयोर्मध्ये पञ्चकोणं प्रकल्पयेत् ।
तत्र पञ्चमहाभूतानर्चयेत्पूर्ववत्तदा ॥२६॥
गणेशाम्बुपयोर्मध्ये वर्तुलं मण्डलं लिखेत् ।
तत्रार्चयेदष्टभुजां महिषासुरमर्दिनीम् ॥२७॥
गणेशसोमयोर्मध्ये मण्डले वर्तुलं लिखेत् ।
तत्रार्चयेत्प्रयत्नेन चाश्विनीदेवताह्वयम् ॥२८॥
ऐशान्यामर्चयेद्रुद्रमण्डलं तेजसां निधिम् ।
आग्नेय्यामर्चयेद्विष्णुमण्डलं हाटकात्मकम् ॥२९॥
वेदात्मकं च नैर्ऋत्यामर्चयेद् ब्रह्ममण्डलम् ।
वायव्यामर्चयेत्सम्यङ्मण्डलं [४१७]प्रणवात्मकम् ॥३०॥
[४१८]रुद्रेण पुरुषसूक्तेन चतुर्वेदादिमन्त्रकैः ।
प्रवणस्य ऋषिच्छन्दो देवताः कथिताः पुरा ॥३१॥
तत्तद्वर्णैर्गन्धपुष्पैर्वस्त्रधूपैश्च दीपकैः ।
सम्यक्कृत्वोपचाराणि रक्तवस्त्रैर्गजाननम् ॥३२॥
प्राक्कुण्डं गजवक्त्रस्य पञ्चभूतात्मकं ततः ।
दुर्गाकुण्डं प्रतीच्यां च ह्युदक्कुण्डं ग्रहात्मकम् ॥३३॥
तदेवाश्विनकुण्डं च ग्रहहोममतः परम् ।
दिक्कुण्डैर्दिक्षु दिग्घोमः कर्तव्यः स्वस्वमन्त्रकैः ॥३४॥
स्वगृह्यविधिना कुण्डे स्थापयेच्च हुताशनम् ।

---

४१७ व१ प्रणवात्मक, व२ ते परमात्मकं
४१८ व२ रुद्रेण शब्दस्य लोपः

मुखान्ते स्वस्वकुण्डे च जुहुयात्तन्मुखाहुतिम् ।।३५।।
पलाशसमिधाज्यान्नैः पृथगष्टोत्तरं शतम् ।
ग्रहमंत्रैः[४१९] समिद्भिश्च होमं पूर्ववदाचरेत् ।।३६।।
चतुर्दिक्षु चतुर्वेदपारायणपरा द्विजाः ।
अब्लिङ्गैर्वारुणैः सूक्तैः कलशार्चनपराश्च ते ।।३७।।
नैवेद्यं विविधान्नेन बहुवाद्यैः समर्चयेत् ।
ताम्बूलानि ततो दद्याच्छान्तिवाचनपूर्वकम् ।।३८।।
एकरात्रं त्रिरात्रं वा नवरात्रमथापि च ।
अनेन विधिना कुर्यादेकभक्तो जितेन्द्रियः ।।३९।।
तिलहोमं व्याहृतिभिः सहस्रं चाष्टसंयुतम् ।
एवं प्रतिदिनं सम्यग्व्रीहिभिश्च यथा पुरा ।।४०।।
सम्पूर्णदिवसे कर्ता कुर्यात्पूर्णाहुतिं ततः ।
मन्त्रपूतोदकैः कर्ता गजानां मार्जयेत्ततः ।।४१।।
अलंकृत्य पुनः सम्यग्गन्धपुष्पादिभिस्ततः ।
हुतशेषं ततो दद्यादौपनायनिकं गजे ।।४२।।
दोषशान्तिपञ्चदुर्गां रुद्रं पुरुषसूक्तकम् ।
पञ्चब्रह्मादिभिर्मन्त्रैर्गजशालासु मार्जयेत् ।।४३।।
गृहीत्वा सुकृतं तेभ्यो दक्षिणां च समर्पयेत् ।
आचार्याय ततो दद्यान्निष्कानामेकविंशतिम् ।।४४।।
तदर्धमितरेभ्यश्च यजेच्छेषान्स्वशक्तितः ।
ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ।।४५।।
एवं यः कुरुते सम्यग्गजशान्तिं नृपोत्तमः ।
सर्वान्कामानवाप्नोति गजवृद्धिं लभेत्तु सः ।।४६।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां गजशान्त्यध्यायः पञ्चत्रिंशः ।।३५।।

---

४१९ वे. चौ. ग्रहहोमैः

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

३६
२.३६.० ग्रहणशान्तिः

यस्य वै जन्मनक्षत्रे ग्रस्येते शशिभास्करौ ।
तस्य व्याधिभयं घोरं जन्मराशौ धनक्षयः ।।१।।
द्रव्यमन्त्रविधानेन तस्य दोषापनुत्तये ।
उपरागस्नानविधिं सम्यग्वक्ष्ये समासतः ।।२।।
मण्डलं चतुरस्रं तु गोमयेन विलेपयेत् ।
गृहस्येशानभागे तु वर्णकैः समलंकृतम् ।।३।।
स्थापयेच्चतुरः कुम्भांस्तत्र तान्सागरात्मकान् ।
सर्वदेवात्मकान्स्मृत्वा सर्वतीर्थात्मकाञ्छुभान् ।।४।।
पञ्चत्वक्पल्लवोशीरशतौषधिसमन्वितान् ।
मृत्तिकारत्नहेमेभदन्तगुग्गुलुचन्दनैः ।।५।।
पञ्चगव्यामृतभ्राजत्स्फटिकैः सर्षपाम्बरैः ।
शङ्खकुङ्कुमतीर्थाम्बुरोचनैः पद्मकैर्युतान् ।।६।।
चत्वारः प्राङ्मुखा विप्राः प्रार्थयेयुः पृथक्पृथक् ।
अब्लिङ्गैर्वारुणैः सूक्तैः स्वस्तिवाचनपूर्वकम् ।।७।।
तिलहोमं व्याहृतिभिः सहस्रं चाष्टसंयुतम् ।
एवं कृत्वा प्रयत्नेन स्नानकर्म समाचरेत् ।।८।।
आमन्त्र्य नवभिर्मन्त्रैः कुम्भान्संकल्पपूर्वकान् ।
एतानेव ततो मन्त्रान्स्वर्णपट्टे ततो लिखेत् ।।९।।
कर्तुः शिरसि तान्बद्ध्वा वाब्लिङ्गैर्वेदमन्त्रकैः ।
सुमन्त्रितैः कुम्भजलैः स्नाप्य नीराजयेत्ततः ।।१०।।
दद्यात्पट्टं ग्रहज्ञेभ्यः शुक्लमाल्याम्बरः शुचिः ।
ऋत्विग्भ्यो दक्षिणां दद्याच्छिष्टेभ्यश्च स्वशक्तितः ।।११।।
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ।

सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु ।।१२।।[४२०]
चतुःशृङ्गः सप्तहस्तस्त्रिपादो मेषवाहनः ।
अग्निश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।।१३।।
मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ।
चन्द्रोपरागसम्भूतामग्निः पीडां व्यपोहतु ।।१४।।
यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः ।
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।।१५।।[४२१]
रक्षोगणाधिपः साक्षात्प्रलयानलसन्निभः ।
खड्गव्यग्रोऽतिकायश्च रक्षःपीडां व्यपोहतु ।।१६।।
नागपाशधरो देवः सदा मकरवाहनः ।
वरुणोऽम्बुपतिः साक्षाद् ग्रहपीडां व्यपोहतु ।।१७।।
प्राणरूपो हि यो लोकान्याति कृष्णमृगप्रियः ।
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।।१८।।
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ।
चन्द्रोपरागकलुषं पीडां चापि व्यपोहतु ।।१९।।
योऽसाविन्दुधरो रुद्रः पिनाकी वृषवाहनः ।
चन्द्रोपरागपापानि स नाशयतु शङ्करः ।।२०।।
त्रैलोक्ये यानि भूतानि चराणि स्थावराणि च ।
ब्रह्मार्कविष्णुयुक्तानि तानि पापं दहन्तु मे ।।२१।।
आमन्त्रणे लेखकोक्तास्त्वेते वै नवमन्त्रकाः ।
अर्चयित्वा पितृन्देवान्गोभूस्वर्णाम्बरादिभिः ।।२२।।
अनेन विधिना यत्नाद् ग्रहस्नानं समाचरेत् ।
न तस्य ग्रहपीडा वा न च बन्धुधनक्षयः ।।२३।।

---

४२० व२ मध्ये श्लोकक्रमांकस्य १२ अनन्तरमधिकम् –
मुखं यः सर्वदेवानां सत्यार्धिरश्मिताचंडोपरागसंभूताम्ग्निः पी.।।१३
४२१ व२ – १४,१५ पूर्णश्लोकानां लोपः

परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ।
सूर्यग्रहेऽप्येवमेव सूर्यनाम्ना विधीयते ।।२४।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां ग्रहणशान्त्यध्यायः षट्त्रिंशः ।।३६।।

३७

२.३७.० यात्राध्यायः

निखिलगुणयुतस्य राज्ञां कथयामि विधानमत्र यात्रायाः ।
जातकमवलोक्य तदेत्फलसिद्धिस्त्वन्यथा मृषा भवति ।।१ ।।
अज्ञातजातकानामपि यात्रां प्रवदेन्निमित्तशकुनाद्यैः ।
शुभशकुनैः शुभदा स्यादशुभैरेतैस्तदन्यथा भवति ।।२ ।।
परविषयविजयार्थं गन्तुर्वा समरयात्राख्या ।
निखिला परयात्रा या सामान्या भुवि भवेद् द्विविधा ।।३ ।।
कथिततिथिवासरर्क्षेष्वभिमतफलदा भवेच्च सामान्या ।
समराह्वया च यात्रा योगविलग्नक्षितीशयोगेषु ।।४ ।।
प्रच्छकविलग्नसमये शकुननिमित्तैः शुभावहं वाच्यम् ।
अक्षतफलताम्बूलकरः प्रणम्य दैवज्ञमथ पृच्छेत् ।।५ ।।
[४२२]राज्ञोपकरणवाहनमङ्गलवाक्यादिमङ्गलैर्घोषैः ।
सितवस्त्रपुष्पगन्धश्रुतिघोषाम्बुजेक्षुफलरत्नैः ।।६ ।।
वत्सयुता गोवनिता ज्वलितानलपूर्णकुम्भदुग्धैश्च ।
दधिमधुपिशिताज्योदनवेश्यावृषमद्यभूषणैर्जयदा ।।७ ।।
स्तनचरणगलोष्ठाङ्गुष्ठहस्तोत्तमाङ्ग-
श्रवणवदननासागुह्यरन्ध्राणि भूयः ।
स्पृशति यदि कराग्रैर्गण्डकाद्यंसकं वा
समरभुवि तदानीं शत्रुसेनां निहन्ति ।।८ ।।
प्रच्छकयात्रासमये शकुनं प्रास्थानिकं भवति ।
स्वगृहं पुनरागमने प्रवेशशकुनं जयप्रदं नृपतेः ।।९ ।।
तृणतुषफणिचर्माङ्गारकार्पासपङ्कै-
र्लवणगुडवसास्थिक्लीबतैलौषधैश्च ।

---

४२२ व१ राजोपकरण

रिपुविडसितधान्यव्याधिताभ्यक्ततक्रैः
पतितजटिलमुण्डोन्मत्तवान्तैर्न सिद्धिः ।।१०।।
प्रच्छकलग्नादशुभो निधनगो वा विलग्नगः प्रबलः ।
गुरुसितदृष्टिविहीनः प्रभङ्गदो [४२३]वा निधनदोऽपि ।।११।।
शुभखचरस्त्वशुभो वा वक्रगतो लग्नगो यदा भवति ।
लग्नगतस्तद्वर्गः प्रभङ्गदो भवति[४२४] भूमिपतेः ।।१२।।
प्रच्छकनिधनविलग्नं लग्नगतं वापि नैधनोपगतम् ।
तत्पतिरष्टमगो वा यदि लग्नगतः प्रभङ्गदः शीघ्रम् ।।१३।।
प्रच्छकलग्नाद्धिमगुर्निधनगतो वारिराशिगो वापि ।
शुभखचरदृष्टिहीनः प्रभङ्गदो नैव निधनराशिस्थः ।।१४।।
शुभखचरस्त्वेको वा विलग्नगस्तुङ्गराशिगो वा चेत् ।
जयति तदारिचक्रं स्वराशिगो वाधिमित्रगेहस्थः ।।१५।।
शुभखचरौ द्वौ बलिनौ प्रच्छकलग्नस्थितौ यदा भवतः ।
बहुविधलाभं विजयं कुरुतस्त्वतिशीघ्रमादिशेत्प्रष्टुः ।।१६।।
वलक्षपक्षे प्रतिपत्प्रयाणे
भङ्गप्रदा वा निधनप्रदा वा ।
यातुर्मनोभीष्टकरा द्वितीया
सम्पूर्णयात्राफलदा तृतीया ।।१७।।
तिस्रोऽपि रिक्तास्तिथयः प्रयातु-
र्मृत्युप्रदाश्चार्थविनाशदा वा ।
यशस्करी भूरिधनप्रदा च
या पञ्चमी मृत्युकरी च षष्ठी ।।१८।।
सप्तमी विजयदा तथाष्टमी
शोकदुःखभयदामयप्रदा ।

---

४२३ व१ निधनदो भवति
४२४ व२ लग्नगो वापि

सर्वदु:खशमनी यशस्करी
लाभदा च दशमी निरन्तरम् ।।१९।।
पशुप्रदा मानकरी सुगन्ध-
रक्ताम्बरानेकशुभप्रदा स्यात् ।
एकादशी चित्रमृगप्रभूत-
धान्याकराद्युत्तमवस्तुदा स्यात् ।।२०।।
भूरिभूतिनाशिनी भूरिधर्महारिणी ।
भूरिभीतिदायिनी द्वादशी प्रभङ्गदा ।।२१।।
त्रयोदशीसुभोगदा विपक्षपक्षनाशिनी ।
विनाशदाथ पूर्णिमा यश:क्षयं करोति वा ।।२२।।
सितेतराद्यवासरो विभूतिसौख्यभोगद: ।
सितेतरे जघन्यके फलप्रदाश्च वासरा: ।।२३।।
सुरेज्यदैत्येज्यशशीन्दुजानां
वाराश्च वर्गा शुभदा: प्रयाणे।
आदित्यभूसूनुशनैश्चराणां
वाराश्च वर्गा न शुभप्रदा: स्यु: ।।२४।।
पौष्णद्वयादित्यकरेज्यमित्र-
विष्ण्विन्दुवस्वाह्वयभानि यानि ।
श्रेष्ठानि यात्रासु नवैव तानि
मुक्त्वा त्रिपञ्चादिमसप्तभानि ।।२५।।[४२५]
तिस्रोत्तरा वारुणनैर्ऋतेन्द्र-
पूर्वात्रयब्राह्मदशैव भानि ।
मध्यानि कष्टान्यनिलानलेश-
द्विदैवचित्राहिमघान्तकानि ।।२६।।
पुरुहूतदिशं पुरन्दरर्क्षे नेयाद्याम्यदिशं त्वजाङ्घ्रिधिष्ण्ये ।

४२५ व२ भेद: - नरेश्वराणां शुभदानि यानि। मुञ्च त्रिंपमसयनाश

जलनाथदिशं पितामहर्क्षे शूलाख्यानथ सौम्ययमर्क्षे ।।२७।।
तुहिनकिरणमन्दवारे शक्रदिशं न च व्रजेद्गुरौ च याम्याम् ।
रविसितदिने प्रतीच्यां सौम्यदिशं ज्ञारयोश्च वारशूलाः स्युः ।।२८।।
मेषादिमीनपर्यन्तं पश्चिमादिप्रदक्षिणम् ।
चन्द्रकण्टकमित्याहुर्गमनं कार्यनाशनम् ।।२९।।
शूलाख्यानि च धिष्ण्यानि शूलसंज्ञाश्च वासराः ।
यायिनां मृत्युदाः शीघ्रमथवाश्वादिहानिदाः ।।३०।।
पूर्वादिषु चतुर्दिक्षु वह्निधिष्ण्यान्निरन्तरम् ।
सप्त सप्त क्रमेणैव दिग्द्वाराख्यानि भानि वै ।।३१।।[४२६]
न लङ्घ्यः परिघो दण्डस्त्वाग्नवायुदिगाश्रितः ।
पुष्यार्काश्विनमैत्राणि सर्वदिग्द्वारकाणि च ।।३२।।
सर्वदिक्ष्वपि [४२७]यातॄणां सर्वकामार्थदानि च ।
पूर्वादिदिक्षु मेषाद्याः क्रमाद्दिग्द्वारराशयः ।।३३।।
सर्वदिक्षु प्रशस्तोऽपि पुष्यः सर्वार्थसाधकः ।
प्रतीच्यां गमने त्याज्यः सौख्यसंपदमिच्छता ।।३४।।[४२८]
दिग्द्वारराशयः सर्वे तद्दिग्यातुर्जयप्रदाः ।
तद्वर्गाश्च तदंशाश्च लग्नाधिपस्तथाविधः ।।३५।।
एकोऽपि चक्रगः खेटो लग्नस्थश्चारिराशिगः ।
नीचस्थो वा तदंशस्थो यात्राकाले विनाशदः ।।३६।।
यात्रायां यस्य वा शुक्रः संमुखो दक्षिणस्थितः ।
करोति बहुधा नाशं बुधश्चेन्निधनप्रदः ।।३७।।
दिगीश्वरा भास्करशुक्रभौम-
राह्वार्किचन्द्रज्ञसुरार्चिताः स्युः ।

---

४२६ व१ प्रथमपङ्क्तिर्भिन्ना-पूर्वाग्निकाष्ठयोर्वह्निधिष्ण्यात्सप्तपरासु च ।
व२ – पूर्वादिकाष्ठयोर्वह्निधिष्ण्यात्सप्त परासु च ।
४२७ व२ नृणां
४२८ व१,व२ श्लोकलोपः

दिगीश्वरे यत्र ललटसंस्थे
यात्रा न कार्या न च सन्निवेशः ।।३८।।
राशीनेकं द्वाविनाक्रान्तराशे-
रप्रादक्षिण्यान्न्यसेद्दिग्विदिक्षु ।
यद्दिग्राशौ लग्नगे संमुखत्वे
तद्दिग्यातुर्मृत्युदस्तद्दिगीशः ।।३९।।
प्रयाणसमये यस्य विद्युन्नीहारवृष्टयः ।
अकालजा भवन्त्येते सदा भङ्गकरा भृशम् ।।४०।।
शुभाशुभनिमित्तानि ह्युत्पातशकुनानि च ।
यात्राकाले नृणां तेषां निधनायाधनाय च ।।४१।।
वस्तूनां च शुभानां च पूर्वोक्तानां च वीक्षणम् ।
प्रयाणसमये यस्य तस्य भङ्गो भवेत्तदा ।।४२।।
यात्रायां शकुनं यस्य यदि प्रावेशिकं भवेत् ।
शोकदुःखं भवेत्तस्य गदो भवति निश्चयात् ।।४३।।
पूर्वं प्रवेशिकं भूत्वा पश्चात्प्रास्थानिकं भवेत् ।
सुखेन सिद्ध्यते कार्यं विपरीतं प्रवेशने ।।४४।।
शस्ता वाग्वामभागे शिवगुरुरुरुच्छुच्छुन्दरीकुम्भकाक-
स्वर्णाक्षीणां प्रयाणे विहगगणपतिर्दक्षिणाः क्षीरवृक्षाः ।
कृष्णादन्यच्चतुष्पादटति शुभकरो दक्षिणाद्वामभागे
व्यस्तं सर्वं प्रवेशे खरदिनविदृशोः पूर्ववद्वाक्प्रशस्ता: ।।४५।।
चाषबभ्रुभरद्वाजाश्छागो बर्ही तथैव च ।
एतेषां दर्शनात्सिद्धिर्विजयश्च प्रदक्षिणात् ।।४६।।
अर्चास्त्वभिमुखं यान्ति च्छत्रचामरदीपकैः ।
नृत्यमङ्गलघोषाद्यैः सहिता राज्यलाभदाः ।।४७।।
दृष्टे शवे रोदनवर्जिते च
सम्पूर्णयात्राफलमेव तत्र ।
प्रवेशकाले तु शवः शवत्वं

करोति तद्रोदनवर्जितोऽपि ।।४८।।
बिडालसर्पशशकगोधाशूकरकीर्तनम् ।
शुभमालोकनं नेष्टं तदुक्तं वाशुभप्रदम् ।।४९।।
कन्यागोवाद्यशङ्खं दधिफलकुसुमं पावकं दीप्यमानं
यानं वा गोप्रयुक्तं हयगजवृषभं पूर्णकुम्भं द्विजं वा ।
उद्धृत्याज्यं च मांसं जलचरयुगलं सिद्धमन्नं शवं वा
वेश्यास्त्री मद्यभाण्डां प्रियहितवचनं मङ्गलं प्रस्थितानाम् ।।५०।।
गुडलवणवसास्थिक्लीबकार्पासपङ्क-
प्रहरणरिपुमत्तोन्मत्तपग्वङ्गहीनैः ।
पतितजटिलमुण्डैर्व्याधिताभ्यक्ततैलै-
रखिलफलविनाशः क्षुत्पिपासार्तभूतैः ।।५१।।
शाखामृगाख्यभल्लूकदर्शनं स्वमरिष्टदम् ।
एतयोः कीर्तनं यत्र यातुः कार्यविनाशनम् ।।५२।।
[४२९]जन्मान्धमुक्तकेशास्थिकुब्जवन्ध्याविरूपकैः ।
कषायेन्धननास्तिक्यरजकैः कार्यनाशनम् ।।५३।।[४३०]

---

४२९ व१ मग्नांद्य

४३० व१ मध्येऽधिकम्-
धर्मेश्वरौ मित्रे ताभ्यां मार्गो निरीक्षित;।। न स्वप्रपूर्वशकुनः स्यादिष्टार्थप्रसिद्धये।।५३।।
शतिमित्रत्वमापन्नौ धर्माद्येशौ शुभेक्षितो। यदा स्यातां विचित्राणि शकुनानीष्टसिद्धये।।५४।।
धर्ममार्गे वरौ याम्ये प्राप्तौ ग्रहविवर्जितौ। न भवन्ति निमित्तानि नानन्यशंस वा ।।५५।।
धर्ममार्गेश्वरौ शत्रुभावं प्राप्तौ यदा तदा । भवंत्येव निमित्तानि कार्याभावप्रसिद्धये।।५६।।
भौमेस्तवेशरिपुः पश्यन्मार्गेस्था धनं यदा तदा ।। विरुद्धः पक्षिभि मार्गो
भवेन्नैवमतोल्यः।।५७।।
वाराधिपतयः शत्रुः सन्पञ्चमे दशमे वसेत्। शनैश्चरस्तदामार्गो निरुद्धः कृष्णपक्षिभिः।।५८।।
लग्ने सितोर्ये सौरिश्च लाभे भौमश्च पंचमे । गुरुचंद्रोर्कयोरयोगो व्ययपूर्वयशप्रदः।।५९।।
लग्ने सितोर्येसौरिश्च चतुर्थे चंद्रवाकपती।। भौमे लाभे कुंभयोगो व्ययपूर्वयशःप्रद।।६०।।
अकृत्वा नैव यात्रायां योजने देवतार्चनम्। ब्राह्मणोभ्यः प्रदानं च स्वस्तिवाचनमेव।।६१।।
कृत्वा मैथुनं रात्रौ प्रभाते योधिगच्छति। नासौ फलमवाप्नोति कृच्छेण विनिवर्त्तते।।६२।।

राहुस्थितर्क्षं तस्यास्यं पुच्छं पञ्चदशं ततः ।
तदेव केतुभं ज्ञेयं सदा राहुः प्रतीपगः ।।५४।।
त्रयोदश त्रयोदश धिष्ण्यान्युभयपार्श्वयोः ।
मुखभागो मृतपक्षो जीवपक्षस्तु पृष्ठगः ।।५५।।
रविः स्थायी शशी यायी तद्वशाच्च जयाजयौ ।
जीवपक्षस्थिते सूर्ये मृतपक्षगते विधौ ।।५६।।
स्थायिनां विजयस्तत्र यायिनां च पराजयः ।
मृतपक्षगते भानौ जीवपक्षगते विधौ ।।५७।।

उत्तमामध्यमा चान्या प्रत्येकंविविधायुतः। उत्तमादिविमर्दना यात्रा नवविधा स्मृता।।६३।।
आयुर्वृद्धिर्यात्रासिद्धिः प्रयाणकं पुरबलस्य। रक्षायणविनिवृत्तिश्च षडेतान् ज्ञात्वा यात्रा प्रदातव्या।।६४।।
जन्मलग्नादिसंस्थित्या निश्चित्यायुः प्रयत्नतः। प्रत्यागमनपर्यन्तं प्रयाणं कारयेद्बुधः।।६५।।
सवार्यो लग्नपो यस्यां भास्करस्य सुहृद्यदि। सा यात्रा चोत्तमा ज्ञेया यातुरिष्टफलप्रदा।।६६।।
वर्गोत्तमे स्वतुङ्गे वा लग्नेशाः सूर्यबांधवाः। उत्तमोत्तमयात्रायां स्वेष्टाधिकफलप्रदाः।।६७।।
उदयेशो बली यस्यामनुक्तस्थो रवेः सुहृत्। कुलशेन फलदा यातुर्यात्रासोत्तममध्यमा।।६८।।
होरेशो बलवान्यस्यामशत्रुगः सूर्यबांधवाः। उत्तमाधमयात्रासौ शत्रुदृष्टफलप्रदा।।६९।।
लग्नेशो मध्यमबलो यस्य सूर्यस्य मध्यमः। सा यात्रा मध्यमा ज्ञेया यातुर्मध्यफलप्रदा।।७०।।
स एव तादृशी यस्या स्वोच्चे वा सोत्तमे यदि। विलम्बितफलं यातुः सा तु स्यान्मध्यमोत्तमा।।७१।।
उत्तमलक्षण एवासावनुक्तस्थानागो यदि। यातुः सा मध्यमा यात्रा दुःखाधिकफलप्रदा।।७२।।
होरेशो दुर्बलो यस्यां प्रतिकूले द्वे यदि। सा तु यात्राधमा ज्ञेया सर्वदा फलवर्जिता।।७३।।
उक्तलक्षणहोरेशो यस्या वर्गोत्तमो वसेत्। सा मध्यमोत्तमा यात्रा हानिदा तु फलप्रदा।।७४।।
उक्तलग्नाधिपो यस्यामनुक्तस्थानगा यदि। प्राणार्थहानिदा नित्यं सा यात्राधममध्यमा।।७५।।
उक्तलग्नाधिपो यस्यामनुक्तस्थानगा यदि। अधमाधमयात्रा सा मृत्युदानर्थकारिणी।।७६।।
लग्नजन्मदशेशेषु रवींदुज्ञसितेषु च। गुरुभौमदिगीशेषु प्रस्फुरत्किरणेषु च ।।७७।।
स्वानुकूलेषु कुर्वीत यात्रा राजा सुवृद्धिमान्। तत्फलं प्राप्य वेगेन पुनरायाद् गृहं प्रति।।७८।।
दशाधिपो स चेत्स्याद्या यात्राकाले च जन्मनि। यातुरिष्टार्थदा यात्रा दशाधिपदिशं प्रति।

यायिनां विजयस्तत्र स्थायिनां च पराजयः ।
जीवपक्षगयोः सूर्यचन्द्रयोः सन्धिमादिशेत् ।।५८।।
उभौ पराजितौ ज्ञेयौ मृतपक्षगयोस्तयोः ।
चन्द्रे पुच्छे मुखे सूर्ये जयः स्वल्पोऽपि यायिनाम् ।।५९।।
व्यत्यये व्यत्ययफलं युद्धेष्वेवं विचिन्तयेत् ।
यात्रायामपि सर्वत्र चिन्तनीयं प्रयत्नतः ।।६०।।
यात्रेष्टसिद्धिदाऽर्केन्दोरेकायनगयोस्तयोः ।
भिन्नायनगयोरह्नि निशि चेदन्यथा वधः ।।६१।।
स्वेष्टलग्ने लग्नगते राशौ वा लग्नगे सति ।
यातुर्भङ्गो भवेत्तत्र द्वादशे वान्यलग्नगे ।।६२।।
स्वशत्रुलग्नराशौ वा यदा लग्नगते तदा ।
यातुर्भङ्गप्रदा नित्यं तदीशे वाथ लग्नगे ।।६३।।
अष्टलग्नाधिपे यत्र लग्नगे राशिगेऽथवा ।
दुःखशोकभयं यातुरथवा निधनं भवेत् ।।६४।।
जन्मराशौ लग्नगते तदीशे वा विलग्नगे ।
अभीष्टफलदा यात्रा राशीशश्चेच्छुभग्रहः ।।६५।।
चरराशौ लग्नगते स्थिरे वा सौम्यवीक्षिते ।
यातुरिष्टार्थदा यात्रा द्विस्वभावे त्वनिष्टदा ।।६६।।[431]
शीर्षोदये लग्नगते तदीशे वाथ लग्नगे ।
अत्यन्तफलदा यात्रा तदीशश्चेच्छुभग्रहः ।।६७।।[432]
जन्मलग्ने लग्नगते तद्वर्गे वा विलग्नगे ।
अत्यन्तफलदा यात्रा तदीशश्चेच्छुभग्रहः ।।६८।।
शुभग्रहे लग्नगते तद्वर्गे[433] वा विलग्नगे ।

---

४३१ व१ श्लोकलोपः

४३२ व२ द्वितीयपङ्क्तिर्भिन्ना– धनधान्य यदा यात्रात्वथवा विजयप्रदा।।६८।।, व१ द्वितीयपङ्क्तिलोपः

४३३ वे. पा.तदीशे

धनधान्यप्रदा यात्रा त्वथ वा विजयप्रदा ।।६९।।[४३४]
दिग्द्वारभे लग्नगते तदंशे वा तदीश्वरे ।
अर्थलाभप्रदा यातुरथवा विजयप्रदा ।।७०।।
जन्मराशिविलग्नाभ्यां लग्ने चोपचये गृहे ।
सम्पूर्णफलदा यात्रा त्वथवा विजयप्रदा ।।७१।।
वर्गोत्तमांशगे लग्ने त्वथवापि सुधाकरे ।
यात्रा कामदुधा यातुर्माता पुत्रस्य वै यथा ।।७२।।
दिग्द्वारभेषु यात्रोक्तेष्वथ वा सर्वभेषु च ।
यात्रा रक्षति कर्तारं माता पुत्रमिवानिशम् ।।७३।।
स्वराशिगे शुभे लग्ने स्वांशगे मित्रगेऽपि वा ।
यात्रा रक्षति कर्तारं पितेवानुगतं सुतम् ।।७४।।
स्वाधिमित्रगते सौम्ये लग्नगे वा तदंशगे ।
यात्रा रक्षति कर्तारं सुविद्येवातुरं द्विजम् ।।७५।।
वसुभस्योत्तरार्धाच्च पञ्चधिष्ण्येषु सर्वदा ।
याम्यदिग्यायिनां नृणां दुःखदा भङ्गदापि वा ।।७६।।
अष्टमस्त्वभिजिन्नाम मुहूर्तो भङ्गदः सदा ।
याम्यदिग्यायिनां सन्ति गुणाश्च बहवो यदि ।।७७।।
अन्यदिक्षु प्रयातॄणां स मुहूर्तो जयप्रदः ।
प्राक्तनं सुकृतं यद्वन्नराणां पुण्यकर्मणाम् ।।७८।।
यात्रा सम्पूर्णफलदा शुभैस्तुङ्गत्रिकोणगैः ।
मध्यमा स्वसुहृद्भागैरधमा शत्रुनीचगैः ।।७९।।
बलप्रदास्य खेटस्य वारवर्गः शुभप्रदः ।
इतरग्रहवारादिर्यात्रायामशुभप्रदः ।।८०।।
एकार्गलहतं धिष्ण्यं क्रूराक्रान्तं च विद्धभम् ।

---

४३४ व१ प्रथमपङ्क्तिलोपः, व२ श्लो. ६८-६९लोपः

उत्पातदूषितं यत्र यात्रा भङ्गप्रदा सदा ।।८१।।
तिथिनक्षत्रलग्नानामन्तरालं च रुक्प्रदम् ।
गण्डान्तं त्रिविधं तेषां यात्रायां निधनप्रदम् ।।८२।।
वैनाशिकादिऋक्षेषु विषनाडीषु सर्वदा ।
यातुर्मृत्युप्रदा यात्रा कालकूटविषोपमा ।।८३।।
महागणितमार्गेण त्वानीतौ पातवैधृतौ ।
यो यात्यागमनं तस्य खवृक्षः पुष्पितो यदा ।।८४।।
कर्तरीदूषिते लग्ने चन्द्रे वापि षडष्टगे ।
यातुर्भङ्गप्रदा यात्रा लग्ने बहुगुणान्विते ।।८५।।
पञ्चाङ्गदुष्टदिवसे लग्ने वा दोषदूषिते ।
सा यात्रा भङ्गदा यातुश्चौरभीतिप्रदाथवा ।।८६।।
शुक्रे चास्तङ्गते यत्र चन्द्रे वास्तमुपागते ।
तयोर्बाल्ये च वार्धक्ये सा यात्रा भयरोगदा ।।८७।।
यात्रालग्नेऽर्कसंक्रान्तिदूषिते त्वयनेन वा ।
यातुर्मासत्रयादेव शत्रुरोगभयप्रदा ।।८८।।
केन्द्रत्रिकोणगैः सौम्यैस्त्रिभवारिगतैः परैः ।
अलग्नरिपु[४३५]चन्द्रेण यात्राभीष्टफलप्रदा ।।८९।।
यात्रा लग्नस्य केन्द्रेषु शून्येषु शुभखेचरैः ।
निष्फलं गमनं तस्य जारजातस्य पिण्डवत् ।।९०।।
त्रिकोणे द्वित्रिराशौ वा शून्ये यस्य शुभग्रहैः ।
निष्फला तस्य यात्रा स्यान्मिथ्यावादस्य वाग्यथा ।।९१।।
यस्मिन्वारे दुर्मुहूर्तलग्नं भङ्गप्रदं नृणाम् ।
रुक्प्रदं वारदोषं च तस्मात्तत्त्रितयं त्यजेत् ।।९२।।
पश्चादभ्युदिते शुक्रे यायात्प्राचीं तथोत्तराम् ।
प्राच्यामभ्युदिते तस्मिन्प्रतीचीं दक्षिणां दिशम् ।।९३।।

---

४३५ वे.पा. रिप्फ

सम्मुखे चन्द्रजे यत्र मार्गमध्योदिते यदि ।
यावदस्तमिते तस्मिंस्तावत्तत्रैव संवसेत् ।।९४।।
प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नरः ।
बलेन शक्रतुल्योऽपि हतसैन्यो निवर्तते ।।९५।।
प्रवेशे स्वगृहे ग्रामे विवाहे देशविभ्रमे ।
प्रतिशुक्रोद्भवो दोषो नैव भौमज्ञयोरपि ।
तीर्थयात्राविधौ तेषां प्रतिशुक्रं न विद्यते ।।९६।।
काश्यपेषु वसिष्ठेषु भृग्वत्र्यङ्गिरसेषु च ।
भरद्वाजेषु वत्सेषु प्रतिशुक्रं न विद्यते ।।९७।।
अयमर्थमनुक्तत्वाच्छास्त्रे **पैतामहे** क्वचित् ।
तस्मात्सम्मुखदोषोऽस्ति प्रतिशुक्रस्य सर्वदा ।।९८।।[४३६]
तद्दोषशमनार्थाय शान्तिं वक्ष्ये समासतः ।
कृत्वा शान्तिं प्रयत्नेन पश्चात्कार्यं समाचरेत् ।।९९।।
भृगोर्लग्ने भृगोर्वर्गे भृगोवरि भृगूदये ।
उपोष्य भृगुवारेऽपि यावच्छुक्रोदयं व्रती ।।१००।।
रजतेन सुशुद्धेन प्रतिमां कारयेद्भृगोः ।
लिखेदष्टदलं पद्मं कांस्यपात्रे च तण्डुलैः ।।१०१।।
शुक्लसूक्ष्माम्बरैर्वेष्ट्य प्रतिमां तत्र पूजयेत् ।
[४३७]शुक्लपुष्पाक्षतैर्गन्धैर्मुक्ताहारैर्विचित्रितैः ।।१०२।।
उपचाराणि कार्याणि शुक्रं ते अन्यदित्यृचा ।
तन्मन्त्रेण जपं कुर्यात्सम्यगष्टोत्तरं शतम् ।।१०३।।
[४३८]कर्मान्ते तेन मन्त्रेण भक्त्या चार्घ्यं प्रदापयेत् ।
श्वेतगन्धाक्षतैः पुष्पैः क्षीरमिश्रितवारिभिः ।।१०४।।

---

४३६ व१– अधिकम् – पौष्णादि वह्निभाद्यधो यावत्तिष्ठति चंद्रमा।
तावच्छुक्रो भवेदधम़प्रतिशुक्रो न दोषकृत्।।१२५।।

४३७ व२ शुक्र

४३८ व२ कुमति

वसिष्ठसंहिता

दैत्यमन्त्री दिवादर्शी चोशना भार्गवः कविः ।
श्वेतोऽथ मण्डली काव्यो विधिस्थो भृगवे नमः ॥१०५॥
दत्त्वा ह्यर्घं प्रयत्नेन प्रार्थयेच्चैव भक्तितः ।
अनेनैव च मन्त्रेण प्राञ्जलिः प्रणतः स्थितः ॥१०६॥
त्वत्पूजयानया शुक्र मे सम्मुखसमुद्भवम् ।
दोषं विनाशाय क्षिप्रं रक्ष मां तेजसां निधे ॥१०७॥
इति प्रार्थ्य प्रयत्नेन प्रतिमा भूषणान्विता ।
दैवज्ञायैव दातव्या श्वेताश्वसहितेन च ॥१०८॥
शिष्टेभ्यो दक्षिणां दद्याद्यथावित्तानुसारतः ।
ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ॥१०९॥
एवं यः कुरुते सम्यक्प्रतिशुक्रप्रपूजनम् ।
न तस्य संमुखो दोषो विजयी चार्थवान्भवेत् ॥११०॥
इतरेषां ग्रहाणां च पूजां कुर्यात्प्रयत्नतः ।
तत्तत्सम्मुखजं दोषं तत्क्षणादेव नश्यति ॥१११॥
सूर्याय कपिलां दद्याच्छङ्खं चन्द्रमसेऽपि च ।
कुजाय वृषभं दद्यात्स्वर्णं दद्याद्बुधाय च ॥११२॥
गुरवे पीतवस्त्रं च सिताय सितलोहकम् ।
एवं प्रयत्नतः कृत्वा सर्वान्कामानवाप्स्यति ॥११३ ॥
क्षुते मार्जारसमरे गृहदाहे ऋतौ स्त्रियः ।
दुरुक्ते माहिषे युद्धे कुटुम्बे कलहादिके ॥११४॥
स्खलिते चाम्बरादीनां प्रत्याह्वाने च मैथुने ।
वृषाश्वकुक्कुटादीनां युद्धे यात्रा त्वनिष्टदा ॥११५॥
विविधानि निमित्तानि बहूनि शकुनानि च ।
एतेषामधिका यातुर्मनःशुद्धिर्जयप्रदा ॥११६॥
उद्वाहे व्रतबन्धे च प्रतिष्ठायां महोत्सवे ।
असमाप्ते न गन्तव्यं मृतके सूतकेऽपि च ॥११७॥
घृतान्नं कृशरान्नं च मत्स्यान्नं घृतपायसम् ।

पूर्वादिषु क्रमाद्भुक्त्वा यात्रासिद्धिमवाप्नुयात् ।।११८।।
मञ्जिकां पायसं साज्यं काञ्जिकं पायसो दधि ।
क्षीरं तिलोदनं भुक्त्वा रविवारादिषु व्रजेत् ।।११९।।
कुल्माषांश्च तिलान्साज्यांस्तडुलान्दधि गोघृतम् ।
पायसं मृगमांसं च तत्क्षीरघृतपायसम् ।।१२०।।
चणका मृगिणीमासं शशमांसं च पौष्टिकम् ।
प्रियङ्गुकमपूपं च मण्डकान्कदलीफलम् ।।१२१।।
कूर्मश्चावित्ततो गोधाशालनीवारकोदनम् ।
कृशरान्नं मौद्गकान्नं पावान्नं मत्स्यभोजनम् ।।१२२।।
चित्रान्नं च सदध्यन्नमश्विभाश्च यथाक्रमात् ।
भुक्त्वा सम्यग्व्रजेद्याता यात्राफलमवाप्स्यति ।।१२३।।
ग्रहयज्ञं ततः कृत्वा पूर्वोक्तविधिना ततः।
दिगीश्वराकृतिं कृत्वा सुवर्णेन स्वमन्त्रकैः ।।१२४।।
स्वस्ववर्णैः सुगन्धाद्यैर्दीपैर्धूपैर्मनोरमैः ।
तद्वर्णवस्त्रैर्नैवेद्यैर्भक्त्या सम्यक् प्रपूजयेत् ।।१२५।।
ऐरावतस्थं देवेन्द्रं व्रजपाणिं शचीपतिम् ।
स्वर्णवर्णसहस्राक्षं दिव्याभरणभूषितम् ।।१२६।।
स्वाहाप्रियं मेषसंस्थं षडक्षं स्रुक्स्रुवायुधम् ।
सप्तजिह्वं सप्तहस्तं रक्तवर्णं हुताशनम् ।।१२७।।
रक्तवर्णं श्यामकेशं यमं महिषवाहनम् ।
दण्डपाणिं लोहिताक्षं सर्वाभरणभूषितम् ।।१२८।।
दीर्घग्रीवापतिं नीलं निर्ऋतिं नरवाहनम् ।
ऊर्ध्वकेशं विरूपाक्षं खड्गचर्मधरं प्रभुम् ।।१२९।।
वरुणं कालिकानाथमनर्घ्यमणिभूषितम् ।
नागपाशधरं पीतवर्णं मकरवाहनम् ।।१३०।।
वायुं कृष्णमृगासीनमञ्जनीपतिमव्ययम् ।
दण्डपाणिं शुक्लवर्णं जन्तूनामन्तरात्मकम् ।।१३१।।

अश्वारूढं कुन्तपाणिं चित्ररेखापतिं प्रभुम् ।
धनाधीशं स्वर्णवर्णं यक्षगन्धर्वनायकम् ।।१३२।।
गौरीपतिं चन्द्रमौलिं शुद्धस्फटिकसन्निभम् ।
पिनाकिनं वृषारूढं सर्वाभरणभूषितम् ।।१३३।
तद्दिगीशं [४३९]सुसंपूज्य तिलहोमं च कारयेत् ।
दैवज्ञाय ततो दद्यात्प्रतिमं दक्षिणान्विताम् ।।१३४।।
देवान्गुरून्पितॄन्विप्रान्स्वस्तिवाचनपूर्वकम् ।
नत्वा तुष्टः प्रीतिमना व्रजेन्मङ्गलनिःस्वनैः ।।१३५।।
तस्मिन्मुहूर्ते स्वयमप्रमाणे
प्रयोजनापेक्षतया च दैवात् ।
तत्रैव तन्निर्गमनं च कार्यं
स्वात्मासमानं च यदुक्तभानम् ।।१३६।।
श्वेतातपत्रध्वजचामराश्व-
विभूषणोष्णीषगजाम्बराणि ।
आन्दोलिकारत्नरथास्त्रशस्त्र-
शय्यासनाद्यं मनसस्त्वभीष्टम् ।।१३७।।
कस्तूरिकागन्धफलाक्षतौघ-
कर्पूरताम्बूलसुभक्षणानि ।
विचित्रपारावतपक्षिसंघं
प्रचालयेद्गन्धचयं प्रबन्धम् ।।१३८।।
विचित्ररम्याणि गृहाणि हेम-
मयानि रौप्याणि घटानि यानि ।
प्रचालयेद्गायकवाचकाख्य-
भिषग्ग्रहज्ञं च पुरोहितं च ।।१३९।।

---

४३९ व१ सुखसंपूज्य

प्रस्थानं धनुषां पञ्चशतान्युत शतद्वम् ।
स्वदेवसदनाद्यद्वा दशभिः प्रस्थितो मतः ।।१४०।।
आरभ्य निर्गमाद्यामात्क्षितिपो दशवासरान् ।
मण्डलीकः सप्तरात्रात्प्राकृतः पञ्चरात्रतः ।।१४१।।
अत ऊर्ध्वं व्रजेद्भूयो भद्रे वा दिवसे नृपः ।
राज्ञोऽन्यः प्राकृतो ज्ञेयो विप्रवैश्यादयो भुवि ।।१४२।।
झषलग्ने झषांशे च पन्था वक्रश्च यायिनाम् ।
जलराशौ जलांशि च जलयात्रार्थसिद्धिदा ।।१४३।।
तनुरर्थाह्वयो धन्वी वाहनो मन्त्रसंज्ञकः ।
शत्रुमार्गस्तथायुश्च मनोव्यापारसंज्ञकः ।।१४४।।
लाभश्च [४४०]व्ययसंज्ञश्च तन्वादीनां च संज्ञकाः ।
खेटे तन्वादिभावेषु ज्ञेयं यातुः फलं त्विदम् ।।१४५।।
घ्नन्ति क्रूरास्त्रिषष्ठायभावान्हित्वा परान्सदा ।
पुष्णन्ति सौम्यखचराः षष्ठाष्टान्त्यविना परान् ।।१४६।।
लग्ने षष्ठाष्टमं हन्ति चन्द्रः शुक्रोऽस्तगः सदा ।
मृत्युलग्नस्थितश्चन्द्रो यातुर्मृत्युप्रदः सदा ।।१४७।।
[४४१]एवमुक्तप्रकारेण यात्रां नूनं करोति यः ।
सर्वान्कामानवाप्नोति त्वरितं तु न संशयः ।।१४८।।[४४२]
उक्त्वा साधारणां यात्रां युद्धयात्रां ब्रवीमि ताम् ।
व्रजन्ति ये नृपाः सूक्ष्मलग्ने ते यायिनः सदा ।।१४९।।
फलसिद्धिर्धिष्ण्यगुणैरग्रजानां भवेत्सदा ।
योगलग्ने क्षितीशानां चौराणां शकुनैर्भृशम् ।।१५०।।
मुहूर्तशक्तितोऽन्येषां निमित्तैश्च फलोदयः ।
तत्तदुक्तप्रकारेण तस्माद्यात्रां करिष्यति ।।१५१।।

---

४४० वश,व२ लाभ
४४१ व२ एवं शुक्रं
४४२ व२ अनन्तरं श्लोकः १६१ पठितः

तिथिवारसनक्षत्रयोगेषु करणेषु च ।
यात्रानुक्तेष्वथैतेषु चन्द्रताराबलेऽपि च ।।१५२।।
योगलग्नयुता राज्ञां यात्रा च विजयप्रदा ।
विचित्रान्योगलग्नांस्तान्सम्यग्वक्ष्ये समासतः ।।१५३।।
गुरौ वीर्ये केन्द्रगते बुधे वा भृगुनन्दने ।
विजयो नामयोगोऽयं यातुर्विजयदः सदा ।।१५४।।
[४४३]लक्षदोषान्बुधो हन्ति सितो लक्षद्वयं बली ।
कोटिदोषान्गुरुर्हन्ति एको वा केन्द्रगो यदि ।।१५५।।
स्वराशिगे बुधे लग्ने सिते वा सुरवन्दिते ।
नद्यावर्ताह्वयो योगो यातुरिष्टार्थसिद्धिदः ।।१५६।।
स्वांशसंस्थे बुधे लग्ने शुक्रे वा देवपूजिते ।
शङ्खसंज्ञो महायोगो यातुः कीर्तिप्रदः सदा ।।१५७।।
[४४४]स्वराशिस्वांशगे सौम्ये लग्नस्थे वा भृगोः सुते ।
जीवे वा पद्मयोगोऽयं यातुः कल्याणदः सदा ।।१५८।।
अधिमित्रगृसहस्थे ज्ञे लग्नगे वा भृगोः सुते ।
जीवे वा वज्रयोगोऽयं यातुः शत्रुविनाशकृत् ।।१५९।।
अधिमित्रांशगे सौम्ये सिते वाथ सुरार्चिते ।
लग्नगे मित्रयोगोऽयं शत्रूणां सन्धिकृत्सदा ।।१६०।।
अधिमित्रगृहे स्वाधिमित्रांशस्थे भृगोः सुते ।
गुरौ चानन्दयोगोऽयं सौम्ये चानन्ददः सदा ।।१६१।।
स्वोच्चगे लग्नगे सौम्ये शुक्रे वा देवपूजिते ।
अमृतो नामयोगोऽयं यातुरायुःप्रदः सदा ।।१६२।।
[४४५]उच्चगे लग्नसंस्थेषु बुधे वाऽथ गुरौ सिते ।
शुभसंज्ञो महायोगो यायिनां शुभदः सदा ।।१६३।।

---

४४३ व१ लग्नदोषान्
४४४ व१ स्वर्णशस्वांशत्रूग
४४५ व१ उच्चांशगे

स्वोच्चे स्वोच्चांशगे सौम्ये लग्नगे वा भृगोः सुते ।
आये वा कीर्तियोगोऽयं यायिनां श्रीप्रदः सदा ।।१६४।।
शुभग्रहे द्वये लग्नसंस्थे वा त्रितयेऽपि वा ।
योगोऽतियोगसंज्ञोऽयं विजयोऽखिलभूप्रदः ।।१६५।।
त्रिषष्ठलाभगेष्वेषु रविमन्दकुजेषु च ।
पूर्णचन्द्रो महायोगः पूर्णराज्यप्रदः सदा ।।१६६।।
यत्रैकादशगे चन्द्रे भानौ वा प्रबले शुभे ।
अभयो नाम योगोऽयं भवत्यरिविनाशकृत् ।।१६७।।
त्रिकोणगे शुभे खेटे सुबले वा द्वितीयगे ।
कल्याणसंज्ञो योगोऽयं यायिनां मङ्गलप्रदः ।।१६८।।
यत्र स्वोच्चगते लग्ने लग्नादेकादशस्थिते ।
जयन्तनामयोगोऽयं शत्रुपक्षविनाशकृत् ।।१६९।।
वर्गोत्तमगते लग्ने शुभे वा प्रबलान्विते ।
सिद्धिसंज्ञो महायोगो यायिनां कार्यसिद्धिदः ।।१७०।।
लग्ने गुरौ विधौ खस्थे शनौ षष्ठेऽथवा रवौ ।
पद्मयोगः शत्रुपक्षक्षयकारी रणे सदा ।।१७१।।
गुरौ कण्टकगे लग्ने भानावेकादशस्थिते ।
पुण्डरीको महायोगः शत्रुपक्षविनाशकृत् ।।१७२।।
चन्द्रे लाभस्थिते सौम्ये लग्नगे वज्रसंज्ञकः ।
योगो व्रजनिभो युद्धे यातॄणामिष्टसिद्धिदः ।।१७३।।
वृषराशिगते चन्द्रे लाभगे केन्द्रगे गुरौ ।
कामधेनुरयं योगः कामदो यायिनां रणे ।।१७४।।
सिते केन्द्रगते सूर्ये लाभगे घोरसंज्ञकः ।
योगस्तद्वद्रणे शत्रुपक्षच्छेदकरस्तथा ।।१७५।।
लग्ने सौम्ये रवौ षष्ठे लाभगे देवपूजिते ।
महापाशुपतो योगः शत्रुवर्गविनाशकृत् ।।१७६।।
स्वराशिसंस्थिते शुक्रे लग्नगे लाभगे विधौ ।

ललाटलोचनं शम्भोस्तद्वद्दहत्यरीनलम् ।।१७७।।
उच्चस्थे लाभगे शुक्रे त्रिषष्ठेषु शुभग्रहे ।
सुदर्शनो महायोगः शत्रुध्वंसकरो रणे ।।१७८।।
शुभद्वयान्तरगते चन्द्रे शुक्रेऽथवा गुरौ ।
लग्नगे चक्रयोगोऽयं शत्रुसंघविनाशकृत् ।।१७९।।
लग्नात्केन्द्रगते चन्द्रे लग्नस्थे देवपूजिते ।
महाशङ्खाह्वयो योगः शत्रुसंघं निहन्त्यलम् ।।१८०।।
केन्द्रत्रिकोणगे जीवे लाभगे स्वोच्चगे यमे ।
[446]कौस्तुभो नामयोगोऽयं रणे शत्रुनिबर्हणः ।।१८१।।
त्रिधनायत्रिकोणस्थे जीवे वा भृगनन्दने ।
वर्धमानाह्वयो योगः प्रतिपक्षापनोदनः ।।१८२।।
भूसुते स्वोच्चगे लाभे मृगकुम्भगते यमे ।
नद्यावर्ताह्वयो योगः शत्रुतूलानिलो रणे ।।१८३।।
मेषगे भास्करे षष्ठे लाभगे स्वोच्चगे यमे ।
नक्षत्रपदयोगोऽयं शत्रुमेघानिलो रणे ।।१८४।।
भौमे स्वराशिगे लग्ने सौम्ये केन्द्रत्रिकोणगे ।
पुष्ययोगो रिपुवने कुठारः समराङ्गणे ।।१८५।।
चतुष्टयगते सौम्ये स्वतुङ्गे वा स्ववर्गगे ।
रत्नयोगः शत्रुवनं महादावानलः स्वयम् ।।१८६।।
मित्रवर्गगते सौम्ये केन्द्रवर्गगतेऽपि वा ।
कल्याणयोगो वैपक्षलाक्षारसहुताशनः ।।१८७।।
शुभग्रहेषु केन्द्रेषु पापेषु त्रिभवारिषु ।
कुमुदो नामयोगोऽयं शत्रुद्विरदकेसरी ।।१८८।।
पूर्वार्धगेषु सौम्येषु पापेष्विन्दावुपान्त्यगे ।
चक्राख्ययोगः सापत्न्यत्रिपुराणां त्रिलोचनः ।।१८९।।

---

४४६ वे. पा. कौशिको

परार्धगेषु सौम्येषु पापेष्विन्दौ भवस्थिते ।
शूलयोगस्त्वरिव्रातपूतनाकेशवः स्वयम् ।।१९०।।
एकान्तरगते लग्नाच्छुभखेटेऽथवा शुभे ।
वापीयोगस्त्वरिव्राततिमिरौघदिवाकरः ।।१९१।।
द्व्यन्तरान्तरिते सौम्ये पापे वा यदि लग्नतः ।
वल्लकीयोगसंज्ञोऽयं विपक्षपुरपावकः ।।१९२।।
अन्तरान्तरिते सौम्ये पापे वा हिमदीधितौ ।
लाभगे चापयोगोऽयं शत्रुभोगी भुजङ्गभृक् ।।१९३।।
चन्द्रेऽप्येकादशे संस्थे येषु केषु परेषु च ।
मुशलो नाम योगोऽयं शत्रुदैत्यौघराघवः ।।१९४।।
सौम्ये लग्नगते चन्द्रे लाभगे सुतगे शनौ ।
अन्यस्थानेषु सर्वेषु शत्रुपक्षाशनिः स्वयम् ।।१९५।।
चरराशिषु संस्थेषु निखिलेषु ग्रहेषु च ।
लग्ने च रज्जुयोगोऽयं शत्रूणामशनिः स्वयम् ।।१९६।।
स्थिरराशिषु संस्थेषु खचरेष्वखिलेष्वपि ।
लग्ने वानलयोगोऽयं प्रतिपक्षकुलान्तकः ।।१९७।।
द्विस्वभावेषु सर्वेषु ग्रहेष्विन्दौ विलग्नगे ।
संवर्त्तयोगः सापत्न्यगोवृन्दे द्वीपिविक्रमः[४४७] ।।१९८।।
लग्ने चन्द्रे च चरभे खेटेषु स्थिरभेषु च ।
यमदण्डो महायोगो नीयतेऽरीन्यमालयम् ।।१९९।।
चरराशौ लग्नगते ग्रहेषु स्थिरभेषु च ।
ब्रह्मदण्डो महायोगः शत्रुप्राणापहारकः ।।२००।।
स्थिरराशौ लग्नगते ग्रहेषु चरभेषु च ।
योगः संजीविनी ज्ञेयो विपक्षान्धकशूलभृत् ।।२०१।।
स्थिरभेषु च पापेषु चरभेष्वितरेषु च ।

---

४४७ वे,पा. रुद्धतः

द्विस्वभावे लग्नगते योग: शत्रुविनाशकृत् ।।२०२।।
केन्द्रद्वितीययो: सौम्येष्वितरेषु स्थिरेषु च ।
केदारयोग: सापत्न्यमेषसंघवृक: स्वयम् ।।२०३।।
केन्द्रद्वित्रिषु सर्वेषु सत्सु खेटेषु यत्र वै ।
वीणायोगस्त्वरिव्रातमृत्युकेतू रणाङ्गणे ।।२०४।।
त्रिषष्ठगेषु पापेषु लाभगौ जीवभार्गवौ ।
सिद्धियोग: सपत्नौघमूषकानां च जाहक:[448] ।।२०५।।
सहजैकादशे पापे केन्द्रगेष्वितरेषु च ।
कुम्भयोगस्त्वरिव्राततारकासुरषण्मुख: ।।२०६।।
केन्द्रद्वयेषु सौम्येषु चान्येष्वापोक्लिमेषु च ।
अरविन्दो महायोगस्त्वरिसंघाहिनाकुल: ।।२०७।।
दशमस्थे शुभे लाभे चन्द्रेऽन्येषु च बन्धुषु ।
गोत्रयोग: शत्रुपक्षगोत्राणां गोत्रभित्स्वयम् ।।२०८।।
तन्वन्त्यगेषु सौम्येषु परेष्वरिभवेषु च ।
जीमूतयोगो वैपक्षपावक: सप्तसागरा:(रान्) ।।२०९।।
सौम्येष्वाद्यन्तकेन्द्रेषु परेष्वायधनत्रिषु ।
प्रभञ्जनो महायोग: शत्रुपादपभञ्जन: ।।२१०।।
धर्मायगेषु पापेषु त्रिबन्धुष्वपरेषु च ।
क्रकचो नामयोगोऽयं शत्रुमस्तकभेदकृत् ।।२११।।
त्रिकोणान्त्येषु सौम्येषु त्रिषष्ठेषु परेषु च ।
दंशयोग: शत्रुजिह्वोत्पाटने दीर्घदंशन: ।।२१२।।
भवरि:फेषु सौम्येषु त्रिबन्धुषु परेषु च ।
सृणियोग: शत्रुपक्षमत्तेभेन्द्रसृणि: स्वयम् ।।२१३।।
शुभेनैकेन योग: स्यात्केन्द्रधर्मात्मजेषु च ।
तस्मिन्यातुरतिक्षेमं गमनागमनं सदा ।।२१४।।

---

४४८ व१ जाहक:, व२ विडालक:,चौ. जीह्वक:

त्रिकोणकेन्द्रसंस्थाभ्यां शुभाभ्यां मतिसंज्ञक: ।
योगस्तस्मिन्सदा याता जित्वा शत्रून् रणाङ्गणे ।।२१५।।
योगातियोग: केन्द्राङ्कसुतस्था: शुभखेचरा: ।
याता शत्रून्निहन्त्याजौ सप्ताङ्गेन समागत: ।।२१६।।
जन्मभे जन्मलग्ने वा तयोरीशे विलग्नगे ।
ताभ्यां केन्द्रत्रिषष्ठे वा यातु: शत्रुक्षयस्तदा ।।२१७।।
शत्रोरष्टमलग्ने वा राशौ वा यदि लग्नगे ।
तदीशस्थितलग्ने वा यातु: शत्रुक्षयस्तदा ।।२१८।।
लग्नकेन्द्रे जन्मपतौ धनायस्थै: परैर्ग्रहै: ।
गतो राजा त्वरे: सेनां नीयते यममन्दिरम्[४४९] ।।२१९।।[४५०]
[४५१]शुक्रे [४५२]केन्द्रे लग्नसंस्थे चन्द्रे बन्धुस्थिते यदा ।
गतो राजा रिपून्हन्ति केशवो दनुजानिव ।।२२०।।
षष्ठाष्टमेषु पापेषु लग्नेष्वन्येषु तत्र तु ।
गतस्य रिपुसेनेयं तमुपेत्यभिसारिका ।।२२१।।
लग्ने सौम्येऽष्टमे चन्द्रे लाभगेषु परेषु च ।
गतस्याग्रे वैरिचमू: खलमैत्रीव न स्थिरा ।।२२२।।
यमे तृतीयगे लाभे कुजे चन्द्रे शुभस्थिते ।
गतस्य शत्रुधरणी हस्तस्था निखिला तदा ।।२२३।।
दिग्राशिलग्नगे जीवे शुक्रे वाप्यथवा बुधे ।
दहन्त्यरीन्गतो राजा कृष्णवर्त्मा यथेन्धनम् ।।२२४।।
धिष्ण्ये चोपकुले लग्ने शुभे लाभस्थिते शनौ ।
शुष्यत्यरीन्गतो राजा त्वर्करश्मिर्यथा ह्रदम् ।।२२५।।
दिग्वर्गराशिलग्नस्थे दिगीशे वा भवस्थिते ।

---

४४९ व२ यममन्दिरे
४५० व१श्लोकलोप:
४५१ व१ शुर्के कार्ये,
४५२ व२ कर्क

गतो राजा रिपून् हन्ति पापं यद्वद्धरेः स्मृतिः ।।२२६।।
इन्दौ स्वक्षेत्रगे लाभे स्वोच्चगे लग्नगे बुधे ।
गतो राजा रिपून्हन्ति पापं पञ्चाक्षरी यथा ।।२२७।।
स्वाधिमित्रगते सौम्ये लग्नस्थे वा भवान्विते ।
गतो राजा रिपून्हन्ति कर्मज्ञानोदयो यथा ।।२२८।।[४५३]
एकस्मिन्नैव मित्रर्क्षे स्वोच्चगे लग्नगे गुरौ ।
गतो राजा रिपून्हन्ति पापं भागीरथी यथा ।।२२९।।[४५४]
विगजतुरगभीतान्पुण्यलोकाभिलाषी
विरथशिथिलवस्त्रान्मुक्तशस्त्रास्त्रकेशान् ।
नृपमुखगतसत्त्वान्प्राञ्जलीन्युद्ध्यमानः
क्षितिपतिरिति वीरान्युद्धभूमौ न हन्यात् ।।२३०।।
सपत्नदेशान्नगरं प्रविश्य
महीपतिर्देवगुरुद्विजार्थे ।
कुर्यान्न वाञ्छा न कुलाङ्गनासु
प्राणाभिलाषी न कदाचिदेव ।।२३१।।
सापत्नसप्ताङ्गसमस्तवीर-
लक्ष्मीं गृहीत्वा निखिलप्रजानाम् ।
दत्त्वाभयं पूर्ववदेव सर्वं
संस्थाप्य लग्ने स्वपुरीं विशेच्च ।।२३२।।
तस्माद्विवाहे यात्रायामाधाने जातकेऽपि वा ।
ग्रहयोगात्फलं वाच्यं शेषमन्यद्धि निष्फलम् ।।२३३।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां यात्राध्यायः सप्तस्त्रिंशः ।।३७।।

---

४५३ व२ श्लो. २२८, २२९, २३३ लोपाः

४५४ व१ - भिन्नः पाठः - कस्मिन्नेव पुत्रे वा स्वोच्चगे लग्नगे गुरौ।
गतो राजा रिपून्हंति कर्मज्ञानोदयो यथा।।५४।।

३८

२.३८.० गृहप्रवेशः

अथ प्रवेशो नवसद्मनश्च
सौम्यायने जीवसिते बलाढ्ये ।
सिते च पक्षे शुभवासरे च
वास्त्वर्चनं भूतबलिं च कृत्वा ।।१।।
नवप्रवेशेऽप्यथ कालशुद्धि-
र्न द्वन्द्वसौपूर्वकयोः कदाचित् ।
प्रवेशपश्चाङ्गदिने सुलग्ने
वास्तवर्चनं पूर्ववदत्र कार्यम् ।।२।।
अपूर्वसंज्ञः प्रथमप्रवेशो
यात्रावसाने च सुपूर्वसंज्ञः ।
द्वन्द्वाह्वयस्त्वग्निभयादिजात-
स्त्वेवं प्रवेशस्त्रिविधः प्रदिष्टः ।।३।।
दिवा प्रवेशः शुभदः सुपुत्र-
पौत्राभिवृद्धिं निशि भास्करेन्दोः ।
बलेन मध्येन्दुजवासरस्य
रात्रिं विना पूर्वतिथेश्च रात्रिम् ।।४।।
दह्यते प्रविशतां च मन्दिरं
वह्निभे नियतमेव वह्निना ।
ब्रध्नभूमिसुतवासरे तथा
शीतरश्मिदिवसे च वृद्धिम् ।।५।।
[४५५]चन्द्रजार्यसितवासरेषु तु

---

४५५ व२ चंद्राजीव

श्रीकरं सुतमहार्थलाभदम् ।
सूर्यसूनुदिवसे स्थिरप्रदं
किन्तु चौरभयमत्र विद्यते ।।६।।
रिक्काममां दग्धतिथिं दिनेश–
भूसूनुषड्वर्गमिनेन्दुदृष्टिम् ।
क्रूरग्रहाधिष्ठितविद्धभं च
विवर्जनीयं त्रिविधप्रवेशे ।।७।।
माघेऽर्थलाभः प्रथमप्रवेशे
पुत्रार्थलाभः खलु फाल्गुने च ।
चैत्रेऽर्थहानिर्धनधान्यलाभो
वैशाखमासे पशुपुत्रलाभः ।।८।।
ज्येष्ठेषु मासेषु परेषु नूनं
हानिप्रदः शत्रुभयप्रदश्च ।
शुक्ले च पक्षे सुतरां प्रवृद्ध्यै
कृष्णे च यावद्दशमी च तावत् ।।९।।
चित्रोत्तराधातृशशाङ्कमित्र–
वस्वन्त्यवारीश्वरभेषु नूनम् ।
आयुर्धनारोग्यसुपुत्रपौत्र–
सुकीर्तिदः स्यात्त्रिविधः प्रवेशः ।।१०।।
अर्कानिलार्यादितिदस्रविष्णु–
ऋक्षे प्रविष्टं नवमन्दिरं यत् ।
अब्दत्रयात्तत्परहस्तया तं
शेषेषु धिष्ण्येषु च मृत्युदं स्यात् ।।११।।
पञ्चाङ्गसंशुद्धिदिने निशीश–
ताराबले चाष्टकवर्गयुक्ते ।
सौम्ये स्थिरे भे शुभदृष्टियुक्ते
लग्नेऽथवा द्व्यङ्गगृहे विलग्ने ।।१२।।

न[४५६] नैधनेभेऽपि न वाष्टलग्ने
पञ्चेष्टिकेऽप्यष्टमशुद्धियुक्ते ।
कार्यः प्रवेशो न चरांशलग्ने
शुभेक्षिते वाप्यऽथ संयुते वा ।।१३।।
कर्तुर्विलग्नाच्च हि जन्मराशे-
र्लग्नस्थितो राशिरिति प्रदिष्टः ।
निर्व्याधिदारिद्र्ययशस्करश्च
सुहृत्सुतघ्नो रिपुनाशदः सः ।।१४।।
कलत्रहन्ता निधनप्रदश्च
रोगप्रदः सिद्धिकरोऽर्थदश्च ।
क्रमाच्च वैरी भयदः प्रवेशे
सदैव नूनं त्रिविधे विचिन्त्यम् ।।१५।।
केन्द्रत्रिकोणत्रिधनायसंस्थैः
शुभैस्त्रिषष्ठायगतैः खलैश्च ।
लग्नान्त्यषष्ठाष्टमवर्जितेन
चन्द्रेण लक्ष्मीनिलयः प्रवेशः ।।१६।।
यद्दिग्द्वारं मन्दिरं तद्दिगृक्षै-
रुक्तर्क्षैः स्यात्सन्निवेशो न सर्वैः।
पुष्यो मध्यः सन्निवेशेऽप्युडूनां
वाराणां स्यात्सूर्यसूनोश्च वारः ।।१७।।
मृगादिषड्राशिषु संस्थितेऽर्के
नवप्रवेशः शुभदः सदैव ।
कुम्भं विनान्येष्वपि केचिदूचु-
र्न सौरमिष्टं खलु सन्निवेशे ।।१८।।
प्रवेशलग्नान्निधनस्थितो यः

---

४५६ व२ न शब्दलोपः

क्रूरग्रहः क्रूरगृहे यदि स्यात् ।
प्रवेशकर्तारमथ त्रिवर्षा-
द्धन्त्यष्टवर्षैः शुभराशिगश्चेत् ।।१९।।
यः क्षीणचन्द्रोऽन्त्यषडष्टसंस्थः
पापेक्षितः पापयुतोऽथवा स्यात् ।
कर्तुः स्त्रियं हन्ति स वत्सरेण
त्रिवर्षतः सौम्यनिरीक्षितश्चेत् ।।२०।।
एको ग्रहेन्द्रः परभागवर्ती
जायास्थितः कर्मगतोऽथ वा स्यात् ।
प्रविष्टगेहं परहस्तयातं
करोति वर्षाद्विबलः स खेटः ।।२१।।
गजाश्वशालादिषु सन्निवेश-
स्त्वेवं पशूनां पशुयोनिराशौ ।
शुभग्रहैर्युक्तिनिरीक्षिते च
प्रवेशतः शोभनमामनन्ति ।।२२।।
यद्वास्तुपूजारहितं तदत्र
बलिं विना छन्नगृहं विरूपम् ।
कपाटहीनं न विशेद्यतस्त-
त्सर्वापदामालयमेतदेव ।।२३।।
कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं
विप्रान्पूज्यानग्रतः पूर्णकुम्भम् ।
हर्म्यं रम्यं तोरणैः स्रग्वितानैः
स्त्रीभिः [४५७]सम्यग्गीतवाद्यैर्विशेत्तत् ।।२४।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां गृहप्रवेशाध्यायोऽष्टात्रिंशः ।।३८।।

---

४५७ वे. स्रग्वी

वसिष्ठसंहिता

३९

२.३९.० वास्तुविचारः

वास्तुज्ञानं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा ।
ग्रामसप्त(सद्म)पुरादीनां निर्माणं सूक्ष्मतोऽधुना ।।१।।
क्षेत्रमादौ परीक्षेत गन्धवर्णरसादिना ।
श्वेतस्थानं द्विजातीनामीषद्रक्तं महीभुजाम् ।।२।।[४५८]
विशां पीतं चतुर्थानां कृष्णवर्णं शुभप्रदम् ।
मधुपुष्पाम्लपिशितं गन्धवर्णानुरूपतः ।।३।।
मधुरं कटुकं त्वम्लं तिक्तं तत्क्रमशो रसम् ।
खातं कृत्वारत्निमात्रं खनयेत्तत्समन्ततः ।।४।।
रात्रादौ तज्जलैः पूर्य प्रातः सम्यङ्निरीक्षयेत् ।
जलयुक्तं वृद्धिकरं पङ्कयुक्तं तु मध्यमम् ।।५।।
व्रणयुक्ते भवेद्धानिः शुष्के मृत्युं समादिशेत् ।
तथैव तन्मृदं कृत्वा तद्गतं परिपूरयेत् ।।६।।
अधिके वृद्धिमाप्नोति समे साम्यं क्षये क्षयम् ।
प्रागुत्तरप्लवं वृद्धिरैशान्यं प्लवमिष्टदम् ।।७।।
[४५९]कीलकेशास्थिशुद्ध्यर्थं पुरुषत्रयमानतः ।
खनित्वा पूरयेत्तं च पाषाणसिकताम्बुभिः ।।८।।
एवं परीक्षितं क्षेत्रं कृत्वा दिक्साधनं ततः ।
सलिलेन समीकृत्य त्वथवापि शिलातले ।।९।।
शङ्कुमानेन सूत्रेण लिखेद्वृत्तं समस्थले ।
आद्वादशाङ्गुलं शङ्कुं वृत्तमध्ये समं न्यसेत् ।।१०।।
तच्छायाग्रं यत्र वृत्ते स्पृशेत्पूर्वापराह्णयोः[४६०] ।

---

४५८ व.२ हस्तलिखियस्योपरिभागे श्लोकः १ तथा २ लिखितः।
४५९ व१ केशाच्छिकीट, व२ केशास्थिकट

कार्यौ बिन्दू तत्र वृत्ते यत्र पूर्वापराभिधे ।।११।।
तयोर्मध्ये हि मत्स्येन रेखा स्याद्दक्षिणोत्तरा ।
दक्षिणोत्तरदिङ्मध्ये मत्स्योनापरपूर्विका ।।१२।।
दिङ्मध्योद्भवमत्स्यौ च विदिशश्चोपदेशत: ।
चतुरस्रं बहिश्चात्र मूढा ज्यौतिषिका भुवि ।।१३।।
अल्पाधिकं[४६१] चतुरस्रं कार्यं षड्वर्गशुद्धित: ।
चतुरस्रेण मार्गेण प्राकारं कल्पयेद्भुवि ।।१४।।
द्वारमायामत: कार्यं पुत्रपौत्रधनप्रदम् ।
विस्तारकोणद्वारं यद्दु:खशोकभयप्रदम् ।।१५।।
तस्मात्कृत्वाष्टधा यामं दिक्षु द्वारेषु सत्स्वपि ।
प्रादक्षिण्यात्फलान्यष्टावैकैकस्यामिति[४६२] क्रमात् ।।१६।।[४६३]
दु:खशोकौ धनप्राप्तिर्नृपपूजा महद्धनम् ।
स्त्रीजन्म पुत्रता हानि: प्राचीद्वारफलानि वै ।।१७।।
निधनं बन्धनं भीति: पुत्रावाप्तिर्धनागम: ।
यशो लाभश्चौरभयं व्याधिभीतिश्च दक्षिणे ।।१८।।
शत्रुवृद्धि: पुत्रहानिर्लक्ष्मीप्राप्तिर्धनागम: ।
सौभाग्यं धनलाभश्च दु:खं शोकश्च पश्चिमे ।।१९।।
नि:स्वं स्त्रीदूषणं हानि: संपत्प्राप्ति: सुखागम: ।
दु:खागम: शत्रुबाधा चोत्तरस्यां दिशि क्रमात् ।।२०।।
विस्तारद्विगुणोत्सेधं द्वारं तद्विषमायतम् ।
पश्चिमे दक्षिणे चापि कपाटं च शुभप्रदम् ।।२१।।
एकाशीतिपदं कुर्यात्प्राकाराधिष्ठितां क्षितिम् ।

---

४६० वर२ पूर्वापराविधौ
४६१ वर२ अष्टौ दिश
४६२ व१ दिशि
४६३ वर२ प्रादक्षिण्यामष्टाद् वैशान्यादि दिशि क्रमात।।१६

मध्येन च पदं ब्रह्मस्थानं तन्निधनप्रदम् ।।२२।।
द्वात्रिंशदंशा पैशाच्याः प्राकाराय समीपगाः ।
एतेषु गृहनिर्माणं शोकरोगभयप्रदम् ।।२३।।
दिग्विदिक्षु स्थिता[४६४] रेखा शिराः स्युर्वास्तुनः सदा ।
ब्रह्ममार्गपिशाचांशशिराणां [४६५]यत्र संयुतिः ।।२४।।
मर्माणि सन्धयो ज्ञेया वास्तुनस्तत्र तत्र तु ।
मर्मसन्धिषु कालेषु कुड्यपादं न कारयेत् ।।२५।।
शेषस्थानेषु निर्माणं पुत्रपौत्रप्रवर्धनम् ।
स्वे स्वे निवेशनेऽप्येवमेतत्सर्वं विचिन्तयेत् ।।२६।।
पितृमूलेज्यभाग्यार्कपौष्णभेषु च यत्कृतम् ।
कुजेन सहितेष्वेव गृहं तद्दह्यतेऽग्निना ।।२७।।
अग्निनक्षत्रगे सूर्ये चन्द्रे वा संस्थिते यदि ।
निर्मितं मन्दिरं नूनमग्निना दह्यतेऽचिरात् ।।२८।।
अजपाद्द्वितीये याम्यमित्रेन्द्रानिलभेषु च ।
यत्कृतं शनिसंयुक्तं गृह्यते यक्षराक्षसैः ।।२९।।
परवर्गगतस्त्वेकः खस्थो वा द्यूनगो ग्रहः ।[४६६]
परहस्तगतं गेहं करोति [४६७]स्वगृहे बली ।।३०।।
नीचशत्रुगते जीवे शुक्रे वा ज्ञेऽथवा रवौ ।
निर्मितं सदनं शश्वदतिनिस्वत्वतां गतम् ।।३१।।
इज्योत्तरात्रयाहीन्दुविष्णुधातृजलोडुषु ।
गुरुणा सहितेष्वेषु कृतं गेहं श्रियायुतम् ।।३२।।
द्विदैवत्वाष्ट्रवारीशरुद्रादितिवसूडुषु ।
शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहम् ।।३३।।

---

४६४ व१ स्थिरा
४६५ वे.चौ. पुत्र
४६६ व२– प्रथमपादो भिन्नः–स्वर्गगस्त्वेकवीक्षस्थो
४६७ व१ स्वगह

हस्तार्यमत्वाष्ट्रदस्रचतुरास्येन्दुभेषु च ।
बुधेन सहितेष्वेषु धनपुत्रसुखप्रदम् ।।३४।।
गुरौ सिते वा सौम्ये वा गृहनिर्माणलग्नगे । [४६८]
तद्वर्गे वा कृतं गेहं धनधान्यसुखप्रदम्।।३५।।
स्वतुङ्गगे गुरौ शुक्रे बुधौ वा यदि लग्नगे।
तद्वर्गे वा कृतं गेहं सर्वसंपत्प्रदं सदा ।।३६।।
यत्रैकादशगे [४६९]सौम्ये खेटे चन्द्रेऽथवा रवौ ।
अशत्रुनीचराशौ चेत्तद्गृहं भूरिधान्यदम् ।।३७।।
शुभकेन्द्रत्रिकोणस्थे शत्रुनीचांशवर्जिते ।
सदा लाभप्रदं गेहमुच्चस्थं भूरिधान्यदम् ।।३८।।
शुभद्वये त्रये वापि यस्मिन्निर्माणलग्नगे ।
बहुकालस्थितं गेहं पुत्रपौत्रधनप्रदम् ।।३९।।
स्थिरराशिगते सूर्ये चरराशिगतेऽपि वा ।
गृहारम्भः सदा कार्यो न कार्यो द्विस्वभावगे ।।४०।।
मासे तपस्ये तपसि माधवे नभसि त्विषे ।
ऊर्जे च गृहनिर्माणं पुत्रपौत्रप्रवर्धनम् ।।४१।।
गीर्वाणपूर्वगीर्वाणमन्त्रिणोर्दृश्यमानयोः ।
शुक्लपक्षे दिवा कार्यं न निर्माणं च रात्रिषु ।।४२।।
अकारादिषु वर्गेषु दिक्ष्वष्टसु यथाक्रमम् ।
गृध्रमार्जारसिंहश्वसर्पाखुगजशाशकाः ।।४३।।[४७०]
दिग्वर्गाणामियं योनिः स्ववर्गात्पञ्चमो रिपुः ।
रिपुवर्गं परित्यज्य शेषवर्गः शुभप्रदः ।।४४।।
साध्यवर्गं पुरः स्थाप्य पृष्ठतः साधकस्य च ।

---

४६८ व२ द्वितीयपादतः श्लो.३६ गेहं-पर्यंतं लोपः

४६९ व१ सोम्ये

४७० व२ द्वितीयपङ्क्तिर्भिन्ना-तार्क्ष्मार्जारसिंहश्वसर्पाषुमृगमेषकाः।

विभजेदष्टभिः शेषं साधकस्य धनं स्मृतम् ।।४५।।
व्यत्ययेनागतं शेषं साधकस्य ऋणं स्मृतम् ।
धनाधिकमृणं स्वल्पं सर्वसंपत्प्रदं स्मृतम् ।।४६।।
विस्तारायामगुणितं गृहस्य पदमुच्यते ।
तस्माद्धनऋणान्यर्क्षवासराख्यनवांशकाः ।।४७।।
गृहस्यागतभं यत्र तद्धि राश्यात्मकं यदि ।
तन्नवांशवशात्तत्र ज्ञातव्यं सर्वदा गृहे ।।४८।।
गजरामाङ्कवस्वङ्कऋतुभिर्गुणितात्पदात् ।
सूर्याष्टाष्टर्क्षशैलाङ्कविभक्तादवशिष्टकाः ।।४९।।
सम्पूर्णा शुभदास्त्वेते त्वसम्पूर्णास्त्वनिष्टदाः ।
धनाधिकं गृहं वृद्ध्यै निधनाय ऋणाधिकम् ।।५०।।
विषमाय शुभायैव समायः शोकदुःखदः ।
गृहस्य तत्पतेस्त्वेकधिष्ण्यं च निधनप्रदम् ।।५१।।
विपत्प्रदा विपत्तारा प्रत्यरा प्रतिकूलदा ।
निधनाख्या तारका या सर्वदा निधनप्रदा ।।५२।।
विवर्ज्यास्तारकास्त्वेता निर्माणं शोभनप्रदम् ।
कुर्वन्नज्ञानतो मूढो दुःखभाग्व्याधिभाग्यदि ।।५३।।
राशिकूटादिकं सर्वं दम्पत्योरिव चिन्तयेत् ।
वैनाशिकादिऋक्षं यद्वर्जयेत्सर्वदा गृहे ।।५४।।
निःस्वं द्विर्द्वादशे नूनं त्रिकोणे त्वनपत्यता ।
षष्ठाष्टके नैधनं स्याद्व्यत्यये [४७१]नैधनं फलम् ।।५५।।
परेषु शुभदं गेहं सर्वं तत्कर्तृराशितः ।
सूर्यारवारराश्यंशाः सदा वह्निभयप्रदाः ।।५६।।
शेषा ग्रहाणां राश्यंशाः कर्तृरिष्टार्थसिद्धिदाः ।
तस्मात्सर्वं परीक्ष्यैतद्वदेज्ज्यौतिषिकः सदा ।।५७।।

---

४७१ व१ मध्यमं

गृहात्मको वास्तुपुरुषस्त्रिनेत्रः स्वेदसम्भवः ।
पूर्वादिदिक्छिरोवामपार्श्वशायी प्रदक्षिणम् ।।५८।।
चरवास्तु चरत्येवं पूजनीयो गृहाधिपैः ।
त्रिषु त्रिषु च मासेषु नभस्यादिषु च क्रमात् ।।५९।।
यदिङ्मुखो वास्तुपुरुषः सदनं तन्मुखं शुभम् ।
अन्यदिग्वक्त्रगेहं तु दुःखशोकभयावहम् ।।६०।।
चतुर्द्वित्र्यादिशालानामेष दोषो न विद्यते ।
प्रधानसदनं वीक्ष्य शङ्कुं तत्रैव विन्यसेत् ।।६१।।
अनुकूले ग्रहे वापि वास्तुं तत्र च विन्यसेत् ।
चतुःशालादिषु त्वेवं स्थापयेच्छङ्कुमुत्तमम् ।।६२।।
धान्यरत्नस्वर्णयुतां मृन्मयां [४७२]स्फाटिकां शुभाम् ।
गृहमध्ये हस्तमात्रे गर्ते न्यासाय विन्यसेत् ।।६३।।
वास्त्वायामदलं नाभिस्तस्मादध्यङ्गुलत्रयम् ।
कुक्षिस्तस्मिन्न्यसेच्छङ्कुं पुत्रपौत्रधनप्रदम् ।।६४।।
वितस्तिमात्रं शङ्कुः स्यात्सर्वेषां सर्वदा शुभम् ।
गन्धपुष्पाम्बरस्वर्णधूपदीपैरलङ्कृतम् ।।६५।।
रक्तचन्दनबिल्वाम्रखदिरार्जुनवैणवम् ।
नीपकरञ्जकुटजसालनिम्बतरूद्भवम् ।।६६।।
युग्मपत्रं महापत्रं गोरत्वक्कपजापकम् ।
रक्तसारविशालत्वक्चन्दनागुरुसम्भवम् ।।६७।।
शङ्कुं त्रिधा विभज्याद्यं चतुरस्रं द्वितीयकम् ।
अष्टास्रकं तृतीयांशं लिङ्गाकारमृजुं शुभम् ।।६८।।
मृदुध्रुवक्षिप्रभेषु रिक्तामावर्जितेषु च ।
व्यर्कारवारलग्नेषु क्रूरे चाष्टमवर्जिते ।।६९।।
न नैधनोदये कर्तुरष्टमे शुद्धिसंयुते ।

---

४७२ व२ लोपः स्फाटिकां-तः विन्यसेत्-पर्यन्तम्

स्थिरोदये स्थिरांशे च ग्रहज्ञार्चनपूर्वकम् ।।७०।।
शुभवारे शुभांशे च महादोषविवर्जिते ।
पुण्याहघोषैर्वादित्रैर्विप्राशीर्वचनैः सदा ।। ७१।।
त्रिकोणकेन्द्रस्वत्र्यायशुभैः षट्त्र्यायगैः परैः ।
आलग्न्यान्त्यारिचन्द्रेण स्थापयेच्छङ्कुमुत्तमम् ।।७२।।
शुभैर्यात्रोक्तशकुनैर्निमित्तैर्मङ्गलस्वनैः ।
षड्वर्गशुद्धिसूत्रेण सूत्रिते धरणीतले ।।७३।।
सूत्रिते समये तस्मिन्सूत्रं केनापि लङ्घितम् ।
तदाऽस्थि तत्र जानीयात्पुरुषस्य प्रमाणतः ।।७४।।
[४७३]त्वं योनिस्त्वं तथा तारा व्ययोऽथ भवनांशकम् ।
आयोऽथ गृहनामानि करणानि षडेव हि ।
गृहस्यैतानि चिन्त्यानि प्रयत्नेन च धीमता ।
अभ्यक्तो दृश्यते यस्यां दिशि शल्यं समादिशेत् ।
तस्यामेव तदास्थीनि सप्तत्यङ्गुलमानतः ।।७५।।
सूत्रिते समये यत्र [४७४]श्वासूत्रोपरि संस्थितः ।
तदास्थि तत्र जानीयात्षष्ठ्यङ्गुलमिते क्षितौ ।।७६।।
उच्चादेवागते तस्मिन्समये यत्र संस्थिते ।
तदास्थि तत्र जानीयाद्धस्तद्वयमिते क्षितौ ।।७७।।
चाण्डाले जटिले वापि तदा यस्यां दिशि स्थिते ।
तदास्थि तत्र जानीयादशीत्यङ्गुलमानतः ।।७८।।
नृगजाश्वपशूनां हि त्वेकस्मिन्यत्र संस्थितिः।
सदास्थि तत्र जानीयाद्धस्तत्रयमिते क्षितौ ।।७९।।[४७५]
तस्मिन्नवसरे यत्र गृहदाहो भवेद्यदि ।
मेषास्थि तत्र जानीयात्पुरुषस्य प्रमाणतः ।।८०।।

---

४७३ व२ स्वयोनित्यं, व१ लोपः त्वं-तः धीमत-पर्यन्तं
४७४ व२ त्वसद्येऽपरि
४७५ व२ पूर्णश्लोकलोपः

सूत्रे विसूत्रिते तस्मिन् भिन्ने कुम्भेऽथवा यदि ।
आदिशेन्निधनं तत्र दम्पत्योः क्रमशस्तदा ।।८१।।

इति निमित्तशल्यम् ।

षट्पदालयमादित्यस्यायस्कारगृहं शशी ।
कुजस्थानानि शल्यानि तयोर्मध्ये करत्रये[४७६] ।।८२।।

इति रवीन्दुनिमित्तशल्यम् ।

अवर्गोच्चारिते प्रश्ने प्राच्यां दिशि समादिशेत् ।
कुञ्जरास्थीनि पक्षैर्वा पुरुषस्य प्रमाणतः ।।८३।।
कवर्गोच्चरिते प्रश्ने त्वाग्नेय्यामादिशेद्दिशि ।
मार्जारस्याजशल्यं वा हस्तमात्रप्रमाणतः ।।८४।।
चवर्गोच्चारिते प्रश्ने याम्यायां[४७७] च समादिशेत् ।
हरेर्लुलायशल्यं वा हस्तमात्रप्रमाणतः ।।८५।।
टवर्गोच्चरिते प्रश्ने नैर्ऋत्यां च समादिशेत् ।
शुनः शल्यं नृशल्यं वा सार्धहस्तप्रमाणतः ।।८६।।[४७८]
तवर्गोच्चारिते प्रश्ने प्रतीच्यां च समादिशेत् ।
सर्पस्याण्डजशल्यं वा हस्तद्वयमिते क्षितौ ।।८७।।
पवर्गोच्चारिते प्रश्ने वायव्यां शल्यमादिशेत् ।
आखोर्मेषस्य वा नूनं हस्तखातप्रमाणतः ।।८८।।
यवर्गोच्चरिते प्रश्ने ह्युदीच्यामादिशेत्तदा ।
गजस्याश्वस्य वा शल्यं पूर्वखातप्रमाणतः ।।८९।।[४७९]
[४८०]शवर्गोच्चारिते प्रश्ने त्वैशान्यां च समादिशेत् ।
शशकस्योक्षशल्यं वा हस्तद्वयमिते क्षितौ ।।९०।।

---

४७६ व२ करस्थयोः
४७७ व२ दक्षिणस्यां वा
४७८ व२ पूर्णश्लोकलोपः
४७९ व२ ८८,८९ श्लोकलोपौ
४८० व२ पवर्ग-

प्रश्नेत्युच्चारिते वेधे ब्रह्मस्थाने समादिशेत्।
नृशल्यं गजशल्यं वा नरखातप्रमाणतः ।।९१।।
प्रश्नेऽप्युच्चारिते यत्र नूनं वर्गस्य पञ्चमे ।
न विद्यते तत्र शल्यं ब्रह्मोक्तत्वान्न संशयः ।।९२।।
इति प्रश्नशल्यम्।
एकाद्वित्रिचतुःपञ्चषट्सप्ताष्टादशाह्वयाः ।
शालाः स्युर्दशभेदास्ताः सहिता नवशालयः ।।९३।।
आलिन्दभेदैरेताः स्युः प्रत्येकं दशषड्विधाः ।
षष्ठिभिः सहिताः सप्तमिताः शालाः प्रकीर्तिताः ।।९४।।
ताश्चापि रूपादिग्रामप्रस्तारैर्विविधाः स्मृताः ।
तेषां समस्तभेदानां प्रस्तारमधुनोच्यते ।।९५।।
गुरोरधो लघुः स्थाप्यः पुरस्तादूर्ध्ववन्न्यसेत् ।
गुरुभिः पश्चिमं पूर्वं सर्वलघ्ववधिर्विधिः ।।९६।।
स्यादलिन्दं लघुस्थाने नालिन्दं गुरुमाश्रितम् ।
गृहद्वारादलिन्देषु भवेयुर्दशषड्विधाः ।।९७।।
ध्रुवं धान्यं जयं नन्दं खरं कान्तिं मनोरमम् ।
सुवक्त्रं दुर्मुखं क्रूरं विपक्षं धनदं क्षयम् ।।९८।।[४८१]
आक्रन्दं विपुलं चैव षोडशं विजयं गृहम् ।
इत्येवं शालभेदानि शेषाणामेवमेव हि ।।९९।।
ध्रुवसंज्ञं गृहं त्वायं धनधान्यसुखप्रदम् ।
धनधान्यप्रदं नृणां जयं तद्विजयप्रदम् ।।१००।।[४८२]
नन्दं स्त्रीहानिदं नूनं खरं सम्पद्विनाशनम् ।
पुत्रपौत्रप्रदं कान्तं श्रीप्रदं यन्मनोरमम् ।।१०१।।[४८३]
सुवक्त्रं भोगदं नूनं दुर्मुखं विसुखप्रदम् ।

---

४८१ व२ ९६,९७,९८श्लोकलोपाः
४८२ व१,व२ द्वितीयपङ्क्तिक्तिलोपः
४८३ व२ नन्दं-तः सर्वदुःखप्रद-पर्यन्तं लोपः

सर्वदु:खप्रदं क्रूरं विपक्षं शत्रुभीतिदम् ।।१०२।।
धनदं धनदं गेहं क्षयं सर्वक्षयप्रदम् ।
विजयं नाम सदनं धनदं विजयप्रदम् ।।१०३।।
ध्रुवाख्यं द्वित्रिभूमायं सौधसंज्ञं धरातलम् ।
सुवर्णशिखर: सोऽपि प्रासाद: सर्वभूभुजाम् ।।१०४।।
सौधाख्यं सदनं शश्वद्धनधान्यप्रदं सदा ।
प्रासादसदनं शश्वद्धनारोग्यसुखप्रदम् ।।१०५।।
पुरतो मण्डपं चास्य तदेव भुवनेश्वरम् ।
तद्गृहं विश्वरूपाख्यं सर्वसंपत्प्रदं सदा ।।१०६।।
[४८४]धान्याख्यं सदनं द्वित्रिचतु:पञ्चादिभूमिकम् ।
भूरिचन्द्रं महीपानां वित्तवृत्तसुखप्रदम् ।।१०७।।
जयाख्यनामसदनं द्वितीयाद्यं तु भूमिकम् ।
विमुखं नाम तद्गेहं भार्यानाशप्रदं सदा ।।१०८।।
नन्दाख्यं सदनं यत्र द्वितीयाद्यं तु भूमिकम् ।
पूर्णचन्द्रं महद्गेहं सुखदं सर्वभूभुजाम् ।।१०९।।[४८५]
खरं गेहं यदा यत्र द्वितीयाद्यं तु भूमिकम् ।
आसुरं नाम सदनं दु:खशोकभयप्रदम् ।।११०।।[४८६]
प्रासादो वाथ सौधो वा मनोरमगृहं यदा ।
आनन्दसदनं नाम चित्तानन्दप्रदं सदा ।।१११।।[४८७]
प्रासादो वाथ सौधो वा सुवक्त्रवदनं यदा ।
हाटकं नाम सदनं सदा हाटकदं शुभम् ।।११२।।

---

४८४ वे. धन्याख्यं

४८५ व२ श्लोकलोप:

४८६ व२ प्रासादो वाथ सौधो वा कान्ताख्यसदनं यदा ।
कामनीयनृपाणां च सर्वकामप्रद: सदा।।

४८७ व२ श्लोकलोप:

प्रासादो वाथ सौधो वा दुर्मुखं सदनं यदा ।
दुर्मुखं नाम सदनं सर्वकार्यविनाशनम् ॥११३॥
प्रासादो वाथ सौधो वा क्रूराख्यं सदनं यदा ।
क्रूराख्यं सदनं नाम दुःखशोकभयप्रदम् ॥११४॥
प्रासादो वाथ सौधो वा विपक्षसदनं यदा ।
शत्रुसंज्ञं च तद्गेहं सर्वदा शत्रुभीतिदम् ॥११५॥
प्रासादो वाथ सौधो वा धनदाख्यं गृहं भवेत् ।
धनधान्यप्रदं गेहं धनधान्यसुखावहम् ॥११६॥
प्रासादो वाथ सौधो वा क्षयाख्यं सदनं यदा ।
आयुःक्षयं नाम गृहं सर्वदा तत्प्रदं ततः ॥११७॥
प्रासादो वाथ सौधो वा त्वाक्रन्दं सदनं यदा ।
आक्रन्दं नाम सदनं वह्निभीतिप्रदं सदा॥११८॥
विपुलाख्यं यदा यत्र सौधः प्रासाद एव वा ।
विपुलं नाम सदनं विपुलं धनधान्यदम् ॥११९॥
विजयाख्यं यदा नूनं सौधः प्रासाद एव च ।
विजयं नाम सदनं सर्वदा विजयप्रदम् ॥१२०॥
विजयं नाम भवति सदनं सहितं यदा ।
तद्ध्रुवं विजयं नाम स्मरणाद्विजयप्रदम् ॥१२१॥
एकशाला यदा नूनं चतुर्द्वारसमन्वितम् ।
मनोरथप्रदं गेहं नाम्ना तद्विश्वतोमुखम् ॥१२२॥
तदैव प्रवरैर्युक्तं कोणमध्येऽथ तद्गृहम् ।
पुण्डरीकं नाम भवेत्सर्वकामफलप्रदम् ॥१२३॥
पश्चिमद्वारहीनं तद्गृहं श्रीनिलयाह्वयम् ।
श्रीप्रदं सर्वदा राज्ञां पुत्रपौत्रप्रवर्धनम् ॥१२४॥
उदग्द्वारविहीनं तच्छूकरस्य पदाह्वयम् ।
सूकराद्भयदं नूनमथवा भूपतेर्भयम् ॥१२५॥
पूर्वद्वारविहीनं तद्व्याघ्रस्य पदसंज्ञकम् ।

चतुष्पाद्भयदं गेहमथवा तस्कराद्भयम् ।।१२६।।
दक्षिणद्वारहीनं तद्गृहं शेखरसंज्ञकम् ।
सर्ववस्तुप्रदं गेहं सर्वरत्नप्रदं सदा ।।१२७।।
इत्येकशालाभेदानि द्विशालाभेदमुच्यते ।
द्विशालां कर्तुकामो यः कुर्यात्सम्यक्परीक्षणम्[४८८] ।।१२८।।
[४८९]याम्यपश्चिमयोर्नूनं द्विशालं कमलाकरम् ।
नामतः सर्वदा नृणां श्रीप्रदं सर्वभोगदम् ।।१२९।।
पश्चिमोत्तरयोः शाला श्वापदं नाम नामतः ।
हृद्रोगदुःखभयदमथवा चौरभीतिदम् ।।१३०।।
प्राक्सौम्ययोर्द्विशाला सा विपक्षा दुःखकर्षिणी ।
शत्रुभ्यो भयदा शश्वदथवा चौरभीतिदा ।।१३१।।
पूर्वदक्षिणयोर्नूनं द्विशाला सर्पदंष्ट्रिका ।
आधिव्याधिव्यालचौरविशेषभयदा सदा ।।१३२।।
याम्यपश्चिमयोरेव द्विशाला मङ्गलाष्टदा ।
प्रासादो वाथ सौधो वा तस्यामेव तु कारयेत् ।।१३३।।
अन्यदिक्षु द्विशालासु नैःस्वं शोकं लभेन्नरः ।
तस्माद् द्विशालां वान्यत्र प्रयत्नात्परिवर्जयेत् ।।१३४।।
द्विशालाद्यासु सर्वासु द्वित्रिपञ्चादिभूमिकैः ।
एवं षोडश सद्मानि भवन्त्यत्राप्यनुक्रमात् ।।१३५।।
खण्डेन्दुसंज्ञकं त्वाद्यं द्वितीयं बुद्धिवर्धनम् ।
तृतीयं शङ्खसंज्ञं तु धनायुःस्त्रीप्रदानि वै ।।१३६।।
चतुर्थपञ्चमं सद्म स्त्रीसौभाग्यविनाशदम् ।
षष्ठसप्ताष्टमं गेहं लाभायुःश्रीप्रदं सदा ।।१३७।।

---

४८८ व२ परीक्षितं

४८९ व२ - सर्ववस्तुपदगृहे सर्वरत्नप्रदा सदा ।
प्रत्येकशालाभेदेन द्विशालाभेदमुच्यते।।

नवैकादशमं दु:खरोगशोकभयप्रदम् ।
द्वादशं सदनं नूनं धनधान्यप्रदं सदा ।।१३८।।
शोकदु:खप्रदं शश्वत्त्रयोदशचतुर्दशम् ।
षोडशं पञ्चदशमं त्वायुरारोग्यवृद्धिदम् ।।१३९।।
उक्ता द्विशालाभेदानि नामरूपफलै: सह ।
त्रिशालानामभेदानि अधुना कथ्यते भृशम् ।।१४०।।
उदङ्मुखा त्रिशाला सा जयन्ती संज्ञिता त्वथ ।
विपुला कीर्तिदा राज्ञां पुत्रपौत्रधनप्रदा ।।१४१।।
प्राग्द्वारसहिता सा च नाम्ना हरिपदाह्वयम् ।
तदीप्सितार्थफलदं राज्ञां मुख्यतरं सदा ।।१४२।।
सा दक्षिणद्वारयुता चोष्ट्रदंष्ट्राह्वया भुवि ।
नि:स्वप्रदा क्षितीशानामथवा शत्रुभीतिदा ।।१४३।।
पश्चिमद्वारसहिता सर्वदा कुसुमाह्वया ।
मित्रवृद्धिप्रदा नृणामथवा भ्रातृवृद्धिदा ।।१४४।।
नानाकल्याणदा: शश्वत्पुत्रपौत्रप्रवर्धिनी ।
प्राङ्मुखा या त्रिशाला सा नक्षत्रपदसंज्ञिता ।।१४५।।
सर्वदा धनदा नृणां दु:खशोकविनाशदा ।
उदग्द्वारयुता सा च स्वर्णगर्भाह्वया क्षितौ ।।१४६।।
स्वर्णदास्वपरं चोदङ्मुखायां यत्फलं तु तत् ।
कुलक्षयकरा सैव त्रिशाला दक्षिणामुखा ।।१४७।।
शालानां पापसंज्ञानां दृष्ट्वा सूर्यं निरीक्षयेत् ।
प्रत्यङ्मुखा त्रिशाला सा क्षयाख्या नामतस्तथा ।।१४८।।
बहुव्ययकरी सैव पुत्रायुर्धननाशदा ।
गृहोपरि गृहाणां च सम्यक्संचिन्त्य बुद्धिमान् ।।१४९।।
प्रस्तारं यन्मनोरम्यं नानारूपप्रभेदत: ।
उक्ता त्रिशालाभेदानि चतु:शालामथोऽच्यते ।।१५०।।
पितामहोक्तमार्गेण नामरूपफलै: पृथक् ।

चतु:शाला चतुर्भेदा सर्वतो भद्रसंज्ञिता ।।१५१।।
आयुरारोग्यविपुला कीर्तिसंपत्प्रदा नृणाम् ।
पश्चिमद्वारसहिता नद्यावर्ताह्वया भृशम् ।।१५२।।
सुगन्धवस्तुनिचयवस्त्ररत्नप्रदा सदा ।
उत्तरद्वारसहिता शश्वत्सा रुचकाह्वया ।।१५३।।
अन्नपानादिनिखिलभोगसौभाग्यपुत्रदा ।
प्राग्द्वारसहिता सैव स्वस्तिकेति प्रकीर्तिता ।।१५४।।
गजाश्वपशुलोहादिभूषणश्रीप्रदा नृणाम् ।
दक्षिणद्वारसहिता वर्धमानाह्वया भुवि ।।१५५।।[४९०]
तत्रस्थसर्ववस्तूनि वर्धन्ते वै श्रिया सह ।
चतु:शालामध्यभागे कुर्यात्पूर्वमुखं गृहम् ।।१५६।।
गृहराडिति विख्यातं सर्वसंपत्प्रदं सदा ।
तद्गृहं याम्यवक्त्रं चेत्कुबेरपदसंज्ञकम् ।।१५७।।
शश्वत्कुबेरगृहवदालये सर्वसंपदाम् ।
प्रत्यग्वक्त्रं मन्दिरं वै महेन्द्रपदसंज्ञितम् ।।१५८।।
इन्द्रवेश्म यथा सर्वसंपद्युक्तं तथैव तत् ।
उदङ्मुखं तत्सदनं वारुणं पदसंज्ञितम् ।
सर्वरत्नालयं गेहं सर्वभागसुखावहम् ।।१५९।।
प्रासादो वाथ सौधो वा तद्गृहे वै भवेद्यदि ।
तच्चन्द्रशेखरपदं निधीनामालयं भृशम् ।।१६०।।
कोणेष्वयचरं कुर्यान्महेन्द्रपदसंज्ञितम् ।
महेन्द्रनिलयं यद्वत्तद्वच्च संपदालयम् ।।१६१।।
अस्यामपि द्वित्रिचतु:पञ्चषट्सप्तभूमिकै: ।
षोडशाख्यानि जातानि तानि प्रस्तारत: क्रमात् ।।१६२।।
पञ्चादिदशपर्यन्ता: शालास्त्वेवं प्रकल्पयेत् ।

---

४९० व१ दक्षिणद्वार-त: श्रिया सहपर्यन्तं लोप:

प्रास्तारनामदिग्रूपफलैर्यो वास्तुकोविदः ।।१६३।।
ऐन्द्र्यां दिशि स्नानगेहमाग्नेय्यां पचनालयम् ।
याम्यायां शयनं वेश्म नैर्ऋत्यां शस्त्रमन्दिरम् ।।१६४।।
वारुण्यां भोजनगृहं वायव्यां पशुमन्दिरम् ।
उदीच्यां हाटकं सद्म ऐशान्यां देवमन्दिरम् ।।१६५।।
ध्वजधूमहरिश्वाख्यवृषगर्दभकुञ्जराः ।
ध्वाङ्क्षश्चैते क्रमादायाः स्वस्थाने स्वगृहे शुभाः ।।१६६।।
ऐन्द्राग्न्योर्मथनं मध्ये याम्याग्न्यो रतिमन्दिरम् ।
याम्यराक्षसयोर्मध्ये पुरीशत्यागमन्दिरम् ।।१६७।।
राक्षसाम्बुपयोर्मध्ये विद्याभवनमन्दिरम् ।
तोयेशानिलयोर्मध्ये सदनं रोदनं ततः ।।१६८।।
कामोपभोगसदनं वायुकौबेरमध्ययोः ।
कौबेरैशानयोर्मध्ये चिकित्सासदनं सदा ।।१६९।।
पुरन्दरेशयोर्मध्ये सर्ववस्तुसुसंग्रहम् ।
सदनं कारयेदेवं क्रमादुक्तानि षोडश ।।१७०।।
ध्वजः सिंहे तौ च गजे त्वेते गवि शुभप्रदाः ।
वृषो न पूजितोऽन्यत्र[४९१] ध्वजः सर्वत्र पूजितः ।।१७१।।
गृहोपरि गृहादीनामायमात्रं प्रकल्पयेत् ।
न षड्वर्गशङ्कुमपि स्थापयेदायसद्मनि ।।१७२।।
मन्दिराणामष्टविधं जलस्रावं [४९२]क्रमेण वै ।
पाञ्चालमानं वैदेहं कौरवं क्रौरजन्यकम् ।।१७३।।
मागधं शूरसेनाख्यं गान्धरावन्तिसंज्ञकम् ।
एषामष्टविधानां च प्रमाणं सम्यगुच्यते ।।१७४।।
स्वचतुर्भागविस्तारे सोत्सेधं यत्तदुच्यते ।
पाञ्चालमितरेषां च द्व्यङ्गुलोत्तरवृद्धिदः ।।१७५।।

---

४९१ व१ ऽन्यत्र–तः श्लोकलोपः
४९२ व२ प्रकल्पयेत्

वैदेहादीनि सर्वाणि मानानि स्युर्यथाक्रमात् ।
पाञ्चालः सर्ववर्णानां वैदेहः शूद्रजातिषु ।।१७६।।
आवन्तिकं चाग्रजानां गान्धारः सर्वभूभुजाम् ।
विशां कौजन्यकं मानं वैदेहं शूद्रजातिषु ।।१७७।।
सामान्यमन्यमानानि विप्रादीनां यथाक्रमात् ।
गृहोपरिगृहादीनां जलस्रावं यथोच्यते ।।१७८।।
नानाविधानि हर्म्याणि जालकाचित्रितानि च ।
पश्चिमे दक्षिणे चैव गवाक्षं मन्दिरस्य च ।।१७९।।
गजाये वा ध्वजाये वा गजानां मन्दिरं शुभम् ।
अश्वालयं ध्वजाये वा खराये वा वृषेऽपि वा ।।१८०।।
उष्ट्राणां मन्दिरं कार्यं गजाये वा वृषे ध्वजे ।
पशुसद्म वृषाये वा ध्वजाये दा शुभप्रदम् ।।१८१।।
शय्यासु वृषभः शस्तः पीठे सिंहः शुभप्रदः ।
अन्यत्रछत्रवस्त्राणां वृषभाये ध्वजेऽपि वा ।।१८२।।
पादुकौपानहौ कार्यौ सिंहायेऽप्यथवा ध्वजे ।
उक्तानामप्यनुक्तानां मन्दिराणां ध्वजः शुभः ।।१८३।।
उदुम्बरप्लक्षनिम्बचूतस्नुहिबिभीतकः ।
बदरीखदिरं त्यक्त्वा निन्दिताः कण्टकद्रुमाः ।।१८४।।
वटाश्वत्थकपित्थाख्यतिन्तिणीकतकद्रुमाः ।
अगस्तिशिग्रुपालाशदुग्धवृक्षाश्च निन्दिताः ।।१८५।।
करञ्जैरण्डनिर्गुण्डीगृहशालाश्च निन्दिताः ।
स्वगृहात्पश्चिमे याम्ये पितुः स्वाग्रजमन्दिरम् ।।१८६।।
गृहपादा गृहस्तम्भाः समाः कार्याश्च नासमाः ।
नात्युच्छ्रितं नातिनीचं कुड्योत्सेधं यथा रुचिः ।।१८७।।
भित्तिः पक्वेष्टकाभिर्वा दारुणाप्यथवा मृदा ।

कार्या चित्रपटैर्वापि तृणैः पर्णैश्च न क्वचित् ।।१८८।।[४९३]
ऐश्वर्यं पुत्रहानिश्च स्त्रीहानिर्निधनं भवेत् ।
संपच्छत्रुभयं सौख्यं पुष्टिः प्राच्यादितः क्रमात् ।।१८९।।
कूपे कृते मध्यमे तु धनहानिश्च वास्तुनः ।
तस्मात्सम्यग्विचार्याथ कूपं कुर्याच्च बुद्धिमान् ।।१९०।।
पुन्नागाशोकतिलकशमीबकुलचम्पकाः ।
दाडिमीपिप्पलीद्राक्षापिचुमन्दाजयामराः ।।१९१।।
बन्धूकपूगपनससरोजगृहमल्लिकाः ।
मल्लिकापाटलीजातीनारिकेरास्तृणद्रुमाः ।।१९२।।
एते गृहाङ्गणे वृक्षाः सर्वदामङ्गलप्रदाः ।
प्लक्षकर्कन्धुवृक्षौ द्वौ गृहस्योत्तरतः शुभे ।।१९३।।
न्यग्रोधोदुम्बराश्वत्थाः प्रागादिषु शुभप्रदाः ।
अगस्तिमातुलिङ्गाख्या हरिद्राकदलीस्तथा ।।१९४।।[४९४]
स्वयं प्रजाता अप्येते दुःखशोकभयप्रदाः ।
निर्माणे मन्दिराणां च प्रवेशे त्रिविधेऽपि च ।।१९५।।
वास्तुपूजा च कर्तव्या तस्मात्तां कथयाम्यथ ।
गृहमध्ये हस्तमात्रं समन्तात्तण्डुलोपरि ।।१९६।।
एकाशीतिपदं कार्यं तिलैस्तुल्यं सुशोभनम् ।
एकद्वित्रिपदाः पञ्चचत्वारिंशत्सुरार्चिताः ।।१९७।।
द्वात्रिंशद्बाह्यतो वक्ष्यमाणाश्चान्तस्त्रयोदश ।
तेषां स्थानानि नामानि वक्ष्यामीश्वरकोणतः ।।१९८।।
तत्राग्निशम्भुकोणस्थस्त्वसौ चैव पदेश्वरः ।
तस्माद् द्वितीयः पर्जन्यश्चासावेकपदेश्वरः ।।१९९।।
जयन्त्येन्द्रार्कसत्याख्या भृशाश्च द्विपदेश्वराः ।

---

४९३ व१ श्लोकलोपः

४९४ व२ श्लो.१९३ द्वितीयपङ्क्तितः १९५ द्वितीयपङ्क्तिपर्यन्तं लोपः

आकाशवायुपरतः क्रमादेकपदेश्वराः ।।२००।।
एवं प्राच्यां नव ज्ञात्वा नवमे वान्यदिक्षु च ।
आद्यश्चान्तावेकपादा[४९५] द्विपादाः पञ्च मध्यमाः ।
पूषाद्यष्टौ यमान्ताः स्युरमरा याम्यभागगाः ।।२०१।।[४९६]
अष्टौ पितृगणाधीशा यमान्ताः पश्चिमे सुराः ।
आद्यन्तौ द्वौ चैकपदौ द्विपदाः पञ्च मध्यगाः ।।२०२।।
रोगादिरित्यन्तात्सुराः सप्त सौम्यादिशि क्रमात् ।
तदधस्थश्चतुष्कोणेष्वीशानादिषु च क्रमात् ।।२०३।।
आपः सावित्रविजयरुद्राश्चैकपदेश्वराः ।
मध्ये नवपदो ब्रह्मा तस्येशानादिकोणगाः ।।२०४।।
आपवत्सोऽथ सविता विबुधाधिपसंज्ञकाः ।
राजयक्ष्मा च चत्वारः सुराश्चैकपदेश्वराः ।।२०५।।
ब्रह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अमी ।
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात् ।।२०६।।
स्वस्वस्थानेषु देवेषु स्थापितेष्वीदृशं भवेत् ।
कोणेषु पञ्च पञ्चैव चतुष्वैकपदाः सुराः ।।२०७।।
प्रागादिदिक्षु द्विपदाः पञ्च पञ्च यथाक्रमात् ।
ब्रह्मणः पूर्वतो दिक्षु द्विपदाः [४९७]स्युः समीपगाः ।।२०८।।
हिरण्यरेताः पर्जन्यो जयन्तः पाकशासनः ।
सूर्यसत्यौ भृशाकाशौ वायुः पूषा च वै तथा ।।२०९।।
गृहक्षतः पितृपतिर्गन्धर्वो भृङ्गराजकः ।
मृगः पितृगणाधीशः स्थाप्यो दौवारिकाह्वयः ।।२१०।।
सुग्रीवः पुष्पदन्तश्च जलाधीशो निशाचरः ।

---

४९५ व१पदौ द्विपदाःपंचमध्यगाः
४९६ व१ तृतीयपङ्क्तिलोपः
४९७ व२ स्युः -तः श्लो. २१४पर्यन्तं लोपः

शोषः पापश्च रोगो हि मुखो भल्लाट एव च ।।२११।।
सोमसर्पौ दित्यदिती द्वात्रिंशदमराः स्मृताः ।
आपश्चैवापवत्सश्च जयो रन्ध्रस्तथैव च ।।२१२।।
मध्ये नवपदो ब्रह्मा तस्थौ तस्य समीपगः ।
प्रागाद्यन्तरिता देवाः परितो ब्रह्मणः स्मृताः ।।२१३।।
अर्यमा सविता चैव विवस्वान्विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।।२१४।।
आपवत्सोऽष्टमः पञ्चचत्वारिंशत्सुरोत्तमाः ।
ज्ञात्वैवं स्थाननामानि ब्रह्मणा सहितान्न्यसेत् ।।२१५।।
वास्तुज्ञो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः ।
प्रणवेनार्चयेद्वापि अथवा स्वस्वनामभिः ।।२१६।।
शुक्लवस्त्रयुगं दद्याद्धूपदीपफलैः सह ।
अपूपैर्भूरिनैवेद्यैर्वाद्यैः सह समर्पयेत् ।।२१७।।
ताम्बूलं च ततो दद्याद्देवेभ्यश्च पृथक्पृथक् ।
दत्त्वा पुष्पाञ्जलिं कर्ता प्रार्थयेद्वास्तुपूरुषम् ।।२१८।।
विप्रेभ्यो भोजनं दत्त्वा स्वयं भुञ्जीत बन्धुभिः ।
नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो ।।२१९।।
मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा ।
इति प्रार्थ्य ततो दद्याद्दक्षिणामर्चकाय च ।।२२०।।
एवं यः कुरुते सम्यग्वास्तुपूजां प्रयत्नतः ।
आरोग्यं पुत्रपौत्रादिधनधान्यं लभेन्नरः ।।२२१।।
वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे ।
रोगान्नानाविधान्क्लेशानश्नुते सर्वसंकटान् ।।२२२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां वास्त्वध्याय एकोनचत्वारिंशः ।।३९।।

४०

२.४०.० सुरप्रतिष्ठा

अथ प्रतिष्ठां कथयामि सम्य-
क्छिवस्य विष्णोश्च तथा परेषाम् ।
सौम्यायने देवगुरौ च शुक्रे
संदृश्यमाने [४९८]यदि वारकाणाम् ।।१।।
मासे तपस्ये तपसि प्रतिष्ठा
धनायुरारोग्यकरी च कर्तुः ।
चैत्रे महारुग्भयदा च शुक्रे
समाधवे पुत्रधनप्रदा सा ।।२।।
आषाढमासादिचतुष्टये च
कलत्रसन्तानविनाशदा च ।
ऊर्जे च कर्तुर्निधनप्रदा च सौम्ये
सपौषेऽखिलदुःखदा सा ।।३।।
वलक्षपक्षः शुभदः समस्तः
सदैव तत्राद्यदिनं विहाय ।
अन्त्यत्रिभागं परिहृत्य कृष्णे
पक्षोऽपि शस्तः खलु पक्षयोश्च ।।४।।
रिक्तावमात्यक्तदिनेष्वनिन्द्य-
योगेषु वैनाशिकवर्जितेषु ।
दिने महादोषविवर्जिते च
शशाङ्कताराबलसंयुतेऽपि ।।५।।
देवस्य यस्योडुतिथिप्रशस्ते
संस्थापने कर्मणि वासरश्च ।

---

४९८ व१,व२ परि

कर्तुर्दिनेशस्य बलं सदैव
ग्रामाधिपग्रामबलं विचार्यम् ।।६।।
हस्तत्रये मित्रहरित्रये च
पौष्णद्वयादित्यसुरेज्यभेषु ।
तिस्रोत्तराधातुशशाङ्कभेषु
सर्वामरस्थापनमुत्तमं स्यात् ।।७।।
कीर्तिप्रदं क्षेमकरं कृशानो-
र्भयप्रदं वृद्धिकरं नृपाणाम् ।
लक्ष्मीकरं सुस्थिरदं त्विनादि-
वारेषु संस्थापनमामनन्ति ।।८।।
पञ्चाङ्गशुद्धौ दिवसे दिनस्य
पूर्वार्धभागे शुभदे मुहूर्ते ।
शुभग्रहैर्वीक्षितसंयुते वा
न नैधने नैधनशुद्धिलग्ने ।।९।।
पञ्चेष्टिके जीवशशाङ्कसूर्य-
मुख्यग्रहैः सौम्यनवांशयुक्तैः ।
लग्ने स्थिरे चोभयराशिलग्ने
नवांशके चोभयभे स्थिरे वा ।।१०।।
चरोदये लग्नगते न कार्यं
संस्थापनं नैव चरांशकेऽपि ।
चरोऽपि मुख्यः स तुलांशकश्च
सदा मृदुत्वात्सुरसन्निवेशे ।।११।।
सूर्येन्दुभौमार्क्यहिकेतवश्च
लग्नस्थिता नैधनदाश्च कर्तुः।
सौम्यग्रहा लग्नगताः सदा ते
त्वायुर्धनारोग्यकराश्च नूनम् ।।१२।।
लग्नाद् द्वितीये शुभखेचरेन्द्रा-

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

श्चन्द्रश्च पुत्रार्थशुभप्रदाः स्युः ।
तत्रैव पापः पतिपक्षदुःख-
शोकप्रदा व्याधिकराः सदैव ॥१३॥
असौम्यसौम्या हिमदीधितिश्च
तृतीयगा लाभकरा नितान्तम् ।
चतुर्थगा लाभकराश्च सौम्या-
श्चन्द्रश्च पापा विसुखप्रदाः स्युः ॥१४॥
आनन्ददाः पञ्चमगाश्च सौम्या
विधुश्च पापा रिपुभीतिदाः स्युः ।
शत्रुस्थिताः शत्रुविनाशदाः स्युः
क्रूराः सचन्द्रा भयदास्तु सौम्याः ॥१५॥
द्यूनस्थिता सेन्दुशुभा दिशन्ति
लाभं परे प्रीतिहराः सदैव ।
सर्वे ग्रहा नैधनदास्त्वजस्रं सौम्या-
स्त्वसौम्याः खलु मृत्युसंस्थाः ॥१६॥
नवमस्थानगाः सौम्याः सेन्दवो विजयप्रदाः ।
असौम्या नवमस्थाने दुःखशोकभयप्रदाः ॥१७॥
दशमस्थानगाश्चन्द्रसहिताः शुभखेचराः ।
अर्थलाभकराः पापा व्याधिशत्रुभयप्रदाः ॥१८॥
लाभस्थानगताः सर्वे खेचरा बहुलाभदाः ।
व्ययदा व्ययगाः पापा सेन्दवः शोकदाः शुभाः ॥१९॥
एकोऽपि जीवो बलवान्तनुस्थः
सितोऽपि सौम्योऽप्यथवा बली चेत् ।
दोषान्शेषन्विनिहन्ति सद्यः
स्कन्दो यथा तारकदैत्यवर्गम् ॥२०॥
हन्त्यर्थहीनं त्वमरप्रतिष्ठा
कर्तारमृत्विग्वरविप्रमुख्यम् ।

मन्त्रैर्विहीनं त्वथ कर्तृभार्यां
यदा तदा लक्षणहानितश्च[४९९] ।।२१।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां सुरप्रतिष्ठाध्यायश्चत्वारिंशः ।।४०।।

---

४९९ व१ हीनतश्च

४१

२.४१.० गुणनिरूपणम्

काल एवेश्वरः साक्षादीश्वरः काल एव सः ।
विद्यते चेश्वरज्ञानी चेत्कालज्ञः स एव वै ।।१।।
तस्मात्कालं न जानन्ति योगिनोऽपि महीतले ।
तथापि देहिनां नूनं हिताय कमलासनः ।।२।।
भचक्रभ्रमणात्स्थूलकालं कल्पितवान्प्रभुः ।
प्राणादिदिनमासादियुगान्तं चैव भग्रहैः ।।३।।
शुभाशुभग्रहोत्पातपञ्चाङ्गतिथिवारजैः ।
तिथिनक्षत्रवारोत्थवारनक्षत्रपूर्वकैः ।।४।।
एवमाद्यैर्गुणैर्दोषैर्नित्यं कालः समन्वितः ।
तस्मात्कालगुणान्दोषान्कथयामि पृथक्पृथक् ।।५।।
[500]नन्दास्वम्बुपवित्राग्निरौद्रविष्णूत्तरात्रयम् ।
वारयोगा भवन्त्येते सर्वकार्ये शुभप्रदाः ।।६।।
भद्रास्वदितिदैत्येज्ये कमलासनतारकाः ।
श्रेष्ठयोगा भवन्त्येते सर्वदा मङ्गलप्रदाः ।।७।।
जयासु वसुसोमार्कदस्रान्त्येज्यभत्र्युत्तराः ।
शुभयोगास्त्वमी नृणां मङ्गले मङ्गलप्रदाः ।।८।।
रिक्तास्वीज्यद्विदैवेन्द्रसार्पवायव्यतारकाः ।
तदा कल्याणयोगाः स्युः सर्वकार्येषु शोभनाः ।।९।।
पूर्णासु पुष्यपौष्णाद्यवसुवारीशतारकाः ।
वर्धमानाह्वया योगाः शुभकार्यप्रवृद्धिदाः ।।१०।।
उत्तरात्रयपौष्णेज्यमूलार्कहरितारकाः ।
चित्रेन्द्वदितयः सौम्या योगाः स्युर्भानुवासरे ।।११।।

---

५०० व१,व२ चित्राग्नि

सोमवारे दितिमरुद्वैष्णवत्रयतारकाः ।
रोहिणीद्वयशाक्रेज्या महायोगाः प्रकीर्तिताः ।।१२।।
उत्तरात्रयमैत्रेज्यदस्रात्येन्द्वग्नितारकाः ।
भौमवारेण संयुक्ताः पूर्णयोगाः प्रकीर्तिताः ।।१३।।
बुधवारे[५०१] सुरेज्येन्दुधातृवह्नित्रिरुत्तराः ।
हस्तत्रयानिला[५०२]स्ताराः शङ्खयोगाः प्रकीर्तिताः ।।१४।।
[५०३]गुरुवारेऽदितीज्यार्कत्रयमित्रान्त्यतारकाः ।
श्रवणत्रयमित्येते योगाश्चामृतसंज्ञकाः ।।१५।।
रेवतीद्वयहस्तेन्दुधातृमित्रत्रिरुत्तराः ।
शुक्रवारेण संयुक्ताः पद्मयोगाः प्रकीर्तिताः ।।१६।।
रोहिणीद्वयपुष्येन्द्रविष्णुत्रयमघोत्तराः ।
शनिवारेण संयुक्ता योगाश्चानन्दसंज्ञकाः ।।१७।।
हस्तेन्दुदस्रमित्रेज्यपौष्णपद्मजतारकाः ।
आदित्यादिषु वारेषु सिद्धियोगाः क्रमादमी ।।१८।।
मूलहर्य्युत्तराभाद्रकृत्तिकादित्रयः क्रमात् ।
भाग्यानिलाख्याः पीयूषयोगा वारेष्विनादिषु ।।१९।।
स्वतुङ्गस्वांशगो जीवो यदि लग्नसमन्वितः ।
बलवान्वीक्षयेद्वापि योगः कपिलसंज्ञकः ।।२०।।
परमोच्चगतो[५०४] जीवो वीक्षयेद्वा विलग्नगः ।
समुद्रयोगो विज्ञेयो योगराड्बलसंयुतः ।।२१।।
लग्नमालोकयेज्जीवस्त्वथवा लग्नगो बली ।
वापीयोगः स विज्ञेयस्त्वधिमित्रगृहस्थितः ।।२२।।
[५०५]वीक्षयेत्संयुतो वापि लग्नं देवेन्द्रपूजितः ।

---

५०१ व१ वासरे
५०२ वे.अनल
५०३ व२ बुधवारे
५०४ व१ परमोद्यगतो

स्वधिमित्रभभागस्थः स योगो मुसलाह्वयः ।।२३।।
मित्रराशिगतो जीवो वीक्षयेद्वा विलग्नगः ।
[५०६]वियद्योगः स विज्ञेयः कमलासनचोदितः ।।२४।।
गुरुर्बली स्वलग्नस्थो वीक्षयेद्वा विलग्नगः ।
पुण्डरीको महायोगः सर्वदा योगनायकः ।।२५।।
शुभवर्गस्थितो जीवः सुबली सौम्यवीक्षितः ।
गुणशेखरसंज्ञोऽयं योगो वा केवलं बली ।।२६।।
एवं शुक्रोऽपि सौम्योऽपि गुरुवद्योगकारकौ ।
ग्रन्थविस्तारभीत्याथ त्वेवं संक्षिप्य[५०७] चोदितम् ।।२७।।
वर्गोत्तमगतो जीवः शुक्रो वा चन्द्रजोऽपि वा ।
गुणधूर्जटिसंज्ञोऽयं यदा ते बलिनस्तदा ।।२८।।
बलिनः केन्द्रगाः सौम्या भवन्ति च यदा तदा ।
गुणभास्करसंज्ञोऽयं यदि वा लाभसंस्थिताः ।।२९।।
त्रिकोणगा यदा सौम्याः सहोत्थधनगाथवा ।
गुणकौस्तुभसंज्ञोऽयं यदि ते बलवत्तराः ।।३०।।
वर्गोत्तमगतश्चन्द्रो बलवाञ्छुभवीक्षितः ।
लग्नमेवंविधं चेद्वा गुणानां चन्द्रशेखरः ।।३१।।
त्रिषष्ठलाभगाः पापा बलिनः शुभवीक्षिताः ।
भवन्ति यदि योगोऽयं श्रीवत्सो योगराट्प्रभुः ।।३२।।
उच्चस्थो लाभगः सूर्यः षष्ठगो वा तृतीयगः ।
यदि स्यात्सिंहयोगोऽयं तुङ्गांशस्थोऽपि वा यदि ।।३३।।
अधिमित्रगृहस्थो वा मित्रराशिगतोऽपि वा ।
गुणशार्दूलसंज्ञोऽयं ब्रह्मणा कथितः पुरा ।।३४।।

---

५०५ व१ कवीक्षयेत्

५०६ व२ विधियोगः

५०७ व२ संक्षिपतो हितं

स्वतुङ्गस्थः कुजः सौम्यवीक्षितो लाभगो यदि ।
दुश्चिक्यस्थो रिपुस्थो वा गुणानामिन्द्रसंज्ञकः ।।३५।।
शनिः स्वतुङ्गगः सौम्यवीक्षितो लाभसंस्थितः ।
तृतीयगः षष्ठगो वा गुणानां रत्नमालिका ।।३६।।
अधिमित्रस्वराशिस्थावथवा मित्रराशिगौ ।
कुजार्कौ भवतो यत्र गुणो मकरतो भुवि ।।३७।।
स्वतुङ्गगः शशी यत्र लाभसंस्थो यदा भवेत् ।
अधिमित्रगृहस्थो वा गुणानां निर्मलो मणिः ।।३८।।
चन्द्रार्कौ लाभगौ यत्र भवतौ यदि केवलम् ।
गुणार्णवो महायोगो जनानामिष्टसिद्धिदः ।।३९।।
धर्मकर्मद्वित्रिसंस्थः शशी यत्र भवेद्यदि ।
सुदर्शनो महायोगो दोषासुरविनाशनः ।।४०।।
लाभस्थितो यदा सूर्यश्चन्द्रो वाप्येक एव सः ।
गुणसागरयोगोऽयं यदा भवति चेद्बली ।।४१।।
स्ववर्गस्थः शशी यत्र लग्नात्पञ्चमगो भवेत् ।
पुण्ययोगः स विज्ञेयो गुरुर्वा यदि वा बुधः ।।४२।।
नन्दाभौमार्कयोर्भद्रा शुक्रेन्दोश्च जया बुधे ।
शुभयोगा गुरौ रिक्ता पूर्णा मन्देऽमृताह्वया ।।४३।।
शुक्रज्ञकुजमन्देज्यवारा नन्दादिषु क्रमात् ।
सिद्धा तिथिः सिद्धिदा स्यात्सर्वकालेषु सर्वदा ।।४४।।
पुष्यस्याद्यद्वितीयांशसंस्थितौ चन्द्रवाक्पती ।
विजयो नाम योगोऽयं समरे विजयप्रदः ।।४५।।
परमोच्चगतोऽप्येको जीवो वा ज्ञः सितोऽपि वा ।
ब्रह्मदण्डो महायोगः सर्वदोषविनाशकृत् ।।४६।।
स्वतुङ्गांशस्थिताः सौम्या येषु केषु च राशिषु ।
कामधेनुरयं योगः चन्द्रो वा वृषभांशगः ।।४७।।
मूलत्रिकोणगाः सौम्या भवन्ति यदि वा शशी ।

प्रभञ्जनो महायोगस्त्वथवापि तदंशगाः ।।४८।।
मूलत्रिकोणगाः पापास्त्रिषष्ठायगता यदि ।
इन्द्रदण्डो महायोगस्तदंशकगता अपि ।।४९।।
चन्द्रः शुभांशको यत्र भवेच्छुभनिरीक्षतः ।
रुद्रदण्डो महायोगो दोषतूलप्रभञ्जनः ।।५०।।
मुहूर्तश्चाष्टमः शश्वदभिजिद्योगसंज्ञकः ।
गुणानामधिपः सोऽपि मध्यंदिनगते रवौ ।।५१।।
उक्तं निरूपणं सम्यग्गुणानामथ साम्प्रतम् ।
पितामहोक्तमार्गेण वक्ष्ये दोषनिरूपणम् ।।५२।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां गुणनिरूपणाध्याय एकचत्वारिंशः ।।४१।।

४२

२.४२.० दोषनिरूपणम्

द्विदैवजलवस्वन्त्यब्रह्मेज्यार्यमतारकाः ।
उत्पातयोगा विज्ञेया भानुवारादिषु क्रमात् ।।१।।
मैत्रविश्वाम्बुवाय्विन्दुसार्पसूर्याख्यतारकाः ।
मृत्युयोगा मृत्युकराः सूर्यवारादिषु क्रमात् ।।२।।
ब्रह्मेज्यार्यमवैशाखहरिवस्वन्त्यभेषु च ।
नन्दायामर्कवारादिष्वन्धयोगाः प्रकीर्तिताः ।।३।।
रुद्रसार्पाम्बुनैर्ऋत्यपितृभाग्याग्निभेषु च ।
भद्रातिथौ काणयोगाः सूर्यवारादिषु क्रमात् ।।४।।
द्विदैवरौद्रमूलेन्द्रवारिविश्वपित्रोडुषु ।
जयासु पङ्गुयोगाः स्युरर्कवारादिषु क्रमात् ।।५।।
अजपात्पितृवह्नीशत्वाष्ट्रमित्रवसूडुषु ।
रिक्तासु बधिरा योगाः सूर्यवारादिषु क्रमात् ।।६।।
उद्वाहादिषु सर्वेषु मङ्गलेष्वपि निन्दिताः ।
एते स्युः षड्विधा योगाः स्वनामफलदायकाः ।।७।।
द्वादश्येकादशीनागगौरीस्कन्दवसुष्वपि ।
नवम्यां दग्धयोगाख्या भानुवारादितः क्रमात् ।।८।।
भरणीचित्रविश्वाख्यवस्वर्यमनगारिषु ।
पौष्णभेष्वर्कवारादिष्वर्कादिग्रहजन्मभम् ।।९।।
अस्मिन्योगद्वये यत्तत्कृतं कर्म विनश्यति ।
तस्माद्योगद्वयं त्याज्यं मङ्गलेष्वपि सर्वदा ।।१०।।
कुजार्क्योः सप्तमी षष्ठी चन्द्रे भानौ चतुर्थिका ।
द्वितीया ज्ञेऽष्टमी जीवे नवमी शुक्रवासरे ।।११।।
अचिकित्सागदा योगा मङ्गलेष्वपि निन्दिताः ।
भगन्दराश्मरीकुष्ठक्षयरोगप्रदायकाः ।।१२।।

लग्नात्षष्ठाष्टसंस्थे शशिनि सुरगुरौ चापि मन्दे सुतस्थे
भौमे रन्ध्रस्थितेऽर्के व्ययभवनगते मृत्युगे चन्द्रसूनौ।
द्यूनस्थे दैत्यपूज्ये सति निखिलनृणां मृत्युयोगा भवन्ति
त्याज्या दावाग्निरूपा सततमवितथं मृत्युदा मङ्गलेषु ।।१३।।
सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः ।
अग्निजिह्वाः सप्त योगा मङ्गले कुलनाशदाः ।।१४।।
भानुवारादिभिर्युक्तास्त्वेताः स्युस्तिथयो यदा ।
विषयोगास्त्वमी सप्त कालकूटविषोपमाः ।।१५।।
घटिकाद्वयमृक्षान्ते मासान्ते तु दिनत्रयम् ।
वर्षान्ते वर्जयेत्पक्षं ग्रहणे दिनसप्तकम् ।।१६।।
ऋक्षान्ते पुत्रनाशः स्यान्मासान्ते तु धनक्षयः ।
वर्षान्ते वर्गनाशः स्याद् ग्रहणे सर्वनाशनम् ।।१७।।
पश्चादुपप्लवादेव दोषः स्यान्नैव पूर्वतः ।
गृहदाहादयो दोषा यथा स्युर्दहनात्परम् ।।१८।।
प्रतिपद्बुधवारे च सूर्यवारे च सप्तमी ।
महाशूलाह्वयो योगो वर्जनीयो शुभे सदा ।।१९।।
[508]त्रिपूर्वावह्निरौद्राहियाम्यपौरन्दरेन्दुषु ।
पापवारेषु युक्तेषु दुष्टयोगाः प्रकीर्तिताः ।।२०।।
दुष्टयोगे कृतं कर्म त्वचिरादेव नश्यति ।
तस्माच्छुभेषु कार्येषु वर्जनीयाः प्रयत्नतः ।।२१।।
जीवस्थानात्तु शीतांशुर्निधनान्त्यारिसंस्थितः ।
योगोऽयं संकटो नाम शोभने निधनप्रदः ।।२२।।
यममैत्रादितिभाजपाद्रुद्रत्वाष्ट्रविष्णुषु ।
सत्स्वर्कादिषु वारेषु मृत्युदस्त्वशनिः शुभे ।।२३।।
यदा वक्रौ गुरुसितौ परस्परनिरीक्षितौ ।

---

५०८ व१,व२ त्रिस्रपूर्वाग्नि

सप्तमस्थौ तदा दोष: साक्षादस्तमय: सम: ।।२४।।
दिवसस्याष्टमे भागे वारेशाद्या: क्रमाद् ग्रहा: ।
शन्यंश: कुलिको दोषो वारेश: पुनरष्टम: ।।२५।।
मृगेन्द्रसंस्थिते जीवे मध्यदेशे करग्रहे ।
मृत्युयोगो मृत्युद: स्याद्दम्पत्यो: पञ्चवर्षत: ।।२६।।
सिंहे सिंहाशके जीवे कलिङ्गे गौडगुर्जरे ।
कालमृत्युरयं योगो दम्पत्योर्निधनप्रद: ।।२७।।
मृगेन्द्रमध्यमांशस्थे जीवे योगोऽशनिस्त्वयम् ।
गौतमीयाम्यभागे तु दम्पत्योर्निधनप्रद: ।।२८।।
योगत्रयं वर्जनीयं चोक्तदेशेषु सर्वदा ।
उद्वाहेष्यन्यदेशेषु चात्यर्थं मङ्गलप्रदम् ।।२९।।
अर्कवारेऽग्निपञ्चम्यो: सोमे चित्राद्वितीययो: ।
कुजे पूर्णेन्दुरोहिण्यो: सप्तमीयाम्ययोर्बुधे ।।३०।।
गुरौ मित्रत्रयोदश्यो: षष्ठश्रवणयो: सिते ।
पौष्णाष्टम्यां शनियुते योगा हालाहलाभिधा: ।।३१।।
एषु योगेषु कर्तव्यं मारणं शत्रुसंज्ञके ।
विवाहादिषु कार्येषु नियतं निधनप्रदम् ।।३२।।
प्रतिपद्यम्बुनक्षत्रे पञ्चम्यां वह्निभे सति ।
अष्टम्यामजपाद्धिष्ण्ये दशम्यां ब्रह्मभे यदि ।।३३।।
द्वादश्यां सार्पनक्षत्रे त्रयोदश्यर्यमर्क्षयो: ।
नक्षत्रलाञ्छितो योगो देवानामपि नाशद: ।।३४।।
चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षच्छिद्राह्वया: क्रमात् ।।३५।।
क्रमादेतासु तिथिषु वर्जनीयाश्च नाडिका: ।
भूताष्टमनुतत्त्वाङ्कदश शेषास्तु शोभना: ।।३६।।

[५०९]दोषनाडीषु यत्कर्म शुभं सर्वं विनश्यति ।
विवाहे विधवा नारी व्रात्यः स्याच्चोपनायने ।।३७।।
सीमन्ते गर्भनाशः स्यात्प्राशने मरणं ध्रुवम् ।
अग्निना दह्यते क्षिप्रं गृहारम्भे विशेषतः ।।३८।।
राजराष्ट्रविनाशः स्यात्प्रतिष्ठायां न संशयः ।
किमत्र बहुनोक्तेन कृतं कर्म विनश्यति ।।३९।।
द्विदैवमित्रचान्द्रेन्द्रवह्निसार्पभतारकाः ।
रविवारेण संयुक्ता वर्जनीयाः प्रयत्नतः ।।४०।।
आषाढद्वयवह्नीज्यद्विदैवपितृतारकाः ।
सोमवारेण संयुक्ताः शुभकर्मविनाशदाः ।।४१।।
ज्येष्ठाजपादश्रवणधनिष्ठार्द्राहितोयपाः ।
भौमवारेण संयुक्ताः सर्वमङ्गलनाशदाः ।।४२।।
अश्विनीभरणीमूलपौष्णवस्वार्द्रतारकाः ।
बुधवारेण संयुक्ताः सर्वशोभननाशदाः ।।४३।।
अर्यमारोहिणीत्वाष्ट्रधातृचन्द्राख्यतारकाः ।
गुरुवारेण संयुक्ताः शोभने निधनप्रदाः ।।४४।।
सार्पद्विदैवमित्रेन्दुरोहिणीपितृतारकाः ।
शुक्रवारेण संयुक्ता वर्जनीयाश्च मङ्गले ।।४५।।
उत्तराफाल्गुनीपौष्णभेज्यादित्यार्कवैष्णवाः ।
शनिवारेण संयुक्ताः सर्वशोभनगर्हिताः ।।४६।।
एषु योगेषु तत्सर्वं कृतं कर्म विनश्यति ।
विवाहे विधवा नारी व्रती पातककृद्भवेत् ।।४७।।
वारेशे बलसंयुक्ते योगास्त्वेते बलप्रदाः ।
न किञ्चिद्दोषदास्तस्मिन्बलहीने न संशयः ।।४८।।
हस्तवासवयोराद्यं विशाखार्द्राद्वितीयकम् ।

---

५०९ व२ तिथिदोषेषु

तृतीयकमहिर्बुध्न्ये चान्त्यांशं यममूलयोः ॥४९॥
दिवा मृत्युप्रदाः पादा दोषास्त्वेते न रात्रिषु ।
शुभकार्ये प्रसूतौ च सर्वदा परिवर्जयेत् ॥५०॥
अश्विसार्पभयोराद्यं द्वितीयं यममूलयोः ।
तृतीयं त्र्युत्तराहर्योर्वाक्षिद्रोरन्त्यपादकः ॥५१॥
[510]दिवायोगा इति ख्याताः शोभने रोगदाः सदा ।
दिवारोगप्रदास्त्वेते न तु रात्रौ कदाचन ॥५२॥
तस्माद्दिवैव संत्याज्या रोगमृत्युप्रदायकाः ।
दिवापि दोषदा नैव रवीन्दोर्बलयुक्तयोः ॥५३॥
वारानर्कादितस्त्रिघ्नाः शोधयेच्चैकधिष्ण्यतः ।
ततो भवार्कषट्तारा क्रमात्काणान्धबाधिराः ॥५४॥
द्विदैवधातृवह्न्यर्कवसुदैवतपैतृकाः ।
अर्कवारेण संयुक्ता हालाहलविषोपमाः ॥५५॥
उत्तरात्रयचित्राख्यद्विदैवाहयतारकाः ।
सोमवारेण संयुक्ताः कालकूटविषोपमाः ॥५६॥
शतताराद्विदैवार्द्रा उत्तराषाढतारकाः ।
आरवारेण संयुक्ता गुणघ्ना विषसंज्ञकाः ॥५७॥
अश्विनीभरणीवह्निवसुमूलाद्यतारकाः ।
बुधवारेण संयुक्ता दोषाः सर्वाह्वयास्त्वमी ॥५८॥
भचतुष्कं वह्निधिष्ण्याद्वरुणार्यमतारकाः ।
गुरुवारेण संयुक्ता दोषा मङ्गलनाशदाः ॥५९॥
शक्रसार्पमघावह्निद्विदैवालुततारकाः ।
शुक्रवारेण संयुक्ता महादोषाह्वयास्त्वमी ॥६०॥
अर्यमादितिपौष्णार्कविश्वाषाढाख्यतारकाः ।
शनिवारेण संयुक्ता दोषा गुणविमर्दनाः ॥६१॥

---

५१० व१ दिवारो

त्रयोदशलवैर्युक्तः सूर्यो राशिचतुष्टयः ।
तदा धूमाह्वयो योगः सर्वशोभननाशदः ।।६२।।
धूमे मण्डलतः शुद्धे व्यतीपातोऽपरो विषः ।
व्यतीपाते च षड्राशियुक्तोऽसौ परिवेषकः ।।६३।।
परिवेषे चक्रयुक्ते विषदोषो धनुर्धरः ।
अत्यष्टिभागयुक्तेऽस्मिन्केतुसंज्ञोऽपरो विषः ।।६४।।
एवं पञ्चार्कदोषाः स्युश्चतुर्मुखमुखोदिताः ।
पञ्चदोषेषु संयुक्तेष्विनेन्दूदयराशिषु ।।६५।।
विवाहे विधवा नारी प्रतिष्ठायां कुलक्षयः ।
द्वितीये जन्मनि व्रात्यः सीमन्ते गर्भनाशनम् ।।६६।।
नवान्नभोजने मृत्युश्चौले व्याधिर्भवेत्तदा ।
तस्मात्पञ्चार्कदोषास्ते वर्जनीयाश्च मङ्गले ।।६७।।
जीवराशिर्द्वितीयायां चतुर्थ्यां घटतावुरी ।
षष्ठ्यां च मेषसिंहाख्यावष्टम्यां बुधसद्मनि ।।६८।।
दशम्यां सिंहकीटाख्यौ द्वादश्यां [५११]मृगजूकभे ।
एते मृत्युप्रदा योगाः शोभनेष्वतिगर्हिताः ।।६९।।[५१२]
मृगसिंहौ तृतीयायां प्रथमायां तुलामृगौ ।
पञ्चम्यां बुधराशौ द्वौ सप्तम्यां चापचन्द्रभे ।।७०।।
नवम्यां सिंहकीटाख्यावेकादश्यां गुरोर्गृहे ।
वृषमीनौ त्रयोदश्यां दग्धसंज्ञास्त्वमी गृहाः ।।७१।।
दग्धसद्मनि यत्कर्म कृतं सर्वं विनश्यति ।
तस्माद्दग्धा गृहास्त्याज्याः शोभनेष्वखिलेष्वपि ।।७२।।
महागणितमार्गस्थो व्यतीपातोऽत्र दोषदः ।
बलवद्गुण[५१३]सम्पन्नोऽप्यसौ कुलविनाशदः ।।७३।।

---

५११ व१ वृषभगजकभे

५१२ व२ पूर्णश्लोकलोपः

५१३ वे.चौ. गण ?

अश्विनी रोहिणी चैत्रे शून्यभे परिकीर्तिते ।
चित्रास्वाती च वैशाखे ज्येष्ठे विश्वाख्यतारकाः ।।७४।।
भगवासवमाषाढे श्रावणे हरिविश्वभम् ।
नभस्ये वारुणान्त्यर्क्षमजपादश्वयुज्यपि ।।७५।।
कार्त्तिके पितृवस्वृक्षे सौम्ये चित्रादिदैवते ।
पौषे दस्रकरार्द्राः स्युर्माघे मूलं च विष्णुभम् ।।७६।।
तपस्ये शक्रभरणी शून्यभान्याहुरग्रजाः ।
एषु येन कृतं कर्म धनैः सह विनश्यति ।।७७।।
अष्टमी नवमी चैत्रे पक्षयोरुभयोरपि ।
माधवे द्वादशी त्याज्या पक्षयोरुभयोरपि ।।७८।।
ज्येष्ठे त्रयोदशी निन्द्या सिते कृष्णे चतुर्दशी ।
आषाढे कृष्णपक्षे च षष्ठी सप्तम्यसत्प्रदा ।।७९।।
द्वितीया च तृतीया च श्रावणे सितकृष्णयोः ।
प्रथमा च द्वितीया च नभस्ये मासि निन्दिता ।।८०।।
दशम्येकादशी निन्द्या मासीषे शुक्लकृष्णयोः ।
ऊर्जे चतुर्दशी शुक्ले कृष्णपक्षे च पञ्चमी ।।८१।।
सप्तमी चाष्टमी सौम्ये पक्षयोरुभयोरपि ।
पौषे पक्षद्वये चैव चतुर्थी पञ्चमी तथा ।।८२।।
माघे तु पञ्चमी षष्ठी शुक्ले कृष्णे यथाक्रमात् ।
तृतीया च चतुर्थी च फाल्गुने सितकृष्णयोः ।।८३।।
तिथयो मासशून्याख्याः शुभकर्मविनाशदाः ।
आसु श्राद्धादि कुर्वीत नैव मङ्गलमाचरेत् ।।८४।।
घटमत्स्यवृषा युग्ममेषकन्याः सवृश्चिकाः ।
तुलाचापकुलीराख्यमृगसिंहाख्यराशयः ।।८५।।
चैत्राद्या मासशून्याख्या वंशवित्तविनाशदाः ।
तस्मात्तान्संपरित्यज्य शोभनं कारयेत्सुधीः ।।८६।।
दिव्यान्तरिक्षभौमाश्च उत्पाताः त्रिविधाः स्मृताः ।

षण्मासं तदुडु त्याज्यं सप्ताहं च तदादित: ।।८७।।
उत्पातदिनं संत्याज्यं नवमं च विशेषत: ।
तयो: कृतं शुभं कर्म नाशमाप्नोति शीघ्रत: ।।८८।।[५१४]
त्रिद्युस्पृग्दिवसं त्याज्यमवमं च विशेषत: ।
तयो: कृतं शुभं सर्वं नाशमाप्नोति शीघ्रत: ।।८९।।[५१५]
नृपसंन्यासिविद्वांसो यज्ञकृद्दैववित्तमा: ।
एतेषां मरणे त्याज्यं त्रिदिनं शोभनेषु च ।।९०।।
अब्दास्तु त्रिविधा जीवसौरचन्द्राह्वया: सदा ।
तेषामादौ तथा चान्ते त्रिदिनं वर्जयेच्छुभे ।।९१।।
पूर्वत: परत: सूर्यसंक्रान्तेश्च विवर्जयेत् ।
मङ्गलेषु सदा दुष्टा नाड्य: षोडश षोडश ।।९२।।
दिनमेकं सदा त्याज्यमयने विषुवद्द्वये ।
संक्रान्तिदिनमप्येवं ज्ञातव्यं मङ्गलेष्वपि ।।९३।।
महापातौ वैधृतिश्च उपरागसम: सदा ।
तस्माद्दिनत्रयं त्याज्यं तच्च पूर्वापरं दिनम् ।।९४।।
उपग्रहमहादोषा भूमिकम्पादयश्च ते ।
मङ्गलेषु सदा त्याज्या: कालकूटविषोपमा: ।।९५।।
कम्पं कम्पयति स्थानमुल्का दहति नाकुलम् ।
दण्डे स्वामिविनाश: स्याद् ध्वज: सर्वविनाशकृत् ।।९६।।
ग्रहणं द्युनिशोर्मध्ये संध्ययोर्वा भवेद्यदि ।
उभयत्रापि दोष: स्यात्पश्चादेव न तत्र तु ।।९७।।
अर्कारसितसौम्यार्यमन्दा यद्येकराशिगा: ।
कण्टकाख्यो महादोष: सर्वकर्मविनाशकृत् ।।९८।।
अकालवृष्टिनीहारपरिवेषशरासना: ।
लतापातादयो दोषा: शुभकार्यविनाशदा: ।।९९।।

---

५१४ व१,व२ पूर्णश्लोकलोप:

५१५ व१ पूर्णश्लोकलोप:

रूपादिबलसम्पूर्णा ग्रहेन्द्रा बलिनः सदा ।
शीघ्रगाश्चाग्रगा भानो रश्मिभिर्बलवत्तराः ।।१००।।
पृष्ठतो रश्मिहीनाः स्युर्व्यत्ययान्मन्दचारिणः ।
शशितो बलवान्सूर्यः सर्वकार्येषु सर्वदा ।।१०१।।
सूर्यस्य राशिर्ज्वलितो भस्मसंज्ञं तु पृष्ठभम् ।
अग्रभं धूमसंज्ञं तु तस्माद्भत्रितयं त्यजेत् ।।१०२।।
यत्तद्राशिकृतं यत्तच्छुभं सर्वं विनश्यति ।
भस्मधूमाह्वयं राशिद्वयं श्रेष्ठं शुभैर्युतम् ।।१०३।।
शून्याधिमासद्वितयं गण्डान्तं त्रिविधं सदा ।
महापातत्रयं दुष्टं भसन्धित्रितयं भृशम् ।।१०४।।
संग्रहः कर्तरीसूर्यसंक्रान्तिविषनाडिकाः ।
ग्रहणोभयतो दोषो दुःक्षणः कुनवांशकः ।।१०५।।
पापविद्धाधिष्ठितभं खार्जूरिकसमाङ्घ्रिभम् ।
कुजाष्टमः सितारिस्थः चन्द्रः षष्ठाष्टरिःफगः ।।१०६।।
पञ्चाङ्गशुद्धिरहिताश्चोत्पाताकालवृष्टिजाः ।
एकविंशन्महादोषास्त्वन्ते ब्रह्ममुखोदिताः ।।१०७।।
कदाचिन्नैव सीदन्ति गुणानां कोटिकोटिभिः ।
तस्मादेतेषु दोषेषु कदाचिन्नाचरेच्छुभम् ।।१०८।।
विवाहे विधवा नारी मरणं व्रतबन्धने ।
ग्रामनाशः प्रतिष्ठायां सीमन्ते गर्भनाशनम् ।।१०९।।
नवान्नभोजने मृत्युः कृषौ तत्फलनाशनम् ।
कर्तृनाशो गृहारम्भे प्रवेशे पतिनाशनम् ।।११०।।
यात्रायां कर्तृनाशः स्याद्युद्धयाने विशेषतः ।
लभ्यते सुमहापुण्यमेषु श्राद्धादिकर्मभिः ।।१११।।[५१६]
ज्येष्ठं ज्येष्ठाद्यजो हन्ति द्वितीयेऽप्यथ सोदरम् ।

---

५१६ व१ प्रथमपादलोपः, व२पूर्णश्लोकलोपः,
व२ इत्यधिकं १११अनन्तरं–सम्पत्समूहा पुण्यभेषु शुद्धादिकाणि

तृतीये मातरं हन्ति स्वयं जातश्चतुर्थके ।।११२।।
ज्येष्ठर्क्षे कन्यका जाता हन्ति शीघ्रं धवाग्रजम् ।
ज्येष्ठान्त्यपादजातस्तु पितृनाशाय जायते ।।११३।।
ज्येष्ठं ज्येष्ठाद्यपादे तु हन्ति बालो न बालिका ।
सा बालिका तु मूलर्क्षे पितरं मातरं तथा ।।११४।।
वासवे प्रथमे पादे द्वितीये च तृतीयके ।
स्वल्पदोष इति प्रोक्तं पितरं हन्ति तुर्यके ।।११५।।
वासवर्क्षचतुर्थांशे पुत्री पुत्रस्तु जायते ।
पीडारिष्टनिवृत्यर्थं शान्तिं कुर्याच्च मूलवत् ।।११६।।
नैर्ऋत्यभोद्भूतसुत: सुता वा
क्षिप्रं त्ववश्यं श्वशुरं निहन्ति ।
तदन्त्यपादाज्जनिता निहन्ति
नैवोत्क्रमेणाहिभव: कलत्रम् ।।११७।।
[517]सार्पेशताराजनिता धवाग्रजं
द्विदैवताराजनिता तु देवरम्।
पुरन्दरर्क्षाज्जनित: सतस्तदा
स्वस्याग्रजं हन्ति न पुत्रिका यदि ।।११८।।
हन्ति ज्येष्ठान्त्यपादोत्थ: स्वज्येष्ठं चैव कन्यका ।
विप्रेभ्यो गोत्रयं दद्यात्तद्दोषशमनाय वै ।
अशक्तो गोद्वयं दद्याद्गामेकां वापि भक्तित: ।।११९।।
भौजङ्गपौरन्दरपौष्णभानां
तदग्रभानां च यदन्तरालम् ।
अभुक्तसंज्ञं प्रहरप्रमाणं
त्यजेत्सुतं तत्रभवां सुतां च ।। १२०।।
मूलाद्यपादजनित: पितरं निहन्ति

---

५१७ व१,व२ सुरेश

द्वितीयतः स्वजननीं त्रिपदोऽर्थवृन्दम् ।
तुरीयजः शुभकरः फलमेतदेव
वैलोमतो भुजगधिष्ण्यभवस्य सर्वम् ।।१२१।।
नैर्ऋत्यभौजङ्गमगण्डदोष-
निवारणायाभ्युदयाय नूनम् ।
पितामहोक्तां रुचिरां च शान्तिं
प्रवच्मि दैवज्ञहिताय सम्यक् ।।१२२।।
चित्राद्यर्धे पुष्यमध्ये द्विपादे
पूर्वाषाढाधिष्ण्यपादे तृतीये ।
जातः पुत्रश्चोत्तराद्ये विधत्ते
मातापित्रोर्भ्रातरं चात्मनाशम् ।।१२३।।
द्विमासस्योत्तरादोषः पुष्ये चैव त्रिमासकः ।
पूर्वाषाढाष्टमे मासि चित्राषाण्मासिकं फलम् ।।१२४।।
नवमासं तथाश्लेषां मूले चाष्टमवर्षके ।
ज्येष्ठा पञ्चदशे मासि पुत्रदर्शनवर्जिता ।।१२५।।[५१८]
ज्येष्ठान्त्यपादघटिकामितमेव केचि-
न्मूलं ह्यभुक्तमपरे पुनरामनन्ति ।
मूलाद्यपादघटिकाद्वितयेन सार्ध-
मष्टौ समा परिहरेदिह जन्मभाजम् ।।१२६।।
अभुक्तमूलव्यतिरिक्तगण्ड-
दोषेषु शान्तिं विदधीत धीमान् ।
शास्त्रोक्तरीत्या खलु सूतकान्ते
मासे तृतीयेऽप्यथ वत्सरान्ते।।१२७।।
मातृगण्डसुते ताते सूतकान्ते विचक्षणः।
कुर्याच्छान्तिं तादृशे वा तद्दोषस्यापनुत्तये ।।१२८।।

---

५१८ व२ श्लो.१२५तः१३१श्लोकप्रथमपादपर्यंतं लोपः.

मूलाद्यपादो दिवसे यदि स्या-
तज्जः पितुर्नाशनकारणं स्यात् ।
द्वितीयपादो यदि रात्रिभागे
तदुद्भवो मातृविनाशकः स्यात् ।।१२९।।
मूलाद्यपादो यदि रात्रिभागे
तदात्मनो नास्ति पितुर्विनाशः ।
द्वितीयपादो दिनगो यदि स्या-
न्न मातुरल्पोऽपि तदास्ति दोषः ।।१३०।।

अथ गण्डदोषशान्तिविधिः ।

ईशान्यमथवा प्राच्यामुदीच्यां दिशि कल्पयेत् ।
मण्डपं चाष्टभिर्हस्तैश्चतुर्भिर्वा समन्ततः ।।१३१।।
कदलीस्तम्भसंयुक्तमाम्रपल्लवराजितम् ।
पुष्पमालायुतं सम्यक् तूर्यघोषनिनादितम् ।।१३२।।[५१९]
चतुर्द्वारसमायुक्तं तोरणाद्यैरलङ्कृतम् ।
पिष्टेन कल्पयेत्सर्वं तथा गोमयमण्डले ।।१३३।।
कुण्डं च तद्बहिः कार्यं ग्रहयज्ञोक्तमार्गतः ।
पञ्चामृतं पञ्चगव्यं पञ्चत्वक्पल्लवानि च।।१३४।।
रोचनं कुङ्कुमं शङ्खं गजदन्तं च गुग्गुलम् ।
सद्बीजाश्च शतौषध्यः सुगन्धकलमृत्तिकाः ।।१३५।।[५२०]
सुवर्णगन्धपुष्पाणि रक्तगन्धोदकानि च ।
सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः ।।१३६।।
निर्ऋतिप्रतिमां कुर्याद्वित्तशाठ्यविवर्जितः ।
वस्त्राणि षोडशाष्टौ वा शुक्लसूक्ष्माण्यतन्द्रितः ।।१३७।।
ब्राह्मणान्वरयेत्पश्चात्स्वस्तिवाचनपूर्वकम् ।

---

५१९ व१,व२ पूर्णश्लोकलोपः

५२० व१.३ अनुसारं संशोधितम्। वे.चौ. १३५-१६१श्लोकानन्तरं अ.४३ श्लो. ११ तः ३६ पर्यन्तं पठितम्।

प्रधानाचार्यमेतेषां श्रेष्ठं तत्प्रतिमार्चने ।।१३८।।
ईशानादिषु कोणेषु चतुरः कलशार्चने ।
एवं पृथक् पृथग्वापि मधुपर्कसमन्वितान् ।।१३९।।
द्वारेषु जापकानष्टौ पूर्ववच्चाङ्गजापकान् ।
ईशानादिषु कोणेषु कलशाञ्जलपूरितान् ।।१४०।।
पूर्वोक्तद्रव्यसंयुक्ताञ्छुक्लवर्णान्सुशोभनान् ।
तण्डुलोपरि संस्थाप्य चोपचारैः प्रपूजयेत् ।।१४१।।
अब्लिङ्गैर्वारुणैर्मन्त्रैः शुक्लपुष्पाक्षतादिभिः ।
ततः कुम्भजलं स्पृष्ट्वा कुशकूर्चैर्जपादिकान् ।।१४२।।
भद्रभक्तं च भद्राग्नेरानो भद्रा इति क्रमात् ।
पुरुषसूक्तं च तन्मन्त्रैर्देवान्ध्यात्वाप्यतन्द्रितः ।।१४३।।
प्रसिद्धा रुद्रसूक्तस्य ऋषिश्छन्दोऽधिदेवता ।
भद्राग्ने इति सूक्तस्य आद्यर्चौ द्वे जपोत्यकौ(जपत्यसौ) ।।१४४।।
ततो दशर्चानुष्टुभो वामदेवोऽग्निदेवता ।
आ नो भद्रास्य सूक्तस्य आद्याः पञ्च च सप्त च ।।१४५।।
जगत्यश्च विराट् चैव शेषास्तिस्रस्त्वनुष्टुभः ।
राहूगणसुतश्चैव गौतमश्च ऋषी स्मृतौ ।।१४६।।
देवताश्च तथा विश्वेदेवताश्च प्रकीर्तिताः ।
चतुर्दशानुष्टुभास्तु पुरुषसूक्तस्य चोदिताः ।।१४७।।
ऋचौ द्वे त्रिष्टुभौ ज्ञेयौ ऋषिर्नारायणः स्वयम् ।
सूक्तं नारायणः साक्षाद्देवतापरपूजकः ।।१४८।।
शतच्छिद्रं बृहत्कुम्भं स्थापयेन्मध्यतस्ततः ।
तत्पश्चान्निर्ऋतिदेवमर्चयेत्पश्चिमामुखम् ।।१४९।।
मोषुणस्त्विति मन्त्रेण शुक्लवस्त्राक्षतादिभिः ।
मोषुणस्त्विति मन्त्रस्य ऋषिः प्रस्कण्वसंज्ञकः ।।१५०।।
निर्ऋतिर्देवताछन्दो गायत्री क्लेशनाशिनी ।
करालवदनं कृष्णं खड्गचर्मधरं तनुम् ।।१५१।।

ऋग्यजु:सामवेदांश्च जपेद् द्वारेषु पूर्वत: ।
अथर्वणं तथोदीच्यां नियतात्मा ह्यतन्द्रित: ।।१५२।।
षडङ्गजापकस्तत्र तत्तन्मन्त्रं जपेत्तत: ।
तत्तन्मन्त्रैर्ग्रहान्सर्वान्लोकपालान्समर्चयेत् ।।१५३।।
अष्टोत्तरसहस्त्रं वा शतं वा नियतात्मवान् ।
मूलं प्रजामिति मन्त्रद्वयस्य प्रस्कण्वको ऋषि: ।।१५४।।
निर्ऋतिर्देवता त्रिष्टुप्छन्द: पापविमोचनम् ।
मूलं प्रजामित्यष्टौ वाक्येनार्चये(नार्चे)द्विनियोगत: ।।१५५।।
स्वगृह्योक्तविधानेन कुण्डेऽग्निं स्थापयेत्तत: ।
प्रजापतये स्वाहेति मुखान्ते जुहुयाच्चरुम् ।।१५६।।
मूलाय स्वाहा प्रजापतये स्वाहेत्युपहोममन्त्रौ ।
पायससमिदाज्येन चरुणाष्टसहस्रकम् ।।१५७।।
अथवाष्टोत्तरशतं प्रत्येकं जुहुयात्तत: ।
मूलं प्रजामित्यष्टभिर्वाक्यैर्मन्त्रद्वयेन च ।।१५८।।
सावित्रसौम्यनैर्ऋत्यमन्त्रैरश्वत्थसम्भवै: ।
समिद्भिश्च तिलव्रीहीन्हुत्वा व्याहृतिभिस्तत: ।।१५९।।
जपादींश्च तत: कर्ता भक्त्या पूर्णाहुतिं स्वयम् ।
ततो मङ्गलघोषैश्च स्नानकर्म समाचरेत् ।।१६०।।
आद्यपादे पितृगण्डे त्रयाणामभिषेचनम् ।
इतरत्र शिशोर्मातुरभिषेकं समाचरेत् ।।१६१।।
शतच्छिद्रं बृहत्कुम्भं शिरोदेशे च धारयेत् ।
ततो राज्याभिषेकं च कुर्यादाचार्यकोविद: ।।१६२।।
[521]आदाय चतुर: कुम्भानाचार्यो वेदपारग: ।
निनयेयुर्बृहत्कुम्भमब्लिङ्गैर्जलमन्त्रकै: ।।१६३।।
स्नातुर्नीराजनं कुर्याच्चित्रान्नैर्दीपमालिकै: ।

---

५२१ वर२ आचर्यदाय

कुङ्कुमं माल्याम्बरौ दत्त्वा प्रार्थयेन्निर्ऋतिं द्विजान् ।।१६४।।
अनेन सुकृतेनैव निर्ऋतिः प्रीयतामिति ।
गृहीत्वा सुकृतं तेभ्यः पूजाहोमजपादिकम् ।।१६५।।
आचार्याय वृषं दद्याल्लोहपिण्डं सदक्षिणम् ।
प्रतिमां वसुसंयुक्तां बीजान् शक्त्यनुसारतः ।।१६६।।
आचार्येभ्यो ब्राह्मणेभ्यो दद्याद्वित्तानुसारतः ।
द्वाराङ्गजापकेभ्यश्च भयलाभविवर्जितः ।।१६७।।
श्रोत्रियाय विशिष्टाय ब्राह्मणाय कुटुम्बिने ।
वस्त्रालङ्कारसंयुक्तां धेनुं दद्यात्सदक्षिणाम् ।।१६८।।
ब्राह्मणान्भोजयेत्पश्चादाशीर्वादपुरःसरम् ।
एवं यः कुरुते शान्तिं[५२२] गण्डदोषात्प्रमुच्यते ।।१६९ ।।[५२३]
एतत्सर्वं सार्पभेऽपि समानं किञ्चिदुच्यते ।
सार्पेभ्यः स्वाहेति मन्त्रमुखान्ते जुहुयात्ततः ।।१७०।।
[५२४]आश्लेषाभ्यः स्वाहा दंदशूकेभ्यः स्वाहेति ।[५२५]
इदं सर्पेभ्य इति वाक्यैः पूर्ववदष्टभिः ।।१७१।।
एषामास्तीक ऋषिस्त्रिष्टुप्छन्दोऽस्य देवताः ।
नमोऽस्तु सर्पेभ्य इत्युपचाराश्च पूर्ववत् ।।१७२।।
अस्य मन्त्रस्य बृहती छन्दः सर्पाधिदेवता ।
आस्तीकऋषिमन्त्रोऽयं सर्वदुःखविनाशदः ।।१७३।।

---

५२२ व१ शां संज्ञक
व१ मध्ये १४३ श्लोकस्यानन्तरमधिकम्– हतिपयं हि प्रतिनिंदा स्वार्जितधर्मसंचय।।३५।।अर्कादिवारसंभूताः कालकूटविषाह्वयाः।। घ्नन्ति योगाः सिंहयोगं गुरुनिंदेव जीवितं।।३६।। अतिगंडदोषात्प्रमुच्यते।।
५२४ व२ आभ्यः
५२५ वे. उपहोममन्त्रौ –इत्यधिकम्

पतामहानुसारेण चोक्तं दोषनिरूपणम् ।
गुणापवादमधुना कथ्यते च पृथक् पृथक् ।।१७४।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां दोषनिरूपणाध्यायो द्विचत्वारिंशः ।।४२।।

४३
२.४३.० गुणदोषापवादाः

अथातः संप्रवक्ष्यामि दोषाणामवादकम् ।
अध्यायं तं हितार्थाय दैवज्ञानां च सुन्दरम् ।।१।।
अधर्मेण जितो धर्मः पुण्यं पापचयेन च ।
यद्वत्कलियुगे तद्वद्दोषेण गुणसञ्चयम् ।।२।।
नामनिर्देशतो यत्र चैव दोषस्त्विदं गुणम् ।
हन्ति तत्रैव सान्यत्र प्रशंसा परमस्य वै ।।३।।
[५२६]वारयोगगुणं हन्ति योगचोत्पातसंज्ञितः ।
अतिसर्वगुणोपेतमाधिः[५२७] कायं यथा तथा ।।४।।
श्रेष्ठयोगं यथा हन्ति मृत्युयोगो महाबलः ।
सम्पूर्णगुणिनं यद्वत्सर्पस्तु मूषकं यथा ।।५।।
शुभयोगं निहन्त्याशु त्वघयोगो महाबलः ।
यथा कृष्णमृगं साधु शार्दूलस्त्वतिगर्वितः ।।६।।
हन्ति कल्याणयोगाख्यं काणयोगो महाबलः ।
प्रभञ्जनो यथा तूलराशिं पटतरस्तथा ।।७।।
वर्धमानाह्वयं योगं पङ्गुयोगो निहन्ति वै ।
अन्नं सुगुणसम्पन्नमुग्रा विषलवा यथा ।।८।।
सुधायोगान्निहन्त्येव बधिरो योगचञ्चलः ।
वृकोऽजसमितिं यद्वत्तद्वदेवाचिराद्ध्रुशम्[५२८] ।।९।।
बलिनं गुणसम्पन्नं महायोगं निहन्ति वै ।
दग्धयोगो यथा मेहः शरीरमचिराद्ध्रुशम् ।।१०।।[५२९]

---

५२६ व१ वरयोग, व२ चरयोग
५२७ वे. चौ. आधि?
५२८ व२ देशाचिराद्रुषं

ग्रहजन्मभयोगोऽयं पूर्णयोगं निहन्ति हि ।
यथा गोसमितिं व्याघ्रश्चोद्धतः खलसंयुतः ।।११।।
अचिकित्सगदायोगः शङ्कुयोगं निहन्ति वै ।
यथा काकः पुरोडाशं तथैव तमशोभनम् ।।१२।।
ग्रहैः कृतो मृत्युयोगो निहन्त्यमृतसंज्ञकम् ।
योगो गुणान्महानन्यान्पावको विपिनं यथा ।।१३।।
अग्निजिह्वाह्वयो योगः पद्मयोगश्च तद्गुणान् ।
अन्यान्हन्त्यचिरादेव नकुलः पन्नगं यथा ।।१४।।
विषयोगो निहन्त्याशु योगं त्वानन्दसंज्ञकम् ।
लग्नोद्भवान्गुणानन्यान्व्याघ्रः कृष्णमृगं यथा ।।१५।।
अर्धयामभान्तरालं तद्वद्योगान्तरात्मकम् ।
मासान्ते त्रिदिनं दोषमब्दान्ते पक्षमेव च ।।१६।।
योगान्तरालदोषो यः सहस्रं गुणसञ्चयम् ।
ऋक्षान्तरालदोषो यस्त्वयुतं गुणसञ्चयम् ।।१७।।
मासान्तदोषस्त्वचिराद्गुणकोटिं निहन्त्यथ ।
गुणानामयुतं हन्ति वर्षान्ते पक्षदोषकः ।।१८।।
उपप्लवभवो दोषो हन्त्यत्र गुणसञ्चयम् ।
तद्धिष्ण्योत्पातजो दोषः कर्तुरर्थविनाशदः ।।१९।।
महाशूलाह्वयो योगः सिद्धियोगं निहन्ति वै ।
[५३०]स्वर्भानुर्बलसम्पन्नः शशाङ्कं बलिनं यथा ।।२०।।
यथा पीयूषयोगाख्यं दुष्टयोगो बलाधिकः ।
दावाग्निर्विपिनं सर्वं नानातरुविमण्डितम् ।।२१।।
कपिलाख्यं महायोगं बलिनं दोषकम्पनम् ।
हन्त्येव शकटो योगस्त्वनृतं सुकृतं यथा ।।२२।।

---

५२९ व१.३ अ.४२.१३५-१६१ श्लोकाः वे.चौ. अ.४३ श्लो. ११ तः ३६ पर्यन्तं पठिताः
५३० वे.पा.कर्कारु

अशनिर्नाम योगो यः समुद्रं योगवल्लभम् ।
राघवाग्निशरो यद्वदुदधेः शम्बरं यथा ॥२३॥
समसप्तकयोर्जीवशुक्रयोश्च परस्परम् ।
तदा मूढसमो दोषः शुभकार्यविनाशदः ॥२४॥
तुङ्गमित्रस्वर्क्षगयोस्तयोर्वा तत्तदंशयोः ।
तदा मूढसमो दोषो नाशं याति न संशयः ॥२५॥
महाकुलिकयोगश्च वापी योगं निहन्ति हि ।
अन्यान्महागुणांश्चापि पावकस्त्विन्धनं यथा ॥२६॥
हन्ति योगं मौसलाख्यं योगो हालाहलाह्वयः ।
लग्नोद्भवान्गुणानन्यान्कितवोऽष्टापदं यथा ॥२७॥
नक्षत्रलाञ्छितो योगः स्वयोगं हन्ति सर्वदा ।
अन्यान्हन्ति गुणानुग्रान्स्वैरिणी स्वकुलं यथा ॥२८॥
पुण्डरीकं महायोगं पक्षच्छिद्रोत्थनाडिका ।
हन्ति पक्षिगणं श्येनो यद्वत्तद्वन्न संशयः ॥२९॥
गुणशेखरयोगाख्यं भानुवारादिसम्भवाः ।
पापयोगा यथा घ्नन्ति पुरुषं स्त्रीरजस्तथा ॥३०॥
[५३१]दिवैव मृत्युदो मृत्युयोगोऽयं न च रात्रिषु ।
हन्ति धूर्जटियोगं तु सन्निपातो यथा नरम् ॥३१॥
गुणभास्करयोगं तु दिवारोगप्रदो हि यः ।
हन्ति रोगाह्वयो योगः स्त्रीसङ्गो मेहरोगिणम् ॥३२॥
गुणपार्श्वमहायोगं महाहालाहलो यथा ।
हन्ति तारापतिं नूनं सैंहिकेयो महाबली ॥३३॥
तं चन्द्रशेखरं योगं महाकाणान्धबाधिराः ।
घ्नन्ति योगा यथा मेघचयं चण्डमहानिलः ॥३४॥
गुणमर्दनयोगोऽयं योगं श्रीवत्ससंज्ञकम् ।

---

५३१ व१ द्विदैव

हन्ति यद्वद्द्विप्रनिन्दा स्वार्जितं धर्मसञ्चयम् ।।३५।।
अर्कादिवारसम्भूताः कालकूटविषाह्वयाः ।
घ्नन्ति योगाः सिंहयोगं गुरुनिन्देव जीवितम् ।।३६।।
हन्ति शार्दूलयोगाख्यं धूमयोगो निकृष्टवान् ।
क्रोधो हन्ति तपोराशिं चिरकालमुपार्जितम् ।।३७।।
व्यतीपातेऽन्तरे दोषस्त्विन्द्रयोगं निहन्ति वै ।
लग्नोद्भवान्गुणानन्यान्पांशुला स्वकुलं यथा ।।३८।।
रत्नमालाह्वयं योगं परिवेधोऽतिभीषणः ।
हन्ति लग्नगुणानन्यान्गव्यं मद्यलवो यथा ।।३९।।
गुणकल्पतरुं हन्ति दोषस्त्विन्द्रधनुस्तथा ।
अश्मरी च महारोगस्त्वचिरात्तु शरीरिणम् ।।४०।।
केतुसंज्ञो महायोगो योगं गुणमणिं सदा ।
भगन्दरो महारोगो हन्ति द्राग्देहधारिणम् ।।४१।।
गुणार्णवं महायोगं हन्ति निर्घातसंज्ञकः ।
योगो विभीषणाकारो मेहरोगो यथा नरम् ।।४२।।
सुदर्शनं महायोगं मेघदोषो निहन्ति वै ।
अजीर्णरोगस्त्वत्यर्थमचिरान्मनुजोत्तमम् ।।४३।।
गुणसागरयोगाख्यं योगः कुलिकसंज्ञकः ।
हन्ति यद्वद्वयोदोषः सर्वधातुचयं महत् ।।४४।।
उल्कायोगो निहन्त्याशु पुण्ययोगं महाबलम् ।
स्नुहिवृक्षक्षीरलवः शरीरमिव निर्मलम् ।।४५।।
शुभयोगं निहन्त्याशु विद्युद्दोषो महाबलः ।
गुणानां निचयं वान्यं शुद्धान्नं लशुनं यथा ।।४६।।
सिद्धां तिथिं हन्ति सम्यक् पातश्चण्डीशसम्भवः ।
महानन्यान्गुणान्सर्वान्यथा श्वा हव्यसञ्चयम् ।।४७।।
विजयाख्यं महायोगं लत्तादोषो निहन्त्यलम् ।
लग्नोद्भवानन्यानान्त्रवृद्धिर्यथा तनुम् ।।४८।।

ब्रह्मदण्डं महायोगं योगो निर्घातसञ्ज्ञकः ।
गुणानन्यान्निहन्त्याशु क्षीरं मद्यलवो यथा ।।४९।।
कामधेनुं महायोगं क्षेपयोगो निहन्ति वै ।
क्षयरोगो यथा नूनं शरीरं विपुलं शुभम् ।।५०।।
ब्रह्मदण्डं महायोगं योगो निर्घातसञ्ज्ञकः ।
यथा हन्ति गुणान्सर्वान्पिशुनः स्नेहसञ्चयम् ।।५१।।[५३२]
प्रभञ्जनं महायोगं योगः संवर्तसञ्ज्ञकः ।
हन्ति यद्वन्महावृक्षं कोटरस्थोऽनलो यथा ।।५२।।
इन्द्रदण्डं महायोगं कालदण्डो महाबलः ।
हन्ति यद्वत्कफो रोगः शरीरं वज्रसन्निभम् ।।५३।।
इन्द्रदण्डं महायोगं योगस्त्वेकार्गलाह्वयः ।
हन्ति यद्वत्पूर्णगर्भं सन्निपातज्वरो यथा ।।५४।।
अभिजित्सञ्ज्ञकं योगं गण्डान्तयोगसञ्ज्ञकः ।
हन्ति यद्वन्मृगव्याधः पक्षिसंघमिवाखिलम् ।।५५।।
क्रूरग्रहैर्विद्धदोषो हन्ति गोधूलिकं शुभम् ।
यद्वन्महोदरो रोगः कायं दृढतरं भृशम् ।।५६।।
अवमाख्या तिथिर्हन्ति सौम्यग्रहकृतं शुभम् ।
लग्नलग्नांशकगुणान् राज्यक्ष्मेव सत्तनुम् ।।५७।।
ग्रहजन्माह्वयो दोषो गुरुलग्नस्थितं शुभम् ।
हन्ति तारापतिं यद्वत्सैंहिकेयो महाबलः ।।५८।।
प्रतिसूर्यो निहन्त्याशु यच्छुभग्रहजं शुभम् ।
लग्नलग्नांशसम्भूतं कुठारो विटपं[५३३] यथा ।।५९।।
प्रतिचन्द्रो निहन्त्याशु प्रतिशुक्रकृतं शुभम् ।
लग्नषडवर्गसम्भूतं मेघसंघमिवानिलः ।।६०।।

---

५३२ व१ ७७ क्रमाङ्कस्य श्लोकानन्तरमधिकम्–
ब्रह्मदण्डाह्वयो योगो योगो क्रकचसञ्ज्ञकः। गुणानन्यान्निहंत्याशु गन्धो मद्यभवो यथा ।।५९।।
५३३ व२ कुटपं

परिवेषो निहन्त्याशु लग्नलग्नांशजं गुणम् ।
शुभग्रहकृतं सर्वं मक्षिकाभोजनं यथा ।।६१।।
नीहारदोषो हन्त्याशु सौम्यग्रहकृतं शुभम् ।
अपि लग्नकृतं श्राद्धं वृषलीपुत्रको यथा ।।६२।।
अकालवृष्टिजो दोषः सकलं गुणसञ्चयम् ।
हन्ति यद्वत्पांशुलाख्या नितरां स्वकुलं महत् ।।६३।।
अकालगर्जितो दोषः सकलं गुणसञ्चयम् ।
हन्ति यद्वन्मेघवृन्दं तारकामण्डलं यथा ।।६४।।
दिग्धूमदोषो हन्त्याशु सकलं गुणसञ्चयम् ।
यथा दुर्वाससः शापः सुरेन्द्रमिव गर्वितम् ।।६५।।[५३४]
[५३५]दग्धलग्नोद्भवो दोषः सकलं गुणसञ्चयम् ।
हन्ति यद्वन्महावह्निरिन्धनानां च सञ्चयम् ।।६६।।
शून्यधिष्ण्योद्भवो दोषः सकलं गुणसञ्चयम् ।[५३६]
हन्ति यद्वन्महावृष्टिः सकलं भूतसञ्चयम् ।।६७।।
दोषः शून्यतिथेर्जातः सकलं गुणसञ्चयम् ।[५३७]
हन्ति यद्वद्वैनतेयः सर्वं सर्पकुलं महत् ।।६८।।
ये मण्डनाध्यायगुणापवादा
दोषाश्च सर्वे त्विह चिन्तनीयाः ।
गुणापवादं निखिलं समुक्त्वा
दोषापवादं त्वधुनाऽभिधास्ये ।।६९।।
प्रबला अपि दोषास्ते सीदन्त्येव कलौ युगे ।
पापरूपा यतो दोषाः पुण्यरूपाः सदा गुणाः ।।७०।।

---

५३४ व२ ९१ श्लोकानन्तरमधिकम्-
महाप्रभंजनो दोषः सकलं गुणसञ्चयम्। हन्ति यद्वच्छिलावृष्टिः सर्वसस्यफलं यथा ।।६६।।
५३५ व१ महाप्रभंजनो
५३६ व१ प्रथमपादलोपः
५३७ व२ प्रथमपादलोपः

एकं मृगं मृगी सूते पञ्च सूते वृकान्वृकी ।
अतारो विलयं याति घनमाला यथा तथा ।।७१।।
आलस्योपहत: पाद: पाद: पाखण्डमाश्रित:।
राजानं सेवते पाद: पाद: कृषिमुपाश्रित: ।।७२।।
एकं पादं त्रय: पादा भक्षयन्ति दिने दिने ।
तथापि वर्धते पाद: क्षीणं याति पदत्रयम् ।।७३।।
यथा दैत्या हता देवैस्तथा दोषा हता गुणै: ।
विविधैर्योगजै: सौम्यखेटजैर्लग्नवर्गजै: ।।७४।।
निर्देशान्नामतो यत्र वामं दोषमयं गुणै: ।
तत्रैव हन्ति नान्यत्र प्रशंसात्र परस्य च ।।७५।।
उत्पातयोगजं दोषं चरयोगो निहन्ति वै ।
मत्तेभेन्द्रचयं यद्वत्पञ्चवक्त्रो महाबल: ।।७६।।
निहन्ति मृत्युयोगं तु श्रेष्ठयोगो महाबल: ।
यथान्धकारं निबिडं भास्करस्योदयो यथा ।।७७।।
अन्धयोगकृतं दोषं शुभयोगो निहन्ति वै ।
यथा हरिकथालाप: पापं जन्मशतोद्भवम् ।।७८।।
काणयोगकृतं दोषं हन्ति कल्याणसंज्ञक:।
स योग: शार्दूलमिव सर्वदा मृगसंहति: ।।७९।।
पङ्गुयोगं निहन्त्याशु योगो वै वर्धमानक:।
काकानां संहतिं यद्वत्तद्वच्छ्येनो महाबल: ।।८०।।
सुधायोगो निहन्त्याशु योगं बधिरसंज्ञकम् ।
भुजङ्गसंहतिं यद्वद्वैनतेयो महाबल: ।।८१।।
महायोगो निहन्त्याशु योगं तु राक्षसाह्वयम् ।
दैत्यानां संहतिं यद्वच्छरो दाशरथेर्यथा ।।८२।।
दग्धयोगं निहन्त्याशु महायोगो महाबल: ।
पञ्चाक्षरी महापापं कोटिजन्मकृतं तु यत् ।।८३।।
ग्रहजन्मकृतं दोषं पूर्णयोगो निहन्ति वै ।

महादावानलो यद्वद्विस्तृतं विपिनं भृशम् ।।८४।।
गदायोगं निहन्त्याशु शङ्खयोगो महाबलः ।
आखूनां संहतिं यद्वन्मार्जारोऽमितविक्रमः ।।८५।।
ग्रहैः कृतं मृत्युयोगं योगश्चामृतसंज्ञकः ।
संजीवको गारुडाख्यो हन्ति यद्वद्विषोल्बणम् ।।८६।।
अग्निजिह्वद्वयं योगं पद्मयोगो निहन्ति वै ।
अधनं बलसम्पन्नो गुरुः सर्वकुलं यथा ।।८७।।
[538]विपद्योगं निहन्त्याशु योगश्चानन्दसंज्ञकः ।
एकादशीव्रतं यद्वत्पापं जन्मशतोद्भवम् ।।८८।।
भान्तरालकृतं दोषं सिद्धियोगो निहन्ति वै ।
जीमूतसञ्चयं यद्वदनिलश्चोद्धतो भृशम् ।।८९।।
योगान्तरालकं दोषं हन्ति सिद्धा तिथिः स्वयम् ।
भागीरथीजलं यद्वदघं जन्मशतोद्भवम् ।।९०।।
मासान्ते त्रिदिनं दोषो न नष्टो गुणकोटिभिः ।
वर्षान्ते पक्षदोषोऽपि तद्वदेव न सीदति ।।९१।।
उपप्लवर्क्षजो दोषश्चोत्पातर्क्षभवस्तथा ।
पापविद्धर्क्षजः पापसंस्थभदोषसञ्चयः ।।९२।।
एते दोषाश्च चत्वारो महाबलतरास्त्वमी ।
सर्वदा नैव सीदन्ति गुणानां कोटिकोटिभिः ।।९३।।
महाशूलाह्वयं[539] योगं सिद्धियोगो निहन्ति वै ।
कृष्णाष्टमीव्रतं यद्वत्पापं जन्मशतोद्भवम् ।।९४।।
दुष्टयोगं निहन्त्याशु योगः पीयूषसंज्ञकः ।
सुदर्शनं महाचक्रं करोति दनुजक्षयम् ।।९५।।
शकटाख्यं महायोगं कपिलो नामयोगराट् ।
हन्ति मत्स्यध्वजं यद्वद्भवनेत्रोद्भवोऽनलः ।।९६।।

---

५३८ व२ विष, वे. विष

५३९ व२ फलाह्वय

समुद्रसंज्ञको योगो योगं त्वनिलसंज्ञकम् ।
हन्ति यद्वन्महावायुर्वारिवाहचयं महत् ।।९७।।
मृत्युतुल्यं महादोषं विनाशं कुरुते सदा ।
तुङ्गमित्रस्वर्क्षसंस्थौ देवदैत्येन्द्रपूजितौ ।।९८।।
महाकुलिकयोगं तु वापीयोगो निहन्ति वै ।
सर्पाणां संहतिं यद्वन्महानकुलसंहतिः ।।९९।।
हालाहलाह्वयं नामामृतयोगो निहन्ति वै ।
भागीरथी यथा स्नानं पापं जन्मशतोद्भवम् ।।१००।।
पक्षच्छिद्रोक्तनाडीनां दोषं हन्ति सदा तथा ।
पुण्डरीकाह्वयो योगः पिनाकी त्रिपुरं यथा ।।१०१।।
भानुवारादिसम्भूतान्पापयोगान्निहन्ति वै ।
गुणशेखरयोगोऽयं राघवो रावणं यथा ।।१०२।।
दिवैव मृत्युदं योगं हन्ति योगो महाबली ।
धूर्जटी नाम योगोऽयं त्विन्धनं पावको यथा ।।१०३।।
दिवैव रोगदं योगं रोगं हन्ति महाबली ।
गुणभास्करयोगोऽयं विपिनं पावको यथा ।।१०४।।
महाहालाहलं योगं गुणभास्करसंज्ञकः ।
योगो हन्ति यथा तद्वत्कुमारस्तारकासुरम् ।।१०५।।[५४०]
चन्द्रशेखरयोगोऽयं महाकाणान्धबाधिरान् ।
दोषान्हन्ति यथा तद्वद्वालिनं राघवो यथा ।।१०६।।
गुणमर्दनयोगाख्यं योगः श्रीवत्ससंज्ञकः ।
हन्ति यद्वन्महावृक्षान्प्रचण्डः प्रबलोऽनिलः ।।१०७।।
अर्कादिवारसम्भूतान्कालकूटाख्ययोगकान् ।
हन्ति यद्वत्सिंहयोगः पापं पञ्चाक्षरी यथा ।।१०८।।[५४१]

---

५४० वर श्लोकलोप; १३१तः१३४पर्यन्तं

५४१ वर मध्येऽधिकम्–महायोगगुणं गुणपाश्वेति संज्ञकः। योगो हंति यथा तद्वद्वालिनं राघवो यथा।।३६।। गुणमर्दनयोगाय पापपक्षचरी यथा ।।३७।।

धूमयोगं निहन्त्याशु योगः शार्दूलसंज्ञकः ।
हन्ति यद्वद्द्विप्रमुख्यं पापः पातकसंज्ञकः ।।१०९।।
उपग्रहाह्वयं दोषं सिद्धियोगो निहन्ति वै ।
मर्दयतो बलातैलं वातरोगं यथा तथा ।।११०।।
इन्द्रयोगो निहन्त्याशु व्यतीपाताह्वयं सदा ।
योगं यद्वद्ब्रह्मवादी द्वन्द्वसंसारिकं [542]सुखम् ।।१११।।
परिवेषाह्वयं योगं हन्ति यद्वन्महाबलम् ।
रत्नमालाह्वयो योगः पिनाकी त्रिपुरं यथा ।।११२।।
गुणकल्पतरुर्योगः कुपुत्रः स्वकुलं यथा ।
हन्तीन्द्रधनुषं योगं महाबलवत्तरं शरम् ।।११३।।
[543]वातसंज्ञं महादोषं हन्ति यद्वन्महाबली ।
योगो गुणमणिः सर्वं प्रणवः पापसञ्चयम् ।।११४।।
गुणार्णवमहायोगो हन्ति निर्घातसंज्ञकम् ।
योगं यद्वन्पापचयं निरन्तरहरिस्मृतिः ।।११५।।
सुदर्शनमहायोगो हन्ति निर्घातसंज्ञकम् ।
हन्ति यद्वद्गुल्मचयं प्रणाममिव शूलिनि ।।११६।।
गुणसागरयोगोऽयं योगं कुलिकसंज्ञकम् ।
हन्ति यद्वन्महारोगं हिङ्ग्वादिको महान्तु वै ।।११७।।
उल्कायोगं निहन्त्याशु पुण्ययोगो महाबलः ।
अश्मरीसंज्ञकं योगं यद्वच्छ्वेतार्कमूलकम् ।।११८।।
शुभयोगो निहन्त्याशु विधुदोषं महाबलम् ।
महोदरव्याधिचयं स्नुहिक्षीरं यथा तथा ।।११९।।
चण्डायुधं सचण्डीशं हन्ति सिद्धातिथिर्यथा ।
आन्त्रवृद्धिर्यथा कायं निखिलं सुदृढं यथा ।।१२०।।
विजयाख्यो महायोगो लाक्षादोषं निहन्ति वै ।

---

५४२ व२ मुनिः
५४३ व१,व२ केतु

यथा नयनजं पुष्पं [५४४]शिग्रुमूलं यथा बली ।।१२१।।
ब्रह्मदण्डाह्वयो योगो दोषं निर्घातसंज्ञकम् ।
हन्ति यद्वन्नेत्ररोगं नलजं वीरसंयुतम् ।।१२२।।
कामधेनुमहायोगो धूम्रयोगं निहन्ति वै ।
उन्मादरोगं कल्याणघृतं यद्वन्महाबलम् ।।१२३।।
ब्रह्मदण्डाह्वयो योगो योगं क्रकचसंज्ञकम् ।
हन्ति तद्वद्राजरोगं यद्वद्दंडीरसंज्ञकम् ।।१२४।।[५४५]
[५४६]प्रभञ्जनो महायोगो योगं संवर्तसंज्ञकम् ।
शतावरीघृतं हन्ति मूत्रकृच्छ्रं यथा तथा ।।१२५।।
इन्द्रदण्डो महायोगो कालदण्डं महाबलम् ।
हन्ति यद्वत्त्रिकटुकं कासश्वासं महाबलम् ।।१२६।।
एकार्गलं महादोषं इन्द्रदण्डो निहन्ति वै ।
कालकूटं विषं यद्वत्तद्वद्देवेन्दुशेखरः ।।१२७।।
गण्डान्तदोषमखिलमभिजिद्योगसंज्ञकः ।
हन्ति यद्वत्सर्वपापाद्राजसूयपरो नृपः ।।१२८।।
गोधूलिको महायोगो विद्धभं पापखेचरैः ।
हन्ति यद्वत्पापराशिं यथा लक्ष्मीपतेः स्मृतिः ।।१२९।।
अवमाख्यातिथेर्दोषं केन्द्रगो देवपूजितः ।
हन्ति यद्वत्पापचयं द्वित्रिषड्वार्षिकं व्रतम् ।।१३०।।
ग्रहजन्माह्वयं योगं शुभः केन्द्रगतो यथा ।
हन्ति पापचयं भक्त्या प्रणाममिव शंकरे ।।१३१।।
त्रिद्युस्पृग्यामदोषं यः शुभः केन्द्रगतः सदा ।
हन्ति यद्वत्पापचयमशून्यशयनव्रतम् ।।१३२।।
प्रतिसूर्याह्वयं दोषं केन्द्रगः शुभखेचरः ।

---

५४४ व२ राशिमूले महाबलं
५४५ व१ पूर्णश्लोकलोपः
५४६ व१ विप्लुदंडाह्वयो योगो

निहन्ति यद्वत्पिशुन: सकलं स्नेहसञ्चयम् ।।१३३।।
प्रतिचन्द्रकृतं दोषं लाभग: पूर्णचन्द्रमा: ।
हन्ति यद्वत्पापचयं सुलब्धाध्यापको द्विज: ।।१३४।।
नीहारदोषं हन्त्याशु त्रिषडायगतो रवि: ।
हन्ति यद्वत्क्षीरचयं सद्यस्त्वाम्लरसो यथा ।।१३५।।
अकालगर्जितं दोषं केन्द्रग: शुभखेचर: ।
हन्ति यद्वत्पाशुपतमन्धकं नाम राक्षसम् ।।१३६।।
अकालवृष्टिजं दोषं गुरुरेको महाबली ।
हन्ति यद्वद्रामशर: खरनामासुरं भृशम् ।।१३७।।
दिग्धूमदोषं हन्त्याशु लाभस्थानगत: शुभ: ।
हन्ति यद्वत्पापचयं हरे: पादोदकं महत् ।।१३८।।
परिवेषकृतं दोषं षडवर्ग: शुभखेटज: ।
निहन्ति यद्वद्व्रतिनं चन्द्र: पापांशसंस्थित: ।।१३९।।[५४७]
महाप्रभञ्जनं दोषं दशमायगत: शशी ।
हन्ति यद्वत्पापचयं शिवरात्रिव्रतं महत् ।।१४०।।
दग्धलग्नोद्भवं दोषं लाभग: क्षितिनन्दन: ।
हन्ति यद्वन्महापापं कृष्णाष्टमीव्रतं यथा ।।१४१।।
शून्यधिष्ण्योद्भवं दोषं रिपुस्थानगत: कुज: ।
हन्ति यद्वन्महापापं तप्तकृच्छ्रव्रतं यथा ।।१४२।।
दोषं शून्यतिथेर्जातं लाभग: सौम्यखेचर: ।
हन्ति यद्वन्महापापं कृच्छ्रसान्तपनं यथा ।।१४३।।
त्रिद्युस्पृगाख्यदोषं च हन्ति सिद्धा तिथि: स्वयम् ।
दावानलो[५४८] यथा सर्वं निखिलं विपिनं भृशम् ।।१४४।।
अपवादै: शमं यान्ति दोषाश्चैव तथा गुणा: ।

५४७ व१,व२ पूर्णश्लोकलोप:

५४८ वे. कालानलो

न यान्ति ते महादोषाः कदाचिद्गुणकोटिभिः ।।१४५।।
गुणांश्च दोषांश्च गुणापवादा-
न्दोषापवादांश्च विचिन्त्य सम्यक् ।
गुणाधिकं दैवविदल्पदोषं
कालं वदेत्तं खलु मङ्गलेषु ।।१४६।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां गुणदोषापवादाध्याय-स्त्रिश्चत्वारिंशः ।।४३।।

४४

४४

२.४४.० वस्त्रपरिधानम्

सन्मानायतनं नवाम्बरधृतिः सत्कीर्तिसौभाग्यदा
शत्रूणां दमना सुहृत्प्रियकरी सद्भाषणा कान्तिदा ।
विद्यानां तिलका सभासु जयदा त्रैलोक्यवश्यंकरी
तस्मात्तत्फलमृक्षवारवशतो वक्ष्ये शुभं चोत्तरम् ।।१।।
नववस्त्रभृतः क्रमशो भवति फलं दस्त्रधिष्ण्यतो नियतम् ।
सन्ततं त्वम्बरलाभं त्वतिविपुलं क्लेशमर्थहानिश्च ।।२।।
क्षितिपतिपूजानियतं स्वजनविरोधः [५४९]स्वमित्रतो हानिः ।
स्थलजलकनकप्राप्तिर्विपुला कीर्तिर्विरोधमखिलजनैः ।।३।।[५५०]
वह्निर्भयं सुतहानिर्विरोधलाभः स्वबन्धुजनपूजा ।
स्थितिमखिलं लाभः पशुलाभो भूषणलाभश्च ।।४।।
धनधान्यहानिरतुला स्वजनविरोधः कलत्रकलहः स्यात् ।
भूसुरपूजाहानिर्बहुविधरोगः समस्तगुणलाभः ।।५।।
कदन्नाशनलाभः सततं विदेशगमनं शत्रुतो भीत्या(तिः) ।
परवनिताजनलाभः प्रभूतमणिकनकवस्तुलाभः स्यात् ।।६।।
अनलोपहतेर्मूषककाष्ठादिलोहप्रसङ्गहते: ।
हरिद्रारससूत्रेण नवधाभिहते शुभाशुभं चिन्त्यम् ।।७।।
अम्बरकोणेष्वमरा निवसन्ति तदन्त्यमध्ययोर्मनुजाः ।
[५५१]परत्रितये दनुजाः शुभाशुभं चिन्तयेन्नवांशेषु ।।८।।
धनलाभं त्वमरांशे मनुजांशे पुत्रपौत्रधनलाभः ।
रोगभयं दनुजांशे प्रान्ते सर्वांशके नेष्टफलम् ।।९।।
नवाम्बरं सम्भृतमाशु जीर्णं

---

५४९ व१ श्लोकलोपः स्वमित्रत अन्तपर्यन्तम्
५५० व२ ३ श्लोकतः १३ पर्यन्तं श्लोकलोपः
५५१ व१ अपर

तिग्मांशुवारांशकलग्नवर्गे ।
निशापतेरम्बुभिरार्द्रमेत-
त्कुजस्य वर्गे भयमेव वह्नेः ।।१०।।
लाभप्रदं सोमसुतस्य वर्गे
वर्गे गुरोर्बुद्धि दयासुरेज्ये ।
दुःखप्रदं सूर्यसुतस्य वर्गे
तस्मिन्क्षणे वा फलमेतदेव ।।११।।
छत्रध्वजस्वस्तिकवर्धमान-
श्रीवत्समत्स्याम्बुजतोरणानाम् ।
च्छेदाकृती राक्षसभागगोऽपि
लक्ष्मीसमृद्धिं कुरुते तदानीम् ।।१२।।
कपोतकङ्कोष्ट्रशृगालकाक-
क्रव्यादगोमायुकबन्धरूपाः ।
छेदाकृतिर्देवतभागगोऽपि
करोति दुःखं भयमाशु नूनम् ।।१३।।

इति श्रीब्रह्मर्षिवृद्धवशिष्ठविरचितायां संहितायां वस्त्रपरिधानाध्यायश्चतुश्चत्वारिंशः ।।४४।।

४५

२.४५.० उत्पाताः

अथातः संप्रवक्ष्यामि उत्पाताध्यायमुत्तमम् ।
अन्यत्वं प्रकृतेर्यत्तदसावुत्पातसंज्ञकम् ।।१ ।।[५५२]
[५५३]अधर्मतस्त्वसत्याच्च नास्तिक्यादतिलोभतः ।
अनाचारान्नृणां नित्यमुपसर्गः प्रजायते[५५४] ।।२ ।।
तद्वशास्त्रिविधोत्पाता जायन्ते शोकदुःखदाः ।
दिव्यान्तरिक्षक्षितिजविकारा घोररूपिणः ।।३ ।।
ग्रहर्क्षजाः केतवश्च उत्पाता दिव्यसंज्ञकाः ।
निर्घातपरिवेषोल्कापुरन्दरधनुर्ध्वजाः ।।४ ।।
लोहितैरावतोष्ट्राश्वकबन्धपरिघादयः ।
एवमाद्या महोत्पातास्त्वन्तरिक्षाह्वयास्त्वमी ।।५ ।।
उत्पद्यते क्षितौ यच्च स्थावरं वाथ जङ्गमम् ।
तदेकदेशिकं भौममुत्पातं परिकीर्तितम् ।।६ ।।
भौमास्तु तुच्छफलदास्त्वन्तरिक्षास्तु मध्यमाः ।
सम्पूर्णफलदा दिव्या वर्षादर्धात्तदर्धतः ।।७ ।।
भौमं शान्त्या शमं याति मार्दवं त्वन्तरिक्षजम् ।
दिव्यं होमान्नगोभूमिदानैस्तत्कोटिहोमतः ।।८ ।।
महोपहाराद्रुद्रस्य गोदोहात्तत्पुरःसरम् ।
अलंकृते क्षितितले यावत्क्षीरप्लवं भवेत् ।।९ ।।
अपि दिव्यं शमं यान्ति किं पुनस्त्वितरद्वयम् ।
अकृत्वा शान्तिकं राजा दुःखाम्भोधौ निमज्जति ।।१० ।।
पुरे जनपदे कोशे वाहनेषु पुरोहिते ।

---

५५२ व२ १श्लोकतः ३२पर्यन्तं सम्पूर्णश्लोकलोपः
५५३ चौ.अधर्मत्वादसत्याच्च
५५४ वे प्रजापतेः

स्त्रीपुत्रात्मनि भूपस्य पच्यते दैवमष्टभिः ।।११।।
[555]हस्तैः षोडशभिः कार्यं चतुरस्रं समन्ततः ।
मण्डपं याज्ञिकैर्वृक्षैरथवा वनदारुभिः ।।१२।।
चतुर्द्वारसमायुक्तं तोरणाद्यैरलङ्कृतम् ।
हस्तैश्चतुर्भिस्तन्मध्ये कुण्डं कार्यं समन्ततः ।।१३।।
खातं हस्तचतुर्भिश्च वप्रत्रयसमन्वितम् ।
षडङ्गुलोन्नतस्त्वाद्यो द्वादशाङ्गुलविस्तृतः ।।१४।।
दशाङ्गुलोन्नतो मध्यो ह्यष्टाङ्गुलसुविस्तृतः ।
चतुर्दशाङ्गुलोत्सेधश्चतुरङ्गुलविस्तृतः ।।१५।।
तृतीयवप्रः कर्तव्यो योनिश्चैका तु पश्चिमे ।
चतुर्दशाङ्गुलैर्दीर्घा चोन्नता षोडशाङ्गुलैः ।।१६।।
हीनाधिका न कर्तव्या विस्तारः षड्भिरङ्गुलैः ।
कुण्डस्य लक्षणं त्वेकं कोटिहोमे तु सर्वदा ।।१७।।
ईशान्यां वेदिका कार्या सार्धहस्तप्रमाणतः ।
उन्नता विस्तृता कार्या प्रागुदक्प्रवणा शुभा।।१८।।
सर्वदेवमयी त्वाद्या शिवपूजापुरःसरम् ।
ग्रहान्स्तानर्चयेत्तत्र पूर्वोक्तविधिना ततः ।।१९।।
पालाशसमिदाज्यान्नैर्मुखान्तेऽष्टशतं पृथक् ।
अघोरमन्त्रेण ततो ग्रहहोमं च कारयेत् ।।२०।।
तिलहोमं व्याहृतिभिर्घृतोक्तं जुहुयात्ततः ।
द्वारे हि जापकैः स्वस्ववेदपारायणं क्रमात् ।।२१।।
चमकं नमकं सूक्तपुरुषोक्ताङ्जापकैः ।
होमं नवभिराचार्यैः कार्यं तद्ब्रह्मणा सह ।।२२।।
शिवविष्णोः कथालापैर्दिनशेषं नयेत्ततः ।
एवं यावत्कोटिहोमस्तावत्कार्यमतन्द्रिभिः ।।२३।।

---

५५५ व१ अस्तैः

नैवेद्यान्ते ततः पश्चाच्छान्तिवाचनपूर्वकम् ।
ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ।।२४।।
तदर्धं वा तदर्धं वा लक्षहोममथापि वा ।
कार्यं दोषानुसारेण वित्तशाठ्यविवर्जितः(तम्) ।।२५।।
होमान्ते दक्षिणां दद्याच्चतुर्विंशतिऋत्विजान् ।
प्रतिद्विजमलङ्कारं सार्धनिष्कशतद्वयम् ।।२६।।
तदर्धं वा तदर्धं वा दोषवित्तानुसारतः ।
एवमेव यशःकामैर्नृपैः कुर्याच्च भक्तितः ।।२७।।
व्रीहिभिश्चायुरर्थी चेत्सर्वकामी तिलैश्च सः ।
उक्ता साधारणा शान्तिरुत्पातानामतः परम् ।।२८।।
उत्पातश्चैव शान्तिश्च वक्ष्यतेऽत्र पृथक् पृथक् ।
मन्त्रद्रव्यमनुष्ठानं भक्त्या कार्यमतन्द्रितैः ।।२९।।
अर्चाः प्रनृत्यन्ति पतन्ति यद्वा
चलन्ति रोदन्ति हसन्ति यत्र ।
पचन्ति जल्पन्ति च चेष्टयन्ति
स्थानान्तरं वाप्यथवा व्रजन्ति।।३०।।
वमन्ति धूमानलरक्ततोयं
स्नेहं दधिक्षीरसुराक्षतादि ।
अङ्गारकार्पासतुषास्थिरोम-
कबन्धपाषाणकरोदनादि ।।३१।।
एवमाद्या विकारास्ते दृश्यन्ते प्रतिमासु च ।
राज्ञां जनपदानां च नाशाय द्राग्भवन्ति हि ।।३२।।
ऋषिब्रह्मजं पितृजं द्विजानामेव वै कृतम् ।
शिवोत्थं लोकपालोत्थं शिशूनां नृपतेश्च तत् ।।३३।।
लोकानां विष्णुसम्भूतं ग्रहोत्थं तत्पुरोधसाम् ।
स्कन्दोत्थं मण्डलीकानां विशाखोक्तं क्षमाभुजाम् ।।३४।।
गणेशोत्थं च भूपस्य व्यासोक्तं तच्च भूपतेः ।

अन्योत्थं यद्विकारं तल्लोकाभावाय सर्वदा ।।३५।।
फलपाको भवेदष्टमासैस्तद्वत्सरेण वा ।
उत्पातानामथैतेषां शान्तिं वक्ष्ये प्रयत्नतः ।।३६।।
दृष्ट्वा दैवविकारं तद्दिनत्रयमुपोषितः ।
पुरोहितः शुद्धमनाः शुद्धभावो जितेन्द्रियः ।।३७।।
चतुर्थदिवसे गत्वा दीपैः सार्धं शिवालयम् ।
सहस्रकलशस्नानं कुर्यात्संकल्पपूर्वकम् ।।३८।।
तल्लिङ्गमन्त्रैर्गन्धाद्यैर्वस्त्रैर्देवं समर्चयेत् ।
घृतोपहारवित्तान्नैर्भक्त्या चैव समर्चयेत् ।।३९।।
ग्रहशान्त्या[556] मुक्तकुण्डे स्थापयेच्च हुताशनम् ।
पालाशसमिद्याज्यान्नैस्तल्लिङ्गैर्वेदमन्त्रकैः ।।४०।।
अष्टोत्तरसहस्रं वा पृथगष्टोत्तरं शतम् ।
तिलहोमादिकं सर्वं शेषं पूर्ववदाचरेत् ।।४१।।
रात्रौ जागरणं कुर्यान्नृत्यगीतादिभिः सह ।
आसप्तरात्रात्कृत्वैवमथवा पञ्चरात्रकम्[557] ।।४२।।
एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते ।
अनग्नौ दृश्यते ज्वाला काष्ठयुक्तो न दीप्यते ।।४३।।
सन्धुक्षतोऽपि नृपतेः पीडा जनपदस्य च ।
यस्मिन्पुरे जनपदे धूमोऽनग्नौ महद्रजः ।।४४।।
दिवान्धकारो वृक्षाणां राजनाशो भवेत्तदा ।
रात्रावदर्शनं व्यभ्रे तेषामग्निश्च निष्प्रभः ।।४५।।
तदधीशस्य राष्ट्रस्य दुःखशोकभयप्रदः ।
शयनासनवस्त्राणां पादुकेभ्यो नृगात्रतः ।।४६।।
माहिषोष्ट्राश्वगोहस्तिपशुकेशेषु गात्रतः ।

---

५५६ व२ ग्रहणत्वाभुक्तकुंडे
५५७ वे.पा.वापि त्रिरात्रकं

धूमाग्निविस्फुलिङ्गा वा दृश्यन्ते च जलादिषु ।।४७।।
राजराष्ट्रविनाशः स्याच्छत्रुतोऽग्नेर्भयं भवेत् ।
आयुधानि प्रज्वलन्ति कोशेभ्यो निर्गतानि च ।।४८।।
वेपमानानि यदि वा जल्पन्त्यथ रुदन्ति वा ।
हसन्ति तुमुलं युद्धमत्यन्तनिकटं वदेत् ।।४९।।
उत्पातानामथोक्तानां शान्तिं वक्ष्ये विधानतः ।
रुद्राभिषेकं रुद्रेण नैवेद्यान्तं प्रपूजयेत् ।।५०।।
पूर्वोक्तलक्षणे कुण्डे स्थापयेच्च हुताशनम् ।
मुखान्ते जुहुयादग्निं मन्त्रैरष्टसहस्रकम् ।।५१।।
क्षीरवृक्षसमिद्भिश्च सर्षपैश्च पृथक् पृथक् ।
तिलहोमं व्याहृतिभिर्ब्राह्मणान्भोजयेत्ततः ।।५२।।
एवं यः कुरुते भक्त्या तस्माद्दोषात्प्रमुच्यते ।
ऋत्विग्भ्यो दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ।।५३।।
एकरात्रं त्रिरात्रं वा शेषं पूर्ववदाचरेत् ।
अकस्मादेव वृक्षाणां शाखाभङ्गो भवेद्यदि ।।५४।।
[५५८]राष्ट्रभङ्गं वदेच्छीघ्रं हसन्ते देशनाशनम् ।
रुदितो व्याधितो भीतिः कम्पने ग्रामकम्पनम् ।।५५।।
विस्फुलिङ्गेऽथवा धूमे ज्वलिते वह्नितो भयम् ।
फलपुष्पोद्गमे काले वृक्षाणां यदि शीघ्रतः ।।५६।।
राष्ट्रविद्रावणं बालवृक्षेषु कुसुमेऽथवा ।
शिशुहानिर्भवेत्क्षीरस्रवणे द्रव्यनाशनम् ।।५७।।
[५५९]मद्ये वाहननाशः स्याच्छोणिते युद्धमादिशेत् ।
स्नेहस्रावेऽनर्घभयं जलस्रावे महद्भयम् ।।५८।।
क्षौद्रद्रावो भवेद्यत्र रोगशोकभयं भवेत् ।
शुष्कवृक्षे चाङ्कुरिते वृक्षहानिस्त्वनर्घता ।।५९।।

---

५५८ व१ रणोद्योगं
५५९ व१ मध्ये

अकस्माच्छोषिते वृक्षे तदेव फलमिष्यते ।
पतिते स्वयमस्थाने भयं देवकृतं भवेत् ।।६०।।
जल्पने चलने वृक्षे राजराष्ट्रविनाशनम् ।
कृत्वाभिषेकं [560]वृक्षस्य यावच्छक्यं प्रयत्नतः ।।६१।।
अर्चयेद्गन्धपुष्पस्रग्वस्त्रच्छत्रोपहारकैः ।
तत्पश्चादष्टभिर्हस्तैश्चतुर्भिर्वाथ मण्डपम् ।।६२।।
कृत्वाथ कुण्डं तन्मध्ये सम्यक्तत्पूर्ववत्ततः ।
द्वादशकृत्वो नमकं चमकं च भवेदितः ।।६३।।
अग्निसंस्थापनं कृत्वा मुखान्ते जुहुयाच्चरुम् ।
रुद्राय स्वाहेत्यनेन मन्त्रेण च सकृद्धुतम् ।।६४।।
पृथगष्टशतं भक्त्या तिलव्याहृतिभिस्ततः ।
ऋत्विग्भ्यो दक्षिणां दद्याच्छेषं पूर्ववदाचरेत् ।।६५।।
विप्रान्सन्तोषयेद्भक्त्या घृतपायसभोजनैः ।
उत्पातानां वृक्षजानां शान्तिमेषां प्रकल्पयेत् ।।६६।।
एवं यः कुरुते शान्तिं तस्माद्दोषात्प्रमुच्यते ।
नालेऽस्मिन्सर्वसस्यानामेकस्मिन्द्वित्रिसम्भवे ।।६७।।
मरणं तत्तदीशानां युग्मे पुष्पफले सति ।
वृक्षस्य सुलतादीनामतिवृद्धिफलानि च ।।६८।।
शत्रोरागमनं भाव्यमचिरान्नियमेन वा ।
उक्ततैलाधिकं हीनं तिलेभ्यो वा भवेद्यदा ।।६९।।
तैलं तदान्नतो भीतिरैरण्डाद्यमथापि वा ।
विकारैः फलपुष्पाद्यैः सौम्येन वरुणादिभिः ।।७०।।
जुहुयात्सौम्यमन्त्रेण पशुनिर्वापणाच्छुचिः ।
सस्ये विकारे तत्क्षेत्रं दत्त्वा विप्राय तत्र वै ।।७१।।
मन्त्रेण च चरुं हुत्वा तस्माद्दोषात्प्रमुच्यते ।

---

५६० व२ लोपः - वृक्षस्य शब्दतः-तन्मध्ये शब्दपर्यन्तं (श्लो.६३).

अतिवृष्टावनावृष्टौ क्षुद्भयः शत्रुतो भयम् ।।७२।।
[५६१]अनृतौ चेद्रोगभयमनृते (सन्नृतौ) भूभुजां वधः ।
संप्रवत्तेषु ऋतुषु शीतोष्णं तद्विपर्ययात् ।।७३।।
षण्मासाद्राष्ट्रभीतिः[५६२] स्यादथवा रोगदुःखतः ।
अकाले सततं वृष्टिः सप्ताहं नृपतेर्वधः ।।७४।।
रक्तवृष्टौ रणोद्योगो मांसवृष्टौ महद्रणम् ।
मरणं स्यादस्थिवृष्टौ वसावृष्टौ हि तत्फलम् ।।७५।।
क्षौद्रवर्षे राष्ट्रनाशस्त्वङ्गारैः [५६३]पांशुभिः सदा ।
धान्याकफलपुष्पाद्यैर्लोहैः स्तेयैर्महद्भयम् ।।७६।।
पर्णैस्तृणैः काष्ठवर्षैस्तदेव फलमादिशेत् ।
पाषाणवृष्टिरभ्रेषु प्राणिवृष्टिरथापि वा ।।७७।।
चित्रवृष्टिर्यदि भवेत्सस्यानामीतिकारणम् ।
आकाशे निर्मले भानोर्यदा छाया न दृश्यते ।।७८।।[५६४]
दृश्यते वा प्रतीपा सा तदा क्षुद्भयमादिशेत् ।
रवीन्दुवायुपर्जन्ययोगः कार्यस्त्ववग्रहे ।।७९।।[५६५]
[५६६]पूर्ववत्स्वर्णगोदानै रत्नैर्दोषात्प्रमुच्यते ।
समीपस्थौ नदी यत्र नगराद्दूरगा यदि ।।८०।।
तत्पुरं कुरुते शून्यं यदि नासौ प्रतीपगा ।
रक्तमांसकृमिस्नेहवाहनी शत्रुतो भयम् ।।८१।।

---

५६१ व१ अऋतौ

५६२ व२ सादिष्टभीतिः

५६३ वे.पशुभिः

५६४ व१ मध्ये ७८ श्लोकान्तरमधिकम्- दृश्यते वा प्रतिमा सा प्रवदेत् शत्रुतो भयं।
वह्निचन्द्रचापभेषु प्राच्यां वा पश्चिमेपि वा ।।८०।। रात्रौ यदि भवेद्वापि तदा क्षुद्भयमादिशेत्।।

५६५ व२ श्कोकद्वयं(७९-८०) मध्येऽन्यरूपेण लिखितम्- दृश्यते वा प्रतीपा सा प्रवदेच्छत्रुतो भया। वक्री इन्द्रचापेषु प्राच्यां वा पश्चिमेपि वा।।८०।।

५६६ व२ पूर्वकावर्गीगो-

अशोषिते प्रवाहादौ शोषितेऽपि च तत्फलम् ।
गीतं प्रजल्पनं ज्वाला धूमः क्वाथोऽप्यरोदनम् ।।८२।।
एवमादीनि कूपेषु जनानां निधनाय वै ।
अखाते सलिले जाते खातेऽम्बुन्यगुणे यदि ।।८३।।
तोयाशये वापि कृतौ शाखिनः शत्रुतो भयम् ।
विकारे च तथा कुर्यात्तन्मन्त्रैर्वरुणस्य च ।।८४।।
पूजाहोमं यथा पूर्वमरिष्टं याति तच्छमम् ।
हीनकालेऽधिके तस्य देशस्य च [५६७]कुलस्य च ।।८५।।
हीनकालेऽधिके काले प्रसवे सति योषिताम् ।
असंख्यदिवसे युग्मप्रसवे चापि नाशनः ।।८६।।
अमानुषानि बीजानि जायन्ते चाण्डजानि च ।
हीनङ्गस्त्वधिकाङ्गश्च अनङ्गाः सम्भवन्ति हि ।।८७।।
विशिरो[५६८] द्वित्रिशिरसो विमुखाः पक्षिसन्निभाः।
विनाशं तस्य देशस्य [५६९]राष्ट्रस्य च विनिर्दिशेत् ।।८८।।
हस्तिनी वडवा गौर्वा युग्मं यत्र प्रसूयते ।
विजात्यं वा विकारं वा मासैः षड्भिर्नृपक्षयम् ।।८९।।
उष्ट्रमहिष्यो वेत्यादिप्रसवे कलहागमः ।
उक्तानां च विकाराणां शान्तिं वक्ष्ये प्रयत्नतः ।।९०।।
त्यक्तव्या परदेशेषु नार्यस्ताः सहितार्थिना ।
द्विजान्सन्तर्पयेदन्नैर्ग्रहशान्तिं च कारयेत् ।।९१ ।।
चतुष्पादाश्च यूथेभ्यस्त्यक्तव्याः परभूमिषु ।
नगरं स्वामिनं यूथमन्यथा तु विनाशयेत् ।।९२।।
गोगजाश्वोष्ट्रमहिषनरपश्वादयो यथा ।
रमन्ते चेद्वियोनौ तु पक्षिणोर्वान्यजन्तुषु ।।९३।।

---

५६७ व२ कुलस्य शब्दलोपः
५६८ व१ विशिना
५६९ व२ कुलस्य

धेनुर्धेनुं पिबेद्यद्वा अनड्वाननडुहं प्रति ।
श्वानो वापि पिबेद्धेनुं धेनुः श्वानमथापि वा ।।९४।।
एवमादिविकारा ये प्राणिनां प्रभवन्ति चेत् ।
मासत्रयान्तरे नूनं परचक्रागमं वदेत् ।।९५।।
त्यक्त्वा[५७०] दिवाशनं होमं पूर्ववत्कारयेज्जपम् ।
प्राजापत्येन मन्त्रेण समिदाज्यचरुं क्रमात् ।।९६।।[५७१]
हुत्वा च तर्पयेद्विप्रान्बहुस्वर्णसुभोजनैः ।
एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते ।।९७।।
अकृत्वा नास्तिको लोभादश्नुते सर्वसंकटान् ।
आरोहकं विना यत्र वाहनं यदि गच्छति ।।९८।।
आरोहके विद्यमाने न व्रजेद्वाहनं यदा ।
अकस्माद्रथचक्राणि पादभङ्गो भवेद्यदि ।।९९।।
परचक्रागमं तत्र वदेद्वत्सरतो भृशम् ।
अताडिते तूर्यनादस्ताडिते नादवर्जिते ।।१००।।
अथ नानाविधा नादा राजराष्ट्रविनाशनम् ।
तूर्यादिनादा नभसि [५७२]श्रूयन्ते वापि निःस्वनाः[५७३] ।।१०१।।
परैरभिभवस्तत्राप्यथवा महती गदा ।
स्वलाङ्गूलेन स्वतनुं धेनुर्यदि सुवेष्टिता ।।१०२।।
नादाकारं शूर्पनिभं दर्विरूपमथापि वा ।
मुसलोलूखलं रूपं विकारं वा भवेद्यदि ।।१०३।।[५७४]
शृगालसदृशे नादे विकारे वाथ जल्पिते ।
हसिते रोदने वापि भयं भवति शीघ्रतः ।।१०४।।

---

५७० वर कृत्वा देवानिश
५७१ व१ पूर्णश्लोकलोपः
५७२ व१ श्रूयन्ते शब्दलोपः, व१ लोपः श्रूयन्ते शब्दतः सुवेष्टिता(श्लो.१०२)पर्यन्तं
५७३ व२ निश्वना
५७४ व२ पूर्णश्लोकलोपः

अथवा राजनाशः स्यादचिकित्सो गदो भवेत् ।
उत्पातेष्वेषु वायव्येषूत्तमं सक्तुभिर्यजेत् ।।१०५।।
वायुं पूज्य शमीष्वत्र होमं कुर्य्याच्च पूर्ववत् ।
आरायो भूप इत्याद्या ऋग्भिः पञ्चभिरेव च ।।१०६।।
बह्वन्नस्वर्णदानैश्च तद्दोषं शान्तिमाप्नुयात् ।
अकस्माद्विपिने यत्र चरन्ति ग्रामपक्षिणः ।।१०७।।
ग्रामेषु यदि वा वन्या निर्भयाद्वा विशन्ति हि ।
रात्रौ भवन्ति काकाश्च दिवसे कौशिकादयः ।।१०८।।
शृगालो विशति ग्रामं शशो वाप्यथवा निशि ।
मृगाः पक्षिगणा वापि चुक्रोशन्ति च सन्ध्ययोः ।।१०९।।
ग्रामस्य निकटे नूनं दीप्तायां शत्रुतो भयम् ।
कपोतो विशति ग्राममारोहेद्वा विशेद्गृहम् ।।११०।।[५७५]
श्येनगृध्रादयो व्योम्नि भ्रमन्तो वा प्रदक्षिणम् ।
गृहस्य प्राङ्गणे यस्य हेमचक्षुः स्वरो भवेत् ।
एवमादिविकारास्ते पक्षिणां चेद्भवन्ति हि ।।१११।।[५७६]
मधुवल्मीकजच्छत्रपत्राङ्कुरविरूपकाः ।
गृहेषु यदि जायन्ते कर्तृनाशो गृहस्य च ।।११२।।[५७७]
शवार्द्राङ्गं गृहीत्वा श्वा यदि वा मन्दिरं नयेत् ।
तत्स्वामिनाशनं क्षिप्रं गवाङ्गं चेद्व्रणे मृतिः ।।११३।।
मृगपक्षिविकारेषु कुर्याद्धोमं जपादिकम् ।
देवाः कपोत इत्यादि जप्तव्याः पञ्चभिर्द्विजैः ।।११४।।
सुदेव इति मन्त्रं च जपेच्छाकुनिकं च यत् ।
अथर्वणशिरा यस्य जप्तव्याः पापनुत्तये ।।११५।।

---

५७५ व१ भिन्नतया लिखितम् – श्येनगृध्रादयो वापि तत्छुभमचिराद् भवेत्।
कुकुरो षिसिसदति हेमंतादा तु कोकिलाः।।

५७६ व२ भिन्नतया लिखितम् – एवमादीनि जायंते चतुर्नाशो गृहास्य च।

५७७ व२ पूर्णश्लोकलोपः

गोभूस्वर्णान्नदानेन सर्वपापं विनश्यति ।
तस्मादतिप्रयत्नेन शान्तकर्म समाचरेत् ।।११६।।
इन्द्रद्वारार्गलस्त्विन्द्रध्वजो वा नगरं यदि ।
दृश्यते त्विन्द्रदण्डो वा तदा नृपवधं वदेत् ।।११७।।
गृहस्तम्भद्वारदारुकपाटपतनं यदि ।
आस्फोटनं चैव तेषां तदा गृहपतेर्वधः ।।११८।।
संध्याद्वयेऽनले [५७८]दीप्ते धूमो वा यदि कानने ।
अच्छिद्रे वा भुवि च्छिद्रं भूकम्पो वा भयप्रदः ।।११९।।
वेदाचारं परित्यज्य वेदबाह्यं समाचरेत् ।
असाधुशीलो नृपतिः सराष्ट्रेण विनश्यति ।।१२०।।
शिशवश्चोद्धता यत्र नगरे कृत्रिमायुधाः ।
छिन्धिभिन्धीत्युक्तवन्तस्तदा चेद्युद्धमादिशेत् ।।१२१।।
भूतप्रेतपिशाचेषु दृष्टेषु सदनेषु च ।
तेषां हानिभयं कार्या शान्तिर्दोषापनुत्तये[५७९] ।।१२२।।
शचीं शचीपतिं पूज्य तन्मन्त्रैर्जुहुयाद्धविः ।
भूमिस्वर्णान्नदानैश्च बलिभिः शान्तिमाचरेत् ।।१२३।।
राजराष्ट्रविनाशाय केतूनामुदयः सदा ।
वज्राशनिमहीकम्पसंध्यानिर्घातनिस्वनाः ।।१२४।।
परिवेषरजोधूमरक्तार्कास्तमयोदयाः ।
द्रुमेभ्योऽन्नरसस्नेहमधुपुष्परसोद्गमाः ।।१२५।।
[५८०]पक्षावर्कविकारो यो शिवाय मधुमाधवे ।
[५८१]तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम् ।।१२६।।
अनग्निज्वलनास्फोटसमरेष्वनिलाहतम् ।

---

५७८ व२ दग्धे
५७९ व२ प्रवृत्तये
५८० व१ गोपक्षा
५८१ वे.तालोब्दापात

रक्तपद्मारुणा संध्या नभः क्षुब्धार्णवोपमम् ।।१२७।।
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रामे शुभं वदेत् ।
शक्रायुधं परिवेषं विद्युच्छुष्कविरोहणम् ।।१२८।।
कूपोद्वर्तनवैकृत्यं रसनं दारणं क्षितेः ।
नदोदपानसरसां विद्युच्चोत्तरणं प्लवः ।।१२९।।
सरणं चाद्रिगेहानां वर्षासु न भयावहम् ।
दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम् ।।१३०।।
ग्रहनक्षत्रताराणां दर्शनं तु दिवाम्बरे ।
गीतवादित्रनिर्घोषवनोपवनसानुषु ।।१३१।।
सस्यवृद्धिरपांहानिरपापाः शरदि स्मृताः ।
शीतानिलतुषारत्वं[५८२] नर्तनं मृगपक्षिणाम् ।।१३२।।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी ।
दिशो धूमान्धकारश्च सनभो वनपर्वताः ।।१३३।।
उच्चैः सूर्योदयास्तौ च हेमन्ते शोभनाः स्मृताः ।
हिमपातानिलोत्पातविरूपाद्भुतदर्शनम् ।।१३४।।
कृष्णाञ्जनसमाकाशं तारोल्कापातपिञ्जरम् ।
चित्रगर्भोद्भवः स्त्रीषु गजाश्वमृगपक्षिषु ।।१३५।।
पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः ।
उत्पातानखिलानुक्त्वा काकसङ्गममुच्यते ।।१३६।।
काकयोर्मैथुनं सर्वं दिवा वा निशि वा नरः ।[५८३]

---

५८२ वे.त्व

५८३ व-१३७ प्रथमपादानन्तरमधिकं-
क्रतुस्वभावजाप्येते दृष्टाः स्वशत्रोरशुभप्रदाः।।
कन्तारन्यत्र चोत्पातदृष्टास्ते चातिदारुणाः।।१३०।।
उन्मत्तानां च यागार्थाः शिशूनां चेष्टितं यत्तु ।
स्त्रियो यच्च प्रभाषंते तस्य नास्ति व्यतिक्रमः।।१३१।।
पूर्वं चरति देवेषु पश्चाद् गच्छति मानुषान् ।।

SMT. HANSA MEHTA LIBRARY The M. S. University of Baroda

स वै निधनमाप्नोति स्थाननाशमथापि वा ।।१३७।।
महारोगाभितप्तो वा शत्रुभिर्वा पराजितः ।
तद्दोषशमनार्थाय शान्तिं यत्नात्समाचरेत् ।।१३८।।
कुण्डं पूर्वोक्तविधिना कृत्वा होमं च कारयेत् ।
यत इन्द्रं त्रिभिर्मन्त्रैः सम्यक् त्रैयम्बकेन वा ।।१३९।।
पालाशसमिदाज्यान्नैः पृथगष्टोत्तरं शतम् ।[५८४]
एवं यः कुरुते सम्यक्तस्माद्दोषात्प्रमुच्यते ।।१४०।।
शिथिलीजायते यस्य तस्य हानिर्निवेशने ।
दुःखशोकभयक्लेशं कुटुम्बकलहो भवेत् ।।१४१।।
वह्निभीतिः शत्रुभीतिराधिव्याधिस्ततो भयम् ।
तद्दोषशमनार्थाय शान्तिं वक्ष्ये यथाविधि ।।१४२।।
सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः ।
प्रतिमां मृत्युरूपाणां कल्पयित्वा प्रयत्नतः ।।१४३।।[५८५]
अपमृत्युमपक्षुधामिति मन्त्रद्वयेन च ।
कृत्वोपचारान्निखिलान्स्नाप्य पञ्चामृतैः सह ।।१४४।।
[५८६]उक्तप्रावरणं वेश्म नैवेद्यान्तं समर्पयेत् ।
[५८७]तदीशान्यां पूर्णकुम्भं पञ्चत्वक्पल्लवैर्युतम् ।।१४५।।
अब्लिङ्गैर्वारिमन्त्रैश्च मन्त्रितं वस्त्रवेष्टितम् ।
स्वर्णरत्नैश्च संयुक्तं स्थापयित्वार्चयेत्ततः ।।१४६।।
होमं च कारयेत्प्राच्यां कुण्डे वा स्थण्डिलेऽपि वा ।

नानोदिता वाग्वरदास्सत्या ह्येषा सरस्वता ।।१३१।।

५८४ व१ मध्येऽधिकम्-
हुत्वा जपेत् रुद्रसूक्तं पुरुषसूक्तं च भक्तितः।।
शेषकर्मावरे सर्वपूर्वैव भक्तिसंयुतः।।४४।।

५८५ व२ श्लोकलोपः-सुवर्णेन शब्दतः पुरीषमन्दिरे गोष्ठे वृषपर्यन्तं (श्लो.१७२)।

५८६ व१ रक्तप्रवरणं वेश्य

५८७ व१ तदीशानां

पलाशसमिदाज्यान्नैरुक्तमन्त्रद्वयेन च ।।१४७।।
भक्त्याष्टशतं जुहुयादष्टाविंशतिमेव वा ।
तिलहोमं व्याहृतिभिस्ततः पूर्णाहुतिं जपेत् ।।१४८।।
मृत्यु[५८८]वारुणसूक्तैश्च ग्रहमन्त्रैस्त्रिपञ्चकैः ।
कुम्भोदकेन वा स्नानमाचार्यः प्रार्थयेत्ततः ।। १४९।।
आचार्यायैव तां दद्यात्प्रतिमां निष्कविंशतिः ।
तदर्धेन तदर्धेन तदर्धार्धेन वा पुनः ।।१५०।।
ब्राह्मणेभ्यो विशिष्टेभ्यो दद्याद्वित्तानुसारतः ।
ब्राह्मणान्भोजयेत्पश्चाच्छान्तिवाचनपूर्वकम् ।।१५१।।
एवं यः कुरुते सम्यक्तस्माद्दोषात्प्रमुच्यते ।
उक्ता साधारणी शान्तिर्द्रव्यमन्त्रफलैः सह ।।१५२।।
ब्रह्मादिदिक्षु प्रत्येकं द्रव्यमन्त्रफलैः क्रमात् ।
शिशिलीजायते मध्ये सप्ताहाच्च भवेच्छुभम् ।।१५३।।
अत ऊर्ध्वं व्याधिभयं ब्रह्मा तत्राधिदेवता ।
तन्मन्त्रेणैव जुहुयात्पलाशान्नेन सर्पिषा ।।१५४।।
शिथिलीजायते प्राच्यां भयं स्यादष्टवासरात् ।
अत उर्ध्वं राजभयमिन्द्रस्तत्राधिदेवता ।।१५५।।
जुहुयात्खदिराज्यान्नं तन्मन्त्रेण च भक्तितः ।
अग्निभागे यदि भवेत्पञ्चाहात्सुहृदागमः ।।१५६।।
अत ऊर्ध्वं सर्पभयमग्निस्तत्राधिदेवता ।
औदुम्बराज्यचरुभिर्जुहुयादग्निमन्त्रतः ।।१५७।।
शिथिलीजायते याम्यामिष्टसिद्धिस्त्रिवासरात् ।
भार्यानाशस्ततश्चोर्ध्वं यमस्तत्राधिदेवता ।।१५८।।
घृतान्नप्लक्षसमिधयाम्यमन्त्रेण भक्तितः ।
नैर्ऋत्यां वा यदि भवेद्धान्यलाभोऽष्टवासरात् ।।१५९।।

---

५८८ वे.पा.रुद्र

अत ऊर्ध्वं चोरभयं जलेशस्तत्र देवता ।
वटाज्यान्नेन जुहुयादृचा वरुणसंज्ञया ।।१६०।।
शिथिलीजायते वायौ पशुनाशस्त्रिवासरात् ।
अत ऊर्ध्वं शत्रुभयं वायुस्तत्राधिदेवता ।।१६१।।
अपामार्गाज्यचरुभिः स्वयं वा जुहुयात्ततः ।
शिथिलीजायते सौम्ये स्वर्णलाभोऽष्टवासरात् ।।१६२।।
कुटुम्बकलहः पश्चात्कुबेरस्तत्र देवता ।
अश्वत्थसमिदाज्यान्नैः सौम्यमन्त्रेण भक्तितः ।।१६३।।
शिथिलीजायते रौद्रे स्वर्णलाभोऽष्टवासरात् ।
अत ऊर्ध्वं तु निधनं रुद्रस्तत्राधिदेवता ।।१६४।।
आज्यान्नार्कसमिद्भिश्च जुहुयात्तु तया ऋचा ।
[५८९]देवहोमस्नानकूपभुजिस्थाने च तन्मृतिः ।।१६५।।
अन्नभाण्डे चान्नहानिः स्नेहभाण्डे प्रजाक्षयः ।
सर्वे[५९०] च जलभाण्डे च पत्नीनाशस्तथा भवेत् ।।१६६।।
शयने कर्तृनिधनं कुण्डोपरि धनक्षयः ।
आलवालं पटुस्थाने नृपाद्भवति वै भयम् ।।१६७।।
उलूखले कुशूले च द्वारदेशे महारुजा ।
प्राकारे प्राङ्गणेऽलिन्दे क्रीडास्थाने तनुक्षयः ।।१६८।।
गवां स्थानेषु गोहानिः पशुस्थाने पशुक्षयः ।
दधिभाण्डेषु तन्नाशः क्षीरभाण्डे शिशुक्षयः ।।१६९।।
आज्यभाण्डेऽन्नभीतिः स्यान्मधुभाण्डे तपःक्षयः ।
सौवीरपक्वभाण्डे च लवणे कलहागमः ।।१७०।।
[५९१]पेटिकायां वस्त्रहानिस्तरुपीठे रिपोर्भयम् ।
गृहोपकरणे स्थाने क्षिप्रं तस्करतो भयम् ।।१७१।।

---

५८९ व१ देवकूप
५९० व१ सौवीर
५९१ व१ स्फटिकाया

शाकिन्यारामखलपूसस्यक्षेत्रे फलक्षय: ।
पुरीषमन्दिरे गोष्ठे वृषचिकित्सारुजां(चिकित्सायां रुजा) भवेत् ।।१७२।।
तुल्यस्थानानि सर्वेषामुक्तराज्ञां च कथ्यते ।
शिथिलीजायते यत्र ग्रामे जनपदे पुरे ।।१७३।।
चैत्ये देवालये सेतौ विपिने पर्वतेषु च ।
नदीतीरे जले [५९२]चाथ क्षुद्रदेवगृहेषु च ।।१७४।।
अश्वालये गजगृहे खरोष्ट्रमृगपक्षिणाम् ।
विद्यालये शस्त्रगृहे राज्योपकरणालये ।।१७५।।
दासीदासगृहाद्येषु तत्तद्वर्गविनाशनम् ।
साधारणेन शान्त्यैव एते दोषा लयं ययु: ।
तस्माच्छान्तिश्च कर्तव्या द्विजभोजनपूर्वकम्।।१७६।।
अथ पल्लीपतनफलं वक्ष्ये-
कुड्याङ्गे मस्तकाद्यङ्गे पतिते फलमुच्यते ।
मस्तके राज्यनाश: स्याद्भाले कर्णे च भूषणम् ।।१७७।।
वक्ष:स्थले तु सौभाग्यं हृदि प्रीतिविवर्धनम् ।
पुत्रलाभस्तु कुक्षौ स्यान्नाभौ कीर्तिविवर्धनम् ।।१७८।।
नेत्रयोर्मित्रलाभ: स्यात्सुगन्धं नासिकोपरि ।
वक्त्रे तु भोजनं कण्ठे स्त्रीलाभ: स्कन्धयोर्जय: ।।१७९।।
हस्ते तेजोविवृद्धि: स्यादर्थवृद्धि: करद्वयो: ।
अर्थलाभस्तु पृष्ठे स्यात्पार्श्वयो: सुहृदागम: ।।१८०।।
कटिस्थाने वस्त्रलाभो गुह्यस्थाने समागम: ।
गुदे रोगविनाश: स्यादुरुजान्वोश्च वाहनम् ।।१८१।।
जङ्घयो: पादयोश्चैव सदा गमनमादिशेत् ।
पादयोश्चोर्ध्वगमनं कुर्यादामस्तकाद्यदि ।।१८२।।
गात्रप्रदक्षिणं वापि राज्यलाभो भवेत्तदा ।

---

५९२ व१ वापि

मस्तकात्पादपर्यन्तं यदि गच्छेत्तु कुड्यतः ।।१८३।।
गात्रप्रदक्षिणां वापि हानिशोकं समादिशेत् ।
सरटीपतने हानिः सर्वाङ्गेषु च सर्वदा ।।१८४।।
ऊर्ध्वं गच्छेत्तथा वापि कुटुम्बकलहागमः ।
सरटीपतनादेव सचैलः स्नानमाचरेत् ।।१८५।।
व्याधिर्लक्ष्मीवह्निभयं बन्धुनाशधनक्षयः ।
महद्यशः सुहृल्लाभः पुत्रहानिः क्षमाक्षयः ।।१८६।।
मस्तके चेन्द्रलुप्ते तु ब्रह्मस्थानादि तत्फलम् ।
मस्तके त्वग्निदाहः स्यान्मलप्रस्रवदूषिते ।।१८७।।
काकश्येनादिनिहते शुष्कनिष्ठीवदूषिते ।
विनापि वपनं सम्यक् केशानां शुद्धिरिष्यते ।।१८८।।
सपञ्चगव्यतैलेनाभ्यङ्गस्नानं समाचरेत् ।
पश्चात्तु जलसम्पूर्णं नवकुम्भं प्रकल्पयेत् ।।१८९।।
पञ्चत्वक्पल्लवोपेतं पञ्चामृतसमन्वितम् ।
अष्टमृत्तिकासद्बीजस्वर्णरत्नसमन्वितम् ।।१९०।।
शतौषधिसमायुक्तं शुक्लवस्त्रसमन्वितम् ।[५९३]
अब्लिङ्गैर्वारुणैः सूक्तैर्मन्त्रितं समलङ्कृतम् ।।१९१।।
धान्योपरि सुसंस्थाप्य चोपचारैः समर्चयेत् ।
स्नात्वा तत्कुम्भतोयेन तिलहोमं समाचरेत् ।।१९२ ।।
ब्राह्मणाय ततो दद्यात्कुम्भं वस्त्रं सदक्षिणम् ।
ब्राह्मणान्भोजयेत्पश्चात्तस्माद्दोषात्प्रमुच्यते ।।१९३।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायामुत्पाताध्यायः पञ्चचत्वारिंशः ।।४५।।

---

५९३ व१ प्रथमपादलोपः

४६

२.४६.० रोगोत्पत्तिशान्तिः

रोगशान्तिं प्रवक्ष्यामि रोगार्तानां शरीरिणाम् ।
बलिपूजाङ्गहोमैश्च जपब्राह्मणभोजनैः ।।१।।
यस्मिन्धिष्ण्ये यदा नृणां रोगः संजायते सदा ।
धिष्ण्यपूजा प्रकर्तव्या तदीश्वरसुतुष्टये ।।२।।
सुवर्णेन प्रमाणेन तदर्धेन च वा पुनः ।
धिष्ण्येशप्रतिमां कल्प्य यथावित्तानुसारतः ।।३।।
ईशान्यामथवा प्राच्यामुदीच्यां दिशि संलिखेत् ।
तण्डुलोपर्यष्टदलं पद्मं गोमयमण्डले ।।४।।
पञ्चामृतैः सलेहैश्च तत्तन्मन्त्रैः पृथक् पृथक् ।
स्नाप्य कल्पोक्तमन्त्रेण प्रतिमां स्थापयेत्ततः ।।५।।
कर्णिकायां सुसंस्थाप्य धृत्वा देवं समर्चयेत् ।
तद्वर्णवस्त्रगन्धाद्यैरुक्तधूपोपहारकैः ।।६।।
आरक्तवर्णं कुम्भं च पञ्चत्वक्पल्लवैर्युतम् ।
शुक्लवस्त्रस्वर्णरत्नशतौषधिसमन्वितम् ।।७।।
मृत्पञ्चगव्यसद्बीजफलक्षौद्रकुशान्वितम् ।
देवस्य पूर्वतः स्थाप्य जलमन्त्रैः समर्चयेत् ।।८।।
तत्प्राच्यां स्थण्डिले वह्निं विधिवत्स्थापयेत्ततः ।
मुखान्ते जुहुयादुक्त[५९४]द्रव्येणाष्टसहस्रकम् ।।९।।
[५९५]तिलाज्यहोमव्याहृतिभिरष्टोत्तरसहस्रकम् ।
पूर्णाहुतिं च जुहुयात्सम्यक् स्नायीत[५९६] पूर्ववत् ।।१०।।

---

५९४ व२ प्रमादेन पठति–पूर्वतः स्थाप्य जलमंत्रैः समर्चयेत्
५९५ व१,व२ तिलहोम
५९६ व१ जापितपूर्वकं

ततः शुद्धोपविष्टस्य रोगिणः प्राङ्मुखस्य च ।
मन्त्रपूतैः कुम्भजलैरब्लिङ्गैर्वारिमन्त्रकैः ।।११।।
मार्जनं कारयेत्तस्य सम्यक् संकल्पपूर्वकम् ।
नीराजनं च शुद्धात्मा पूजास्थाने समागतः ।।१२।।
देवं [५९७]हुताशनं भक्त्या प्रणम्य प्रार्थयेदिति ।
अमृतोद्भव धिष्ण्येश यतस्त्वं शङ्करात्मकः ।।१३।।
रोगादस्माच्च मां रक्ष तव वश्याश्च धिष्ण्यपाः ।
इति प्रार्थ्य ततो दद्यात्प्रतिमां वस्त्रसंयुताम् ।।१४।।
दक्षिणासहितां भक्त्या आचार्याय कुटुम्बिने ।
ब्राह्मणे च यथा भक्त्या ब्राह्मणान्भोजयेत्ततः ।।१५।।
कृत्वा नक्षत्रपूजां च तिथिवासरयोरपि ।
सर्वान्कामानवाप्नोति रोगी रोगात्प्रमुच्यते ।।१६।।
अश्विन्यामुत्थितो व्याधिर्नवरात्रेण मुच्यते ।
देवस्य त्वेति मन्त्रेण गायत्री कश्यपोऽश्विनौ ।।१७।।
श्वेतवर्णौ सुधापूर्णौ कुम्भाम्भोजधरौ पृथक् ।
चन्दनोत्पलपुष्पाज्यगुग्गुलू च गुडप्रियौ ।।१८।।
क्षीरलड्डूकभोक्तारौ समिधः क्षीरवृक्षजाः ।
गुडोदनबलिं दद्याद्दीपैः सार्धं निशामुखे ।।१९।।
भरण्यामुत्थितो व्याधिरचिरान्निधनप्रदः ।
मासेन मुञ्चत्यथवा दैवस्य कुटिला गतिः ।।२०।।
त्र्यम्बकस्य तु मन्त्रस्य चोक्ता छन्दर्षिदेवता ।
गन्धोऽगुरुः करवीरं पुष्पं धूपश्च गुग्गुलुः ।।२१।।
आज्यदीपं च सर्वेषां नैवेद्यं च गुडोदनम् ।
पाशदण्डधरो रक्तस्त्वाज्यमध्वाक्षतैर्हविः ।।२२।।
महिषीनायकारूढः कृशरान्नबलिं हरेत् ।

---

५९७ व२ देवाशनं

वक्ष्यमाणेन मन्त्रेण बलिं सम्यक् प्रदापयेत् ।।२३।।
कृत्तिकासूत्थितो व्यांधिर्दशरात्रेण मुञ्चति ।
स्रुकस्रुवाभयवरद: स्ववर्णो मेषवाहन: ।।२४।।
मेधातिथिर्जगत्यग्नि: पुनन्तु मामितस्य च ।
चन्दनं यूथिकापुष्पं घृतदीप: सगुग्गुलु: ।।२५।।
नैवेद्यं तिलमाषान्नं चणकाद्येन संयुतम् ।
गुडोदनं हविस्तत्र पायसेन बलिं हरेत् ।।२६।।
रोहिण्यामुत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
नमो ब्रह्मण्यमन्त्रस्य गायत्री विधिरीश्वर: ।।२७।।
शुष्क: कमण्डलुधरस्त्वक्षसूत्राभयप्रद: ।
चन्दनं कमलं पुष्पं सदशाङ्गं च गुग्गुलुम् ।।२८।।
नैवेद्यं पायसं साज्यं सर्वदानैर्हविर्भवेत् ।
दधिक्षीरघृतक्षौद्रशाल्यन्नेन बलिं हरेत् ।।२९।।
[५९८]चन्द्रभे चोत्थितो व्याधि: पञ्चरात्रेण मुञ्चति ।
गदावरदपाणिश्च श्वेतोऽसौ रथवाहन: ।।३०।।
नवो नवो भवत्यस्य गायत्री गौतम: शशी ।
चन्दनं कुमुदं पुष्पं दशाङ्गं पायसोदनम् ।।३१।।
नैवेद्यं मण्डकापूपं घृतक्षौद्रसमन्वितम् ।
शर्करादधिमिश्रेण [५९९]शुक्लान्नेन बलिं हरेत् ।।३२।।
आर्द्रायामुत्थितो व्याधिरचिरान्निधनप्रद: ।
मासेन मुञ्च्यत्यथवा दैवस्य कुटिला गति: ।।३३।।[६००]
शुद्धस्फटिकसंकाश: शूलखड्गाभयेष्टद: ।
नम: शङ्करायेत्यस्य बृहतीशो विधी ऋषि: ।।३४।।
चन्दनं सौरभं पुष्पं दशाङ्गं पायसोदनम् ।

---

५९८ व१ इन्द्रभे
५९९ वे. शुक्त
६०० व१ पूर्णश्लोकलोप:

समध्वाज्यं हविस्तत्र दध्योदनबलिं हरेत् ।।३५।।
पुनर्वसुभवो व्याधिर्नवरात्रेण मुञ्चति ।
कमण्डल्वक्षसूत्रेध्मदर्भस्रुक्स्रुव[६०१]भृत्सदा ।।३६।।
अदितिर्द्यौश्च मन्त्रस्य त्रिष्टुपो द्रुहिणोऽदितिः ।
हरिद्राकुङ्कुमं गन्धं पुष्पसेवन्तिकादयः ।।३७।।
धूपो मलयजं पिष्टं घृतान्नं पीतवर्णकम् ।
घृताक्तं तण्डुलं हविः पीतान्नेन बलिं हरेत् ।।३८।।
पुष्ये समुत्थितो व्याधिः सप्तरात्रेण मुञ्चति ।
पीतो दण्डकमण्डल्वक्षसूत्राभयोद्यतः ।।३९।।
बृहस्पते [६०२]अतीत्यस्य त्रिष्टुपो वाङ्गिरा ऋषिः ।
कुङ्कुमं वारिजं पुष्पं नैवेद्यं घृतपायसम् ।।४०।।
मण्डकागुडसंयुक्तमेतच्चैव हविर्भवेत् ।
समण्डकघृतान्नेन बलिं तत्र प्रदापयेत् ।।४१।।
[६०३]आश्लेषामुत्थितो व्याधिः क्लेशान्मासेन मुञ्चति ।
नमो अस्त्विति मन्त्रस्य विरजाग्निश्च सर्पराट् ।।४२।।
मधुपर्णो भोगयुक्तः खड्गचर्मधरः शुभः ।
सकङ्कुमागुरुगन्धं[६०४] पुष्पं चागस्तिसम्भवम् ।।४३।।
घृतगुग्गुलधूपोऽत्र नैवेद्यं क्षीरसर्पिषः ।
हविः साज्यं सुदध्यान्नं दध्योदनबलिं हरेत् ।।४४।।
पितृभे[६०५] चोत्थितो व्याधिः स चिरान्निधनप्रदः ।
अथवा सार्धमासेन धूम्रो दण्डपवित्रधृक् ।।४५।।
[६०६]आयन्तु नस्त्वितीवास्य जगती पितरोऽब्जजः ।

---

६०१ वे.स्रुच
६०२ व२ बृहस्पते अतिर्यस्य
६०३ व१,व२ सार्पेशसमु-
६०४ व२ श्लोकलोपः गुरुगन्धतः सुदध्यान्नं पर्यंत
६०५ व२ पितृतो

चन्दनं चम्पकं पुष्पं धूपः सघृतगुग्गलुः ।।४६।।
नैवेद्यं [६०७]घृतपिष्टान्नं तिलान्नं सघृतं हविः ।
सतिलान्नं च मुद्गान्नं बलिं च पितृतुष्टये ।।४७।।
पूर्वाफाल्गुनिभे व्याधिरर्धमासेन मुञ्चति ।
भग एव भगवानित्यस्य जगती त्रिष्टुप्च गोविधिः ।।४८।।
पद्माभयकरः पद्मवर्णः सिंहासने स्थितः ।
चन्दनं मालतीपुष्पं बिल्वधूपो घृतोदनम् ।।४९।।
नैवेद्यं शर्करापूपलड्डूकाभिश्च संयुतम् ।
घृतोदनं हविस्तत्र पायसेन बलिं हरेत् ।।५०।।
अर्यमर्क्षे भवेद्व्याधिरर्धमासेन मुञ्चति ।
पद्मवर्णः पद्मसंस्थः पद्मगर्भसमुद्यतः ।।५१।।
अर्यमा यानि मन्त्रस्य अर्यमात्रिभिरब्जजः ।
कर्पूरं कुङ्कुमं गन्धं पुष्पं धूपकसंज्ञकम् ।।५२।।
घृतगुग्गुलुधूपोऽत्र नैवेद्यं घृतपायसम् ।
होमद्रव्यं घृतान्नं स्याच्छाल्यन्नेन बलिं हरेत् ।।५३।।
हस्ते समुत्थितो व्याधिर्नवरात्रेण मुञ्चति ।
उदुत्यमिति हिरण्यस्तु यो गायत्र्यदिती जपेत् ।।५४।।
रक्तगन्धं कुङ्कुमं च पुष्पं राजीवसंज्ञकम् ।
सगन्धगुग्गुलुर्धूपो नैवेद्यं घृतपायसम् ।।५५।।
मधुपुष्पतिलाज्यान्नं दूर्वाभिः सहितं हविः ।
गुडशर्करमध्वाज्यपिष्टान्नेन बलिं हरेत् ।।५६।।
चित्रायामुत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
चित्रं देवानामित्यस्य [६०८]गायत्रीदितिजो रविः ।।५७।।
अक्षसूत्रजपकरस्त्विन्द्रं च पांशिले रतः ।

---

६०६ व२ पापं तु
६०७ व२ यतमिष्टान्नं
६०८ व१,व२ त्वष्टात्रिष्टुपपितामह

सकुङ्कुमागुरुर्धूपः कुसुमं चित्रवर्णकम् ।।५८।।
नैवेद्यं मोदकाज्यान्नं चित्रान्नं सघृतं हविः ।
तदन्नेन बलिं दद्यात्सर्वरोगापनुत्तये ।।५९।।
स्वात्यर्क्षे चोत्थितो व्याधिः सर्वदा निधनप्रदः ।
एकद्वित्रिचतुःपञ्चमासैर्वापि विमुञ्चति ।।६०।।
स नः पितेति मन्त्रस्य गायत्रीमरुदङ्गिराः ।
खड्गचर्मधरः कृष्णो गन्धकृष्णागुरुर्भृशम्[६०९] ।।६१।।
पुष्पं दमनकं धूपं चन्दनागुरुगुग्गुलुः ।
नैवेद्यं पायसं साज्यं हविस्तेन बलिं हरेत् ।।६२।।
द्विदैवभे भवेद्व्याधिर्मासेनैकेन मुञ्चति।
इन्द्राग्नो आगतमिति गायत्री चास्य चैव वा ।।६३।।
मधुच्छन्द ऋषीन्द्राग्नी तयोर्ध्यानं च पूर्ववत् ।
श्रीखण्डं कुङ्कुमं गन्धं तयोः पुष्पं सरोरुहम् ।।६४।।
देवदारुतरोर्धूपो नैवेद्यं घृतपायसम् ।
तदेवान्नं हविस्तत्र चित्रान्नेन बलिं हरेत् ।।६५।।
मित्रभे चोत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
मित्रस्य चर्षिणीरिति गायत्री वास्य चैव हि ।।६६।।
ऋषिर्हिरण्यस्तूपाख्यस्तत्र मित्रोऽधिदेवता ।
द्विभुजः पद्मगर्भाख्यो पद्मभृत्पद्मसंस्थितः ।।६७।।
कुङ्कुमं पुण्डरीकाख्यं पुष्पं धूपं च चन्दनम् ।
नैवेद्यं पायसं साज्यं हविः कन्दमसूरिकम् ।।६८।।
बलिं तत्र प्रदातव्यं मधुशर्करपायसम् ।
घृतपूरकमाषान्नं मुद्गगर्भैश्च संयुतम् ।।६९।।
ज्येष्ठायामुत्थितो व्याधिर्मृत्युरेव न संशयः ।
अथवा मासमेकं वा मुञ्चत्येव न संशयः ।।७०।।

---

६०९ व२ कृष्णागरस्य च

इन्द्रव इति मन्त्रस्य गायत्री चाङ्गिरा ऋषिः ।
इन्द्रस्तु पूर्ववद्गन्धं चन्दनं कुसुमं शुभम् ।।७१।।
कर्पूरधूपो नैवेद्यं चित्रान्नं सुमनोहरम् ।
हविर्वा सूरणं कन्दं मधुकन्दं सुपायसम् ।।७२।।
विचित्रपुष्पगन्धेन दध्यन्नेन बलिं हरेत् ।
मूलभे चोत्थितो व्याधिर्मासार्धेन विमुञ्चति ।।७३।।
खड्गवर्मधरः कृष्णः करालवदनः प्रभुः ।
मो षुणस्य च गायत्री घोरकण्ठोऽथ नैर्ऋतिः ।।७४।।
गन्धः कृष्णागुरुः पुष्पं पद्मनीलोत्पलं शुभम् ।
धूपं कृष्णागुरुर्माषमिश्रितं[६१०] चोपहारकम् ।।७५।।
तदेवान्नं हविस्तत्र माषान्नेन बलिं हरेत् ।
वारिभे चोत्थितो व्याधी रोगिणो निधनप्रदः ।।७६।।
विमुञ्च्यत्यथवा मासैर्द्वित्रिषट्पञ्चसप्तकैः ।
आप्यायस्वेति मन्त्रस्य गायत्री पद्मभोजनम् ।।७७।।
सुवर्णो द्विभुजः पद्मपाणिर्गन्धस्तु चन्दनम् ।
पद्मशैलेयधूपान्नं नैवेद्यं घृतपायसम् ।।७८।।[६११]
हविर्मसूरमिष्टान्नं तदन्नेन बलिं हरेत् ।
विश्वभे चोत्थितो व्याधिः सार्धमासेन मुञ्चति ।।७९।।
विश्वेदेवा स इत्यस्य गायत्री विश्वदेवताः ।
कमण्डल्वभयाम्भोजवरदश्च कुशासनः ।।८०।।
चन्दनं कमलं पुष्पं धूपं सघृतगुग्गुलुः ।
नैवेद्यं पायसाज्यान्नं हविरप्येतदेव हि ।।८१।।
समिद्भिर्निचुलैः सार्धं तदन्नेन बलिं हरेत् ।
श्रवणे चोत्थितो व्याधिर्दशरात्रेण मुञ्चति ।।८२।।

---

६१० व१ लोपः गुरुर्माषतस्तदेवान्नं पर्यन्तं
६११ व१ श्लो.७७,७८ पूर्णश्लोकलोपः

अतो देवेति मन्त्रस्य गायत्री पद्मजो हरिः ।
पीताम्बरः कृष्णवर्णः शङ्खचक्रगदाम्बुजः ।।८३।।
चन्दनं मालतीपुष्पं धूपः कर्पूरगुग्गुलुः ।
शाल्यन्नं षड्रसोपेतं भक्षभोज्यादिभिः सह ।।८४।।
नैवेद्यं हविरप्येतत्पायसेन बलिं हरेत् ।
वसुभे चोत्थितो व्याधिर्दशरात्रेण मुञ्चति ।।८५।।
त्रायन्तामिति मन्त्रस्यानुष्टुब्व्यासो वसुस्मृतः ।
चापबाणधरः शुक्लगन्धः कर्पूरचन्दनम् ।।८६।।
वारिजं गुग्गुलुर्धूपो नैवेद्यं घृतपायसम् ।
हविश्चोदुम्बरसमिद्घृतपायससंयुतम् ।।८७।।
लड्डुकापूपमध्वाज्यतिलपिष्टं बलिं हरेत् ।
वारुणे चोत्थितो व्याधिरष्टरात्रेण मुञ्चति ।।८८।।
इमं मे वरुण इत्यस्य गायत्री कपवचा ऋषिः ।
नागपाशधरः श्रीमान्नवरत्नविभूषितः ।।८९।।
मकरस्थो गुरुर्गावः पुष्पं च कमलात्मकम् ।
कर्पूरं चन्दनं धूपो नैवेद्यं घृतपोलिका ।।९०।।
हविरश्वत्थसमिधश्चित्रान्नेन बलिं हरेत् ।
अजपाद्भे भवेद् व्याधिः सर्वदा निधनप्रदः ।।९१।।
अथवा बहुभिर्मासैर्दिवसैर्वा विमुञ्चति ।
वामपादकरं भूम्यामाकाशे त्वधरद्वयम् ।।९२।।
प्रसार्य प्राञ्जलिः साक्षादीश्वरं चिन्तयन् स्थितः ।
शतमग्निरित्यस्याजपा गायत्री चतुराननः ।।९३।।
कुङ्कुमं चन्दनं गन्धं पुष्पं श्वेतार्कसंज्ञकम् ।
धूपः शतौषधीमूलं नैवेद्यं घृतपायसम् ।।९४।।
हविः कूष्माण्डखण्डः स्याद्दध्यन्नेन बलिं हरेत् ।
अहिर्बुध्न्ये भवेद् व्याधिः सार्धमासेन मुञ्चति ।।९५।।
नमस्ते रुद्र इत्यस्य सर्वं तत्रैव संस्थितम् ।

गन्धचन्दनकर्पूराः पुष्पं पद्मोत्पलं शुभम् ।।९६।।
सबिल्वं गुग्गुलुर्धूपो नैवेद्यं घृतपायसम् ।
मुद्गमाषतिलान्नाज्ययवव्रीहिमयं हविः ।।९७।।
माषमुद्गतिलान्नेन सम्यक् तत्र बलिं हरेत् ।
रेवत्यामुत्थितो व्याधिरष्टरात्रेण मुञ्चति ।।९८।।
हंसः शुचिषदित्यस्य जगती कश्यपो ऋषिः ।
पूषा च देवताम्भोजवर्णाम्भोजधरः शुभः ।।९९।।
रक्तचन्दनगन्धोऽत्र पुष्प(ष्पं) मन्दारसम्भवम् ।
धूपस्तु गुग्गुलुः साज्यं नैवेद्यं घृतपायसम् ।।१००।।
हविस्तदेव सलिलं दध्यन्नेन बलिं हरेत् ।
भूतेशानुचरो यस्माद्रोगनाथो महाज्वरः ।।१०१।।
रोगादस्माच्च मां त्राहि तं गृहीत्वोत्तमं बलिम् ।
प्रतिपत्सु[६१२] भवेद्व्याधिः पञ्चरात्रेण मुञ्चति ।।१०२।।[६१३]
ब्रह्मा तु देवता तत्र पायसेन बलिं हरेत् ।
तृतीयायां भवेद् व्याधिः सप्तरात्रेण मुञ्चति ।।१०३।।
उमा तु देवता तत्र [६१४]घृताक्तेन बलिं हरेत् ।
[६१५]चतुर्दश्यां भवेद्व्याधिर्मृत्युदो वा द्विमासकैः ।।१०४।।
मुञ्चन्ति देवताः सर्वाः पिष्टान्नेन बलिं हरेत् ।[६१६]
पौर्णिमायां भवेद्व्याधिस्त्रिरात्रेण विमुञ्चति ।।१०५।।

---

६१२ व१,व२ प्रतिपदुत्थिता

६१३ व१ – अग्निस्तु देवता तत्र कृषरान्नं बलिं हरेत्।।८८।।
द्वितीयायां भवेद्व्याधिः पञ्चरात्रेण मुंचति।।
तृतीयायां भवद्व्याधिः सप्तरात्रेण मुंचति। उमा तु देवता तत्र...

६१४ व१- चतुर्थ्यां तु भवेद्व्याधिः .. .. ..पंचम्यां तु भवेद्व्याधिः .... षष्ठ्यां तु भवेद्व्याधिः ... . . सप्तम्यां त्रयोदश्यां भवेद्व्याधिः कामस्तु देवता तत्र घृतान्नेन

६१५ व१ अष्टम्यां चतुर्दश्यां भवेद् व्याधिर्मृत्युदोषद्विमासके।

६१६ व१एकादश्यां द्वादश्यां नवम्यां दशम्यां

चन्द्रस्तु देवता तत्र दध्योदनबलिं हरेत् ।
सूर्यवारे भवेद्व्याधिः सोमवारे भवेत्तथा ।।१०६।।
भौमवारे भवेद् व्याधिः क्लेशाय मरणाय च ।
कुजस्तु देवता तत्र रक्तान्नेन बलिं हरेत्।।१०७।।
बुधवारे भवेद् व्याधिः सप्तरात्रेण मुञ्चति ।
बुधस्तु देवता तत्र मुद्गान्नेन बलिं हरेत् ।।१०८।।
गुरुवारे भवेद्व्याधिः पञ्चरात्रेण मुञ्चति ।
गुरुस्तु देवता तत्र हरिद्रान्नबलिं हरेत् ।।१०९।।
भृगुवारे भवेद्व्याधिः सप्तरात्रेण मुञ्चति ।
शुक्रस्तु देवता तत्र चित्रान्नेन बलिं हरेत् ।।११०।।
शनिवारे भवेद् व्याधिर्मासार्धेन विमुञ्चति ।
शनिस्तु देवता तत्र माषान्नेन बलिं हरेत् ।।१११।।
एवं राश्यादिषु दुर्गाबलिं दद्यात्तदीश्वरे ।
यो बलिं कुरुते सम्यग्रोगी रोगात्प्रमुच्यते ।।११२।।
आधाने निधने प्रत्यग्जन्माह्वयविपत्करे ।
नक्षत्रजनिते व्याधौ क्लेशाय मरणाय च ।।११३।।
आश्लेषार्द्रात्रिपूर्वायमवरुणमहच्छक्रतारानलाः स्युः-
द्वादश्यां स्कन्दरिक्तातिथिषु च रविजारार्कवारेषु योषाम् ।
संजाते तस्य रोगे यमपुरमचिरात्प्राप्नुवन्त्येव चन्द्रे
जन्मन्यष्टाख्यबन्धुव्ययभवनगते मृत्युलग्ने च राशौ ।।११४।।

इति श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितायां संहितायां रोगोत्पत्तिशान्त्यध्यायः षट्चत्वारिंशः ।।४६।।[६१७]

---

६१७ व१,व२ मध्येऽनन्तरमधिकम्-

वसिष्ठसंहिता

[१]श्री: (व२ श्री शब्दलोप:)नक्षत्रे यस्य दर्शांतो विषनाड्यां भवेद्यदि।
कुरुयोग इति ख्यातो व्याधिमृत्युभयादिकृत् ।।१।।
जन्मांशे यदि कूहू स्यात् षण्मासान्मृत्युमाप्नुयात्।।
जन्मलग्नेथ जन्मांशे मृत्युमासत्रयाद्भवेत्।।२।।
यस्य जन्मर्क्षगश्चन्द्रो विषनाड्यां कुरुर्भवेत्
अभिचारेण किं तस्य स्वयमेव मरिष्यति।।३।।
(इति धर्मशास्त्रे पद्यं) शतमानं सुवर्णेन कृत्वेन्दो: प्रतिमां बुध:।
वस्त्रैरलंकृतं कृंभं स्थापित्वा सुमंत्रवित्।।४।।
मृतसंजीवनं मंत्रमथवा जातवेदसम्।
अष्टोत्तरशतं जप्त्वा सौरमंत्रास्तथैव(व२श्चावरा) ।।५।।
अष्टाविंशतिसंख्या वा सूक्तेन पुरुषेण च।
औषधात्विति संक्षिप्य साधयेत तेन च ।।६।।
दर्भासने गुरु: शिष्यं प्राङ्गमुखं स्थापयेत्तत:।
स्थापितने जलेनैव वस्त्रापयेज्जातवेदसा।।७।।
आचार्यं पूजयेद् द्विजान् देवज्ञं विशेषत:।
गोभूहिरण्यवस्त्रादीन् ब्राह्मणेभ्य: प्रयच्छति।
एवं शांतिकरं कर्म कुर्यादायु:प्रवृद्धये।।

व१ –इति श्रीवृद्धवसिष्ठब्रह्मर्षि विरचितायां महासंहितायां कुरुयोगविधानाध्याय:।।
श्री कृष्णार्पणमस्तु शके १५७६ जय संवत्सरे उत्तरायणे शशिर्ऋतौ माघमासे कृष्णपक्षे अष्टम्यां अर्कवारे रात्रौ समाप्त:।।श्री।।

व२– इति वृद्धवसिष्ठब्रह्मर्षिविरचिताया महासंहिताया वज्रयोगविधानाध्याय: पंचष्टष्टचत्वारिंशत्तम: संपूर्ण ४६
सं. १८६७ रा आषाढ सुद ८ बुधवारे।।

वसिष्ठसंहिता

अथ शुक्रोदयफलम्

उदयं भार्गवं चैत्रे वज्रिराजराजव्यवस्थिते।।
वैशाखे च भवेन्नाशो सर्वनाशं चतुष्पदम्।।
ज्येष्ठे च सजला पृथ्वी आषाढे जलशोषके।।३।।
श्रावणे कंपिता भूमौ धनधान्यं नभस्यके।।
अश्विने कार्त्तिके मार्गे सहितं च प्रवर्तते।।४।।
पौषे चैव तथा माघे राष्ट्रभंगं विनिर्दिशेत्।।
फाल्गुने अल्पवृष्टिश्च उदयास्तं भृगोः फलं।।५।।
भरण्याष्टम्यऋक्षाणि मेघद्वारं प्रकीर्तितं।।
प्रभूतं वर्षते मेघः सुभिक्षं जायते ध्रुवं ।।१।।
मघादिपंच ऋक्षाणि वायुद्वारं प्रकीर्तितं।।
उन्नताश्चैव मेघाश्च न वर्षन्ति कदाचन।।२।।
स्वात्यादित्रीणि ऋक्षाणि धर्मद्वारं प्रकीर्तितं।।
सुभिक्षं क्षेममारोग्यं बहुवृष्टिश्च जायते।।३।।
ज्येष्ठादिपंच ऋक्षाणि रेतद्वारं प्रकीर्तितं।।
उन्नता अल्पमेघाश्च अल्पसौम्याश्च जायते।।४।।
धनिष्ठा षट ऋक्षाणि हेमद्वारं प्रकीर्तितं।।
सुभिक्षं जायते सर्वं मेघाश्च वर्षते ध्रुवं।।५।।
इति स्वरोदये शुक्रद्वाराणि।।
अतिवातं च निर्वातं अत्युष्णं शीतशीतलं।।
अत्यल्पं च निरभ्रं च षड्विधं मेघलक्षणं।।१ ।।
अथ ग्रामचक्रं।।
ग्रामनक्षत्रमारभ्य कर्तुर्नक्षत्र गण्यते।।
शिरः पंचार्थलाभं च मुखे त्रीण्यर्थनाशनं।।१ ।।
बाणा हृदि धनधान्यं दौषट् दरिद्रता।।
द्वौरगुह्ये भयपीडा च नाभौ चत्वारि संपदा।।२।।
पृष्ठैकं प्राणसंदेहो हस्ते चैकेकलाभदम्।।
जन्मराशिस्थितो ग्रामो त्रिषट्सप्तमगोपि वा।।३।।
सिद्धार्थाश्च विनश्यन्ति आपत्पंच दिने दिने।।४।।

चतुर्थश्चाष्टमो यश्चद्वितीयो वा यदा भवेत्।।
तत्र चोत्पद्यतेऽभयं यत्र चैव विनिर्दिशेत्।।५।।
पंचमो नवमो ग्रामो द्वादशैकादशे दशे।।
महालाभो भवेत्तस्य प्रभवेश्च चिरायुषं।।६।।
अन्यं च पंचमो नवमो ग्रामो दशमैकादशस्थितः।।
द्वितीये व सते नित्यं धनधान्यसमन्वितं।।७।।
चतुर्थश्चाष्टमो ग्रामो द्वादशेपि यदा भवेत्।।
तत्र चोपार्जितद्रव्यं तत्र वापि विनश्यति।।८।।
इति ग्रामचक्रं।।

तत्र शौनकः
कन्यकोद्वाहकाले तु आनुकल्यं न विद्यते।
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहतः।।१।।
सौवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत्।
ऐशाने धवलं कुंभं धान्योपरि निधाय च ।।२।।
दमनं मधु पुष्पं च तथा पालाशसर्षपान्।
मांसी गुडुव्यापामार्ग विडंगं शाकिनी वचा।।३।।
सहदेवीहरिक्रांता सर्वौषधिशतावरी ।
कृत्वाज्यभागपर्यंतं स्वशाखोक्तविधानतः।।४।।
ग्रहोक्तमंडलेभ्यच्य पीतपुष्पाक्षतादिभिः।
देवपूजोत्तरे काले ततः कुंभानुमंत्रणं।।५।।
अश्वात्थसमिधश्चाज्यपायसं सर्पिरन्वितं।
यवव्रीहितिलाः साज्याः मंत्रेणैव बृहस्पतिः।।६।।
अष्टोत्तरशतं सर्वहोमशेषं समापयेत्।
दारपुत्रसमेतस्य अभिषेकं समाचरेत्।।७।।
कुंभाभिमंत्रेणोक्तैश्च समुद्ज्येष्टमंत्रतः।
प्रतिमां कुंभवस्त्रं च आचार्याय प्रदापयेत्।।८।।
ब्राह्मणान्भोजयेत्पश्चाच्छुभदः स्यान्नसंशयः।।इति।।

वसिष्ठसंहिता

अथादित्यशांतिः।। शौनकः।।
ब्राह्मणस्योपनयने नानुकूलो भवेदविः।
तस्य शांतिं प्रवक्ष्यामि मंत्रौषधिविधानतः।।१।।
अत्रोपनयनग्रहणं विवाहादीनामप्युपलक्षणम्।
उपनयनात्पूर्वेद्युः कृत्वा पुण्याहवाचनं।
गृहस्येशानदिग्भागे गोमयेनोपलयेत्।।२।।
कुंकुमतो लिखेत्पद्ममष्टपत्रं सकेसरं।
सुवर्णेन रविं कृत्वा द्विभजं पद्मधारिणं।।३।।
कृत्वाज्यभागपर्यंतं तंत्रं कृत्वा तु पूर्ववत्।
स्वशाखोक्तविधानेन आचार्यो होममाचरेत्।।४।।
आकृष्णेनेति मंत्रेण समिदाज्यचरुं जुहेत्।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा।।५।।
तिलव्रीहींश्च हुत्वाथ होमशेषं समापयेत्।
दारपुत्रसमेतश्च अभिषेकं समाचरेत्।।६।।
कुंभाभिमंत्रणोक्तैश्च समुद्ज्येष्ठमंत्रकैः।
ऋत्विग्भ्यो दक्षिणां दद्यादन्येभ्यश्च स्वशक्तितः।।७।।
प्रतिमां वस्त्रकुंभं च आचार्याय प्रदापयेत्।
एवं यः कुरुते सूर्यं सर्वदोषो विनश्यति।।८।। इति

वसिष्ठसंहिता

वसिष्ठसंहिता व१ अनुसारेण अनुक्रमणिका —-

क्रम:	अध्यायनाम	क्रम:	अध्यायनाम
१	ज्योतिषप्रशंसा	२	दैवज्ञलक्षणं
२	सूर्यचार:	३	चन्द्रचार:
४	भौमचार:	५	बुधचार:
६	गुरुचार:	१२	शुक्रचार:
१३	शनिचार:	१४	राहुचार:
७	संवत्सरम्	८	संवत्सरफलानि
१७	केतुचार:	२०	मानानि
२०	राजादिविचार:	२०	राजफलं
२१	मंत्रिफलं	२१	सस्येशफलं
२२	रसाधीश:	२२	विश्वानयनं
२२	भावव्ययो	२२	तिथीशा:
२३	नंदादिसंज्ञा	२३	नक्षत्रप्रकरणं
२३	तिथिप्रकरणं	२३	पर्वविचार:
२३	पर्वणि निषेधविचार:	२४	क्षौरनिषेध:
२४	प्रयाणे प्रवेशो नवमदिनविचार:	२४	मासदग्धा:
२४	अष्टम्यां निषेध:	२४	आमलकरमावनि
२४	पंचपर्वसु निषेध:	२४	मन्वादि:
२४	युगादि:	२४	गजच्छाया
२४	वृद्धिक्षयादि:	२५	रथसप्तमी
२५	शिवरात्रि:	२५	सामान्यव्रतानि
२५	फाल्गुणशुक्लत्रयोदश्यां शिवरात्रिव्रतम्	२५	दमनारोप:
२५	अक्षयतृतीया	२५	आषाढशुक्लपंचमी
२५	आषाढशुक्लचतुर्दशी	२५	गोकुलाष्टमी
२५	गणेशचतुर्थी	२६	भाद्रपदमासे मित्रनक्षत्रे ज्येष्ठापजनं
२६	अश्विनमासे नवम्यां	२६	विजयादशमी

वसिष्ठसंहिता

सरस्वती–लक्ष्मी–आयुधपूजा
२६ कार्तिकशुक्लतिथिव्रतं
२६ कृत्तिकायोग:
२७ वारप्रकरणं
३० स्थिरचरक्षिप्रनक्षत्रादिविचार:
३० बीजारोपणं
३१ नूतनवस्त्रधारणं
३१ अन्नप्राशन
३१ नष्टद्रव्यप्राप्ति:
३१ रोगोत्पत्ति:
३१ वनौषधी–आदिमुहूर्तम्
३१ गजकर्म
३२ पशूनां स्थानप्रवेश:
३२ पशूनां क्रयविक्रय:
३२ क्षौरविचार:
३२ प्रयाणं
३२ प्रतिदिशां वर्ज्यनक्षत्राणि
३३ धनिष्ठार्चोत्तरादिनिषेध:
३३ कुलाकुलनक्षत्राणि
३३ तिर्यङ्मुखम्
३३ कुलाकुलवारा
३३ त्रिपुष्करयोग:
३४ नक्षत्राणां स्वरूपं
३४ अभिजित्स्नानं
३४ सप्तशलाका
३४ भैषज्यकर्म
३४ भूषणधारणं
३४ मुक्ताफलधारणं
३५ योगप्रकरणं
३७ करणप्रकरणं
२६ भीष्मपंचकव्रतं
२६ अमावस्यानिर्णय:
२८ नक्षत्राणां दशा
३० कर्णवेध:
३१ सर्वविद्यारंभ:
३१ यानारंभणं च
३१ द्रव्यनिक्षेपणं
३१ सर्पदष्टि:
३१ हलप्रवाह:
३१ वापीकूपतडागादि:
३२ दुर्गादिकानां जपनं
३२ संगीतनृत्यादि:
३२ नृपदर्शनं
३२ पाणिग्रहणं
३२ प्रयाणे निषिद्धनक्षत्राणि
३२ पर्वद्वारिकाले वर्ज्यनक्षत्राणि
३३ पुष्पप्रशंसा
३३ अधोमुखकर्म
३३ ऊर्ध्वमुखकर्म
३३ अंधमंदादिविचार:
३४ नक्षत्राणां तारासंख्या
३४ लांगलचक्रं
३४ पंचशलाका च
३४ हेमरजतादिभाजने भोजनं
३४ रोगमुक्तस्नानं
३४ सुवर्णमणिधारणं
३४ वज्रधारणं
३५ खार्जूरचक्रं
३७ विष्ट्यां कार्याकार्यविचार:

वसिष्ठसंहिता

३७	भद्रापुछे	३८	दुर्मुहूर्ता:
३८	दिक्शूलम्	३९	गोचरप्रकरणं
३९	कस्य ग्रहस्य कस्मिन्कार्ये बलं	४०	ग्रहशांति:
४८	ग्रहाणां दानानि	४९	संक्रान्तिप्रकरणं
५२	पक्षादौ चंद्रस्य शुभाशुभविचार:	५२	ताराबलविचार:
५२	अयनादौ चंद्रबलविचार:	५२	मासाद्यदिने चन्द्रबलविचार:
५२	चंद्रताराबलयोर्विचार:	५२	जन्मर्क्षविचार:
५३	उपग्रहप्रकरणं	५४	षट् ऋक्षाणि
५५	सर्वलग्नबलप्रकरण	५६	प्रथमार्तवप्रकरणं
५८	शांति:	५८	पुंजन्मयोग:
५८	गर्भाधानं	५९	पुंसवनं
५९	सीमन्तोन्नयनं	५९	जातकर्म
५९	नामकर्म	६०	जन्मधिष्ण्यविचार:
६०	अन्नप्रशनं	६०	चूडाकर्म
६०	मातृगर्भे चौलनिषेध :	६०	गर्भिणीपते: निषिद्धानि
६१	उपनयनं	६३	ग्रहा: स्वफलदातुं योग्यायोग्यविचार:
६३	सौम्यक्रूरादिविचार:		
६३	लग्नगोचरं	६४	दोषप्रशंसा
६४	लग्ने सूर्यस्यापवाद:	६४	सकलदोषापवाद:
६५	समावर्तन	६७	प्रथमपुत्रजन्मनक्षत्रदेशपरत्वेन विचार:
६५	विवाहप्रश्न:		
६६	विवाहप्रकरणं	६६	वरगुणा:
६६	नक्षत्रविचार:	६६	गुरुशुक्रयोर्मोक्षविचार:
६७	चंद्रस्य मोक्षविचार:	६७	जन्ममासादिविचार:
६७	दम्पत्योरेकनक्षत्रविचार:	६७	ज्येष्ठमासे ज्येष्ठापत्यविधि:
६७	ग्रहणे वर्ज्यदिनानि	६७	लग्ने त्याज्यविचार:
६७	दोषाणां देशव्यवस्था	६७	पञ्चाङ्गशुद्धि:
६८	संक्रान्ति:	६८	संग्रहदोष: तस्यापवाद:
६८	कर्तरी	६८	अंशविचार:
६९	षष्ठाष्टमोरिफदोष:	६९	पापषड्वर्ग:

वसिष्ठसंहिता

६९	भौमाष्टम:	६९	भृगु:षष्टं
७०	गंडांतविचार:	७०	लग्नगंडांतं
७०	विद्धर्क्षविचार:	७०	पादवेधविचार:
७०	यामार्द्धविचार:	७०	कुलिकविधि:
७०	विषनाडिका	७०	अष्टमलग्नं
७१	अकालवृष्टिदोष:	७२	दुर्मर्त्त:
७२	पातवैधृति:	७२	उदयास्तशुद्धि:
७२	उत्पातऋक्षं	७२	उग्रखेटविद्धं
७२	लग्नं दोषैर्दूषितं	७२	अभिजिन्मुहूर्त:
७३	दोषापवाद:	७४	रविगुरुबलं वधूवरयो:
७५	लग्ने ग्रहा: स्वफलदातुं योग्यायोग्यविचार:	७५	षड्वर्गविचार:
		७५	घटीलक्षणं
७५	घटीप्रतिष्ठा	७५	वेदिका
७५	लग्नगोचरं	७५	विवाहभेदा:
७८	घटितप्रकरणं	८०	अभिजिन्मुहूर्त:
८१	गोधूलविचार:	८१	प्रवेशनिर्गमौ
८१	मंडनमुंडनविचार:		
८१	एकोदरप्रसूतानां विवाहविधि:	८१	ज्येष्ठा-ऋक्षादिफलं
८१	वधूप्रवेश:	८२	राजाभिषेकप्रकरणं
८६	अश्वशांति:	८६	गजशांति:
८९	ग्रहणशांति:	९२	यात्राप्रकरणं
९७	प्रतिशुक्रप्रतिबुधप्रतिभौमविधि:	९८	प्रतिशुक्रापवाद:
९८	राहो: पुच्छादिविचार:	९८	शुक्रस्य अंधत्वं
९८	प्रतिशुक्रशांति:	९८	यात्रायां दुर्निमित्तानि
९८	दोहदप्रकरणं	९९	यात्रायां योगविचार:
१०३	गृहप्रवेश:	१०५	वास्तुज्ञानं
१०५	शंकु:	१०७	ग्रहारंभ:
१०८	शंकुवृक्ष:	१०९	गृहस्य सूत्रिते समयेऽरिष्टविधि:
११०	शालाविधि:	११०	अलिन्दानि

वसिष्ठसंहिता

१२५ ज्वलितसंज्ञा भस्मसंज्ञा
१२५ धूमितसंज्ञा राशय:
१२५ महादोषेषु मंगकार्यं निषिद्धं
१२५ ज्येष्ठर्क्षादिफलानि
१२६ चित्रादि-ऋक्षे जननं निषिद्धं
१२६ पुष्यमघाचरणे जननं
१२६ पूर्वाषाढातृतीयचरणे
१२६ एषु ऋक्षेषु पुत्रावलोकनं निषिद्धं
१२६ मूलनक्षत्रफलं
१२६ मूलशांति:
१२९ आश्लेषाशांति:
१३० दोषापवादप्रकरणं
१३१ मासांतदोष:
१३४ गुणदोषाणां मध्ये प्रबलदुर्बलविचार:
१३४ योगैर्दोषशमनप्रशंसा
१३९ अनलोपहतभूषणकाष्ठादिलोहभृंगहतनवस्त्रस्य फल
१४० वारपरत्वेन तस्य फलं नक्षत्रपरत्वेन च
१४० उत्पाता:
१४० उत्पातशांतय:
१४२ पुनरुत्पातशांति:
१४३ पुनरुत्पातशांति:
१४४ वृक्षवैकृतं
१४४ तस्य शांति:
१४४ सस्यवैकृतं
१४५ वृद्धिवैकृतं
१४६ नदी
१४६ पशुवैकृतं
१४६ वापीकूपादिवैकृतं
१४६ हास्यादीनां युग्मप्रस्तुति:
१४६ चतुष्पादै: स्वजातिं त्यक्त्वा अन्यजातिषु मैथुनफलम्
१४६ सूर्यचंद्रयोर्वैकृतं
१४७ नभसि अकस्माद् वा
१४७ निनाद:
१४७ नभसि मुसलउलूखलाकारशूर्पाकार:
१४७ दर्व्याकार:
१४७ सृगालनाद:
१४७ हसनरोदनौ
१४७ तेषां शांति:
१४७ पक्षिवैकृतं
१४७ रात्रौ काकभ्रमणं
१४७ दिवा कौशिकत्रयं
१४७ नगरे दिवा सृगालप्रवेश:
१४७ रात्रौ शशप्रवेश:
१४७ नगरे कपोतप्रवेश:
१४७ गृहेषु आरोहणं
१४७ श्येनगृध्रादि:
१४९ नानाविधोत्पाता:
१५२ काकमैथुनं
१५३ पल्लीसरटं
१५३ रोगशांति:
१६२ कुरुयोग:

वसिष्ठसंहितानुक्रमणिका समाप्ता।